SIVA-KOSHA

Prof. S. K. Ramachandra Rao

SIVA-KOSHA

Volume II

Sri Garib Das Oriental Series No.331

SIVA-KOSHA

Prof. S.K.RAMACHANDRA RAO

Volume II

Sri Satguru Publications
A Division of
Indian Books Centre
Delhi, India

Published by
Sri Satguru Publications,
Indological and Oriental Publishers
A Division of
Indian Books Centre
40/5, Shakti Nagar,
Delhi-110007
India

© All rights reserved.

First Edition; Bangalore, 1998
Second Edition : Delhi , 2008

ISBN 81-7030-893-3 (Vol.II)

ISBN 81-7030-894-1 (Set)

Printed at Sachin.Printers, Delhi.

CONTENTS

Introduction .... (*v*)

Chapter 1

Śiva and Śaivism 1

Chapter 2

Growth of Śaiva-Āgama 24

Chapter 3

Rudra 60

Chapter 4

Liṅga 70

Note I : **Mukha-Liṅga** 100

Note II : **Pūjā-Bhāga** 102

Note III : **Mṛṇmaya-Liṅga** 104

Note IV : **Divyaliṅga** 106

Note V : **Bāṇa-Liṅga** 108

Chapter 5

Iconic Forms 114

Chapter 6

Śiva Parivāra 266

Appendix I : **Rudra-Sūkta (Ṛgveda)** 318

Appendix II : **Rudra-Sūkta (Yajurveda)** 320

Appendix III : **Rudra-Sūkta (Sama-Veda)** 326

Appendix IV : **Rudrāksha** 327

Appendix V : **Kāśyapa-Śilpa** 363

Appendix VI : **Śiva-Tantra** 396

Appendix VII : **Śiva-Mantra** 451

Appendix V

काश्यशिल्पे त्रिषष्टितमः पटलः।

॥ अथ त्रिषष्टितमः पटलः॥

अथ वक्षये विशेषेण चन्द्रशेखरमूर्तिना(काम्)।
केवलं गौरिसहितमालिङ्गं चद त्रिधा भवेत्॥१॥

केवलं गौरिसहितं सहजं गौरिसंयुतम्।
कृनम अलिङ्गमाख्यातमेवं त्रिविधमूह्यताम्।
केवलं समपादं तु स्थानकं सहितं भवेत्॥३॥

समभङ्गं त्रिभङ्गं स्यादभङ्गं चन्द्रशेखरम्।
केवलं मूर्तिदं ख्यातं सहितमभयप्रदम्॥४॥

तेष्वादौ समपादं तु स्थानकं सहितं तथा।
विम्बमानोदयं संर्व प्रागेव परिकीर्तितम्॥५॥

लम्बमानोपमानं च ह्यधुना वक्ष्यते क्रमात्।
प्रलम्बफलकायामं चत्वारि चाष्टमात्रकम्॥६॥

अष्टादशाङ्गुलं तारं सार्धद्विद्व्यङ्गुलं धनम्।
चतुष्पादसमायुक्तं पादोच्चं प्रतिमोदयम्॥७॥

रि (त्र्य) क्षाङ्गुलसमायुक्तं स्थापयेत्समभूतले।
समसूत्रं विनिश्चित्य प्रलम्बफलकोपरि॥८॥

पूर्वेऽपरे च पार्श्वे च मानसूत्रं प्रलम्बयेत्।
अन्तरे सुषिरं कल्प्यं सूत्रान्त्यं लम्बयेत्तदा॥९॥

तत्सूत्रं तु गुणं बिन्बं कारयेद्द्विजसत्तम।
पूर्वे च पातयेत्पृष्ठे कायमध्ये च लम्बयेत्॥१०॥

एतानि पञ्च सूत्राणि ब्रह्मसूत्रमुदाहृतम्।
कक्षान्तरे मुखान्ते च द्वे द्वे सूत्रे प्रलम्बयेत्॥११॥

एवं हि नवसूत्राढ्यं स्तानकं चाऽऽसनं तथा।
मुकुटं मध्यमं चैव ललाटस्य तु मध्यमे॥१२॥

नासाग्रमध्यमं चैव हनोर्मध्यं तथैव च।
हक्किामध्यं च हृदयं मध्ये नाभिश्च मध्यमे॥१३॥

लिंङ्गमध्ये च मध्ये तु पादयोश्च तलान्तर।
लम्बयेत्पूर्वसूत्रं स्यादपरस्तमतोच्यते॥१४॥

मुकुटस्य मध्यमाद्विप्र कृकाटिकास्तु मध्यमे।
ककुन्मध्यत्वमध्ये तु स्फिक्पिण्डान्तरके तथा॥१५॥

ऊरुजश्चो (ङ्घ)र्ध्वशङ्का (जङ्घा) यां पाष्ण्योश्च द्व्यन्तरे तथा।
एवं स्याल्लमबयेत्सूत्रमपरस्यात्रमेव हि॥१६॥

पार्श्वयोः कर्णवल्यन्तं ग्रीवामध्ये तथैव च।
वाह्वो च मद्यमालम्ब्य गुल्फमध्ये तु लम्बयेत्॥१७॥

देहमध्ये गतेनैव पञ्चसूत्रं प्रकल्पयेत्।
श्रोत्राभ्यन्तर्गतं सूत्रं स्तनचूचुकमध्यमे॥१८॥

पादोरुमध्यदेशोन्त्ये मध्यमे तु प्रलम्बयेत्।
पूर्वसूत्रं तु मौल्यग्रं निम्नं दूादशमातृ (त्र) कम्॥१९॥

पूर्वसूत्रं तु मौल्यग्रं षणमात्रं तु प्रमुच्यते॥
पूर्वसूत्रं ललाटनां ह्यन्तरं द्व्यंङ्गुलं भवेत्॥२०॥

अपरसूत्रं शिरः पृष्टे पादोनान्तं युगाङ्गुलम्।
पूर्वसूत्रं तु मन्म (न्व)न्तं सयवं द्व्यंशमिष्यते॥२१॥

कृकाटिकापरं सूत्रं यवोनं द्व्यन्तरान्तरे।
पूर्वसूत्रं तु हिक्कान्तं द्व्यन्तरं तु रसाङ्गुलम्॥२२॥

ककुदोऽपरपृष्ठे तु षोडशं तु यवान्तरम्।
उरसः पूर्वसूत्रं तु इ्यन्तरं तु द्विमातृ(त्र)कम्॥२३॥

ककुन्मध्यात्परं सूत्रं द्व्यन्तरं त्वणुमात्रकम्।
मध्योदरं न्यसेत्पूर्वं सूत्रं वै तत्समं परे॥२४॥

वशं निम्नपरं सूत्रं पादोनाद्यार्हकं परम्।
प्राक्सूत्रान्नाभिमद्ये तु द्व्यन्तरं सार्धमातृ(त्र)कम्॥२५॥

नाभिसूत्रात्परे पृष्ठे सर्धपक्षाङ्गुलं भवेत्।
प्राकसूत्रान्मेढ्रमूलान्तं गुणाङ्गुलमुदाहृतम्॥२६॥

तत्समं तु परे सूत्रे द्व्यन्तरं तु द्विमात्रकम्।
ऊरूमद्ये तु पुरतो जटामध्यं तथैव च॥२७॥

जङ्घामध्ये च नलिकामध्ये चैव पुरोगतम्।
तिर्यक्सूत्रं तु संकल्प्य द्व्यन्तरं तु प्रमीयते॥२८॥

तत्तत्स्याने पुरे चैव तिर्यक्सूत्रं प्रकल्पयेत्।
ऊरुमध्याङ्गसूत्रं तु पूर्वसूत्रं तु द्व्यङ्गुलम्॥२९॥

तत्रैवापरसूत्रं तु षड्विंशतियवं भबेत्।
जानुमध्याङ्गसूत्रान्तां पूर्वसूत्रं रसाङ्गुलम्॥३०॥

तत्रैवापरसूत्रं तु पादोनं पञ्चमात्रकम्।
जङ्घामध्यं तु प्राक्सूत्रं वस्वङ्गुलमुदाहृतम्॥३१॥

तत्रैवापर सूत्रान्तां षडविंशतियवं भवेत्।
प्रा क्सूत्रान्नालकामध्यं सार्धं वस्वङ्गुलं भवेत्॥३२॥

नालकापरसूत्रान्तं पादोनं पञ्चमात्रकम्।
द्व्यर्धमङ्गुष्ठयोरग्रं पूर्वसूत्रं विशेषतः॥३३॥

तत्सूत्रपर्ष्णिपर्यन्तं सार्धमन्विष्यमिष्यते।
प्राक्सूत्रकायमध्यस्थं सूत्रं सार्ध नवाङ्गुलम्॥३४॥

कायमध्यस्थसूत्रं तु शिरः पृष्ठयुगान्तकम्।
तत्कायमध्यसूत्रं तु ककुत्पञ्चाङ्गुलं भरेत्॥३५॥

उरोमध्यप्रदेशे तु पृष्टं सार्ध षडङ्गुलम्॥
सूत्रमध्योदरे पुष्ठे सार्धवेदाङ्गुलं भवेत्॥३६॥

नाभिप्रदेशपृष्ठे तु सार्धभूताङ्गुलं भवेत्।
कठि (टि) नीत्रं षडंशं स्यात्सार्धाष्टांशं खि (स्फि) काग्रकम्॥३७॥

ऊरुमध्योत्पलं वेदो जानुपृष्ठं तथैव च।
जङ्घामध्ये गुणांशां तु नलिका द्व्यङ्गुला भवेत्॥३८॥

गुल्फौ हि (ल्पयोर्हि) युगाङ्गुल्यं परसूत्रे बहिर्घनम्।
पार्श्वसूत्रमधस्तं (स्यात्तु) समसूत्रं तु संस्थितम्॥३९॥

पार्श्वसूत्रात्पुरो बाहुपर्यन्तं चतुरङ्गुलम्।
तत्सूत्रादपरे बाह्यपर्यन्ताव (वं)समातृ(त्र)कम्॥४०॥

पूर्वाकारौ तु मध्ये च कूर्परं तु वलग्नकौ।
तत्करे बाह्यविप्रादौ चतुरङ्गुलमिष्यते॥४१॥

कर्तरीपरहस्ताग्रौ हिक्कासूत्रं सम भरेत्।
मध्याङ्गुलाग्रमुभयोः स्तनचुकसंबरेत्॥४२॥

अभयं दक्षिणे हस्ते वरदं वामहस्तकम्।
प्राक्सूत्रादभये हस्ते मध्यं पञ्चदशाङ्गुलम्॥४३॥

वरदं वामहस्तं तु अधोमुखं प्रकल्पयेत्।
तलमूलं कटीपृष्ठे मेढ्राग्रं तु तत्क (तः पं) रे॥४४॥

मध्याङ्गुल्यं (स) मालम्ब्य ऊरूनीव्रं युगाङ्गुलम्।
ऊरूवक्त्रं तु वरदं पृष्ठं नाभिसमोद्धृतम्॥४५॥

वरदं हस्ततलमध्ये पूर्वसूत्रं तलाङ्गुलम्।
कर्तरीमणिबन्धं तु बाहुबाह्यमुखं भवेत्॥४६॥

अथवा रुद्रभागं तु धशाङ्गुलमथापि वा।
को (कू) र्परं पूर्वसूत्रान्तं नीव्रं सप्तदशङ्गुलम्॥४७॥

जङ्घयोरेकोनविंशदं ऊ (मू) रुमूलं द्वश्योन्नतम्।
गुल्फयोरन्तरं चैव एकाङ्लमुदाहृतम्॥४८॥

ऊरोर्मध्यान्तरङ्गुल्यं विशाद्यं वा उदाहृतम्।
जान्वन्तरं चतुर्मात्रं तु वेद्गांशं गुल्फयोर्भवेत्।
पादाङ्गुष्ठद्वयोरन्तं द्व्यन्तरं वसुमात्रकम्॥५०॥

आर्जवं राजसं भावं कल्पयेद्वा द्विजोत्तम।
कर्तरीपरहस्तौ द्रौ टङ्कं वै दक्षिणे करे॥५१॥

हरिणी वामहस्ते तु टङ्कं कृत्वा बहिर्मुखम्।
हरिणीबाह्यमूलं वा द्व्यन्तराननमेव च॥५२॥

जटामुकुटसंयुक्तं दक्षिणे चन्द्रशेखरम्।
वामेन्दुशेखरं वाऽथ प्रवालसदृशप्रभम्॥५३॥

त्रिनेत्रं सौम्यवदनं सर्वाभरणभूषितम्।
पीताम्बरधरं देवं वस्त्राग्रौ नलकान्तकौ॥५४॥

उभयोः पार्श्वयोरेवमम्बरं चारुमद्यमम्।
केवलं चैवमाख्यातं वामे गौरीसमायुतम्।
तद्गौरीसंयुतं चोरुभिन्नपीठैकमेव वार॥५६॥

तदेव भङ्गसंयुक्तं देवदेव्यौ परस्परम्।
देवो वरदहस्तेन देवीं वै त्वपराश्रिताम्॥५७॥

स्थानमध्यान्तरे वामपार्श्वमालिङ्गनं कुरु।
पार्श्वसूत्रात्परो वाऽथ बाहुमालिङ्गनं तु वा॥५८॥

दोवी (वी) दक्षिणहस्तेन शंभोर्दक्षिणपार्श्वतः।
कटिसूत्रोपरिष्वाथ (ष्टात्तु) पुष्पं वामकरे घृतः॥५९॥

अथवा पार्श्वदेवेशो व्योम्नस्तु दक्षिणे करे।
करोत्पलं (व) हन्त्याश्च वामहसतं प्रलम्बयेत्॥६०॥

एवमालिङ्गमूर्तिश्च त्रिधामान्ये (नेन) कल्पयेत्।
सर्वाभरणसंयुक्तं प्रभामण्डलसंयुतम्॥६१॥

चन्द्रशेखरमाख्यातं वृषारूढमथ शृणु॥६२॥

(काश्यपशिल्पे चन्द्रशेखरमुर्तिलक्षणं नाम त्रिषष्टितमः पटलः।)

अथ चतुःषष्टितमः पटलः।

वृषवाहनमूर्तेस्तु लक्षणं वक्ष्यतेऽघुना।
समभङ्गं विभङ्गं वा कल्पयेत्कल्पवित्तमः॥१॥

दक्षिणं स्वस्तिकं पादं वामपादं तु कुञ्चितम्।
उष्णीषान्मध्यमाद्वामे ललाटं मध्यवामके॥२॥

वामनेत्रावसाने तु वामनासापुटान्तके।
दक्षिणो स्तनपीठं स्याद्वामनाभिश्च मध्यमे॥३॥

वामोरुमध्यपार्ष्णयोश्च मूध्यसूत्रं प्रलम्बयेत्।
एवं तु समभङ्गं स्यात् नतमानं युगङ्शुलम्॥४॥

मुखे पूर्ववदुद्दिष्ट दक्षिणो तु स्तने तथा।
नाभेर्वामे गुणांशं तु वामोष्टमध्यमे तथा॥५॥

स्वसि (सिथ) ताङ्घ्रिस्तु गुल्फं स्यात्मध्ये सूत्रं प्रलम्बयेत्।
आतिभङ्गमिति ख्यातं नतं पञ्चाङ्गुलं भवेत्॥६॥

वृक्ष(ष)रय मस्तकोर्ध्वे तु न्यसेचै(च्च)वामको (कू) र्परम्।
हिक्कासूत्रं तथा विप्र कलांशं वा नवाङ्गुलम्॥७॥

वामको(कू) र्परं लम्बं स्यात्तस्मादास्तनसीमकम्।
वृषभस्योच्चयं ख्यातं पादस्थानाहिताङ्गुलम्॥८॥

वृषभोदयामाख्यातं वृषं लक्षणवत्कुरु।
वृषमूर्ध्नि तु हस्ते तु मध्याङ्गुल्यग्रसीमकम्॥९॥

नाभिसूत्रं समं कुर्यादङ्गुलं वा नताङ्गुलम्।
(अध) स्तात्तलमध्ये तु पूर्वसूत्रं यवद्वयम्॥१०॥

अधोमुखं प्रकर्तव्यं तदार्धं तु प्रसारयेत्।
दक्षिणे पूर्वहस्ते तु पार्ष्णि नाभेरधो बुधः॥११॥

पक्षे षोडशमात्रं वा नतं तत्सिंहकर्णवत्।
वक्त्रदण्डोत्थितं तहिस्मन्कल्पयेत्तु चलाचलम्॥१२॥

स्थिताङ्घ्रिजानुरूर्ध्वासु हिक्कासूत्रं तु(स)मुन्नतम्।
कनिष्ठाङ्गुलिपरीणाहमग्रं वक्त्रयान्वितम्॥१३॥

लोहजं दारुजं वाऽथ वक्रदण्डैवमाचरेत्।
अधस्तान्मणिबन्धस्तु ऊरुमूलं तदुत्तरम्॥१४॥

पञ्चषट्सप्तमात्रं वा वसुनन्दाङ्गुलं तु वा।
जटामुकुटसंयुक्तं जटाभारस्तु लम्बितः॥१५॥

जयबन्धशिरां वाऽपि कर्तुरिच्छावशान्नयेत्।
सर्वाभरणसंयुक्तं रक्ताभं रक्तवध्दृत(क्त्रक)म्॥१६॥

वामपार्श्वे उमादेवी दक्षिणे वा विशेषतः।
स्वस्तिकं दक्षिणं पादं वामपादं तु कुञ्चितम्॥१७॥

उत्पलं दक्षिणे हस्ते वामहस्ते प्रसारितम्।
स्त्रीमानेन विधानेन उमादेवीं च कारयेत्।१८॥

वृषवाहनमारव्यातं नृत्तमूर्तिरयोपरि॥१९॥

(इत्यंशुमद्भेदे काश्यपशिलपे वृषवाहनमूर्तिलक्षणं नाम चतुः षषितमः पटलः)

॥अथत्र्चषष्टितमः पटलः॥

अथ वक्ष्ये विशेषेण नृत्तमूर्तेस्तु लक्षणम्।
उत्साहवर्धनार्थाय उद्धृता चर्ममुण्डिका॥१॥

रुरुण्डावदनं कृत्वा स्पिक्यात्पणनितं तथा।
ह्रिंसोत्सुकासना देवी तत्सुखासनवृद्धये॥२॥

तथा नृत्तं करिष्यति सर्वलोकहिताय वै।
देवानां मूर्तिनाथाय राजराष्ट्रविवर्धनात्॥३॥

नृत्तमष्टादशं ह्येव तेष्वादौ नवमुच्यते।
प्रकृतौ विधिना ग्राह्यं बिम्बमानं द्विजोत्तम॥४॥

उत्तम दशतालेन सर्वाङ्गं नृत्तोन (न्न)तं भवेत्॥५॥

उष्णीषान्मध्यमात्सव्ये ललाटं मध्यदक्षिणे।
नीत्वा शिवाङ्गुलं सव्ये नेत्रान्ते च पुटान्तके॥६॥

हनोः सर्वं तु हिक्कायां मध्ये नाभिं च मध्यमे।
वामोर्वभ्यन्तरे लम्ब्य स्थिताङ्घ्री गुल्फमद्यमे॥७॥

प्रभामण्डलमध्ये तु पूर्वसूत्रं तु लम्बयेत्।
ललाटसूत्रनीव्रं तु युगार्थाङ्गुलमन्तरम्॥८॥

गुल्फसूत्रान्तरे चैव द्वादशांशं विधीयते।
हिक्कामध्यं तु सूत्रं तु सार्धसप्तनवाङ्गुलम्॥९॥

मुकुटोव्य (द्वये) कपक्षाग्रं सूत्रान्तरं तथैव च।
ऊर्ध्वकुक्षिं स्पृशेत्पूर्वं सूत्रमेवं प्रलम्बयेत्॥१०॥

तत्सूत्राडोल (त्पर) बाबा (ह्व) ग्र मर्धादिककलाङ्गुलम्।
तस्मादपरबाह्वग्रं युगाङ्गुलमुदाहृतम्॥११॥

तस्मादग्निकराग्रान्तं साष्टत्रिंशाङ्गुलं तु वा।
चत्वारिंशतिमात्रं वा तस्मादघिगुणङ्गुलम्॥१२॥

हिक्कासूत्रं समाद्धृत्य मध्यमे मध्यमाग्रकम्।
तथास्ता (द्धस्त) तलमध्ये वा मध्याङ्गुल्यग्रपूर्व के॥१३।

मध्यपर्वे यवाधिक्यं त्वनलं पात्रसंयुतम्।
पात्रं विनाध (थ) वाऽऽधिक्यं पञ्चाङ्गुलं विशालकम्॥१४॥

तुङ्गं सप्ताङ्गुलं वाऽष्टनवमात्रमथापि वा।
त्रिपञ्चसप्तजिह्वायां कल्प्यमेवमथोच्यते॥१५॥

उक्तासु मध्यजिह्य (ह्वा) यां वन्यं दक्षिणाननं कुरु॥१६।

तस्माड्डमरुके हस्ते मणिबन्धस्य वाह्यके।
अष्टत्रिंशातिमात्रं वा चत्वारिंदशतिरेव वा॥७॥

चत्वारिंशतिमात्रं वा वामहस्तस्य सव्ययोः॥१८॥

डमरुं मध्यमं पिण्ड्यं सूचीकंर्णं तु उद्धृतम्।
तर्जन्यग्रं तु सूच्यग्रं तर्जनी रजनी भवेत्॥१९॥

अथवा चर्मसूत्रं तु पिण्डी मध्याङ्गुलोपरि।
अनामिकोपरिष्टात्तु डमरुं परिकल्पयेत्॥२०॥

डमरोर्दीर्घविस्तारं वसुपञ्चाङ्गुलं क्रमात्।
मध्यं गुणाङ्गुलव्यासं पद्माकरं प्रकल्पयेत्॥२१॥

वलयद्वयसंयुक्तं चर्मसूत्रेण बन्धितम्।
गव्येनाकृतबिमबं तं तद्द्रव्येण तु कारयेत्॥२२॥

सूच्यग्रात्कर्णसीमान्तं चत्वारिंशतिमात्रकम्।
सपञ्चत्वारिंशद्वा पञ्चांशन्मातृ (त्र) कं तु वा॥२३॥

पार्श्वसूत्रं समं सूच्या वन्यास्तौ मध्याङ्गुलम्।
दक्षिणे पूर्वहस्तं तु अभयं परिकल्पयेत्॥२४॥

प्राकसूत्रादुभये हस्ते मध्यं भानुद्वयाङ्गुलम्।
तन्मध्यमाङ्गुलान्तं तु हिक्कासूत्रसमं भवेत्॥२५॥

सूत्रात्कूर्परनीव्रं च चत्वारिंशद्द्विमात्रकम्।
अभयं प्रकोष्ठमध्ये तु भुजं(गं) वलयं न्यसेत्॥२६॥

प्रकोष्ठमध्यनाहं स्यात् सपादं तस्यं दीर्घकम्।
तत्सूत्रादुपरि ख्यातं फणं भान्वङ्गुलं भवेत्॥२७॥

सप्तङ्गुलं विशालं तु घनमेकाङ्गुलं भवेंत्।
पुरः स्थितान्समीक्षेत्तु जिह्वानीतं समन्वितम्॥२८॥

भुजंगवलयं ह्येवं कल्पयेत्कल्पवित्तमः।
सूत्रात्कक्षान्तरं सव्ये पार्श्वे द्वादशमात्रकम्॥२९॥

सूत्रान्मध्योदरं वामे नवाङ्गुलमुदाहृतम्।
नवमात्पिण्डसूत्रं तु सूत्रादष्टादशाङ्गुलम्॥३०॥

सूत्रात्कुञ्चितजान्वोस्तु अन्तरं तु दशाङ्गुल्।
नवाङ्गुलं चाष्टमात्रं जानुनीव्रं यथाक्रमम्॥३१॥

भानुरुद्रदशाङ्गल्यं नतमानं तु कल्पयेत्।
स्थिताङ्घ्रिजानुं चोर्वामं जानुनीव्रं तदाकुलम्॥३२॥

त्रिपञ्चमनुमात्रं वा जानुद्व्यन्तं तथैव च।
स्थिताङ्घ्रिनलकामध्याद्वामपार्ष्ण्यन्तरं बुधः॥३३॥

सवेदचत्वारिंशाच्च साङ्गुलं प्रविधीयते।
सप्ताष्टपञ्चचत्वारिंशत्त्व(द)ङ्गुलं नतं भवेत्।
त्रयस्त्रिंशतिमात्रं वा जानुपार्ष्ण्यन्तर दिजू॥३४॥

स्थितजान्वो (नू) द्धृतं पार्ष्ण्या चतुस्त्रिंशतिमात्रकम्।
त्रयस्त्रिंशातिमात्रं वा जानुपार्ष्ण्यन्तर दिजू॥३५॥

उद्धृताङ्घ्रिस्तु जान्वो(नू)र्ध्वं नाभिसूत्रं समं भवेत्।
कूर्परं डोरलहस्तं स्यान्नालसूत्रं दशाङ्गुलमा॥३६॥

एकादशाङ्गुल वाऽथ कल्पे वा (ल्प्यैवं) कूर्परान्तकम्।
तद्धस्ते मणिबन्धस्तु वामजानु तु द्व्यन्तरम्॥३७॥

दशाङ्गुलं वा कर्तव्यं नवाङ्गुलमुदाहृतम्।
डोलहस्तं विविन्ध्यस्तदङ्गुलाग्रं विशेषतः॥३८॥

वामपादे तु जङ्घादि द्व्यन्तरं त्वङ्गुलं भवेत्।
नवाङ्गुलान्तरं वाऽपि रुद्राङ्गुलमथापि वा॥३९॥

डोलहस्ताद्धयान्तं तु द्व्यन्तरं तु दशाङ्गुलम्।
अन्योन्ययुक्तनीव्राणि यथासौन्दर्यमाचरेत्॥४०॥

केशान्ताद्धकपक्षं स्यात्तुङ्गमद्यादशाङ्गुलम्।
सप्तदशाङ्गुलं वाऽथ षोडशाङ्गुलमेव वा॥४१॥

तदर्थं वा त्रिपादं वा तस्य विस्तारमेव हि।
सुविकीर्णं जटाभारं पत्र्वषट् सप्त नन्द वा॥४२॥

रुद्रसंख्या तु वा विप्र उभयोः पार्श्वयोस्तथा।
द्वात्रिंशाङ्गुलमारभ्य चैकषष्ट्यंङ्गुलान्कम्॥४३॥

अङ्गुलाङ्गुलवृद्ध्या तु जटादीर्घमुदाहृतम्।
अधोजटादीर्घमेवं तस्मादूर्ध्वं तु मूर्धके॥४४॥

कनिष्ठाङ्गुलिपरीणाहं जटानाहमुदाहृतम्।
जटान्तपुष्पमालाभिरलंकृत्य विशेषतः॥४५॥

नागं चैवार्कपुष्पं च धत्तूरकुसुमं तथा।
हस्तिशिरीषकं चैव करोटिरत्नबन्धनम्॥४६॥

ऋषिं धृत्वा तु मुकुटे दक्षिणे चन्द्रशेखरम्।
सिन्धूराकृतितोलस्तु अष्टमालाविलम्बितम्॥४७॥

भस्मोद्धूलितसर्वाङ्गं किंचित्प्रहसिताननम्।
यज्ञोपवीतसंयुक्तं हरसूत्रसमन्वितम्॥४८॥

देवाङ्गनोरुदे मध्ये बाहुधामेऽग्रमिर्गतिः।
प्रभामण्डलमाश्रित्योदरबन्धाग्रको द्विज॥४९॥

व्याघ्रचर्माम्बरोपेत ऊर्ध्वं गतिवसानकम्।
डोलाबाह्वोर्धृतो बन्धं व्याघ्रचर्म द्विजोत्तम्॥५०॥

लम्बनं बाहुमूले तु भानुत्रयोदशाङ्गुलम्।
तदर्धं वा त्रिपादं वा वस्तारं त(च)क्रमण्डलम्॥५१॥

पादौ नूपुरसंयुक्तौ सर्वाभरणभूषितौ।
हस्तापादाङ्गुलं सर्वं रत्नहेमाङ्गुलीयुतम्॥५२॥

तिर्यक्पादतलन्यासानृत्तं कुर्यान्महेश्वरः।
वामपादं ततोद्धृत्य सतिर्यग्दक्षिणान्वितम्॥५४॥

डोलहस्तमथात्यन्तमपस्मारमिहोच्यते।
त्रिचतुष्पञ्चमात्रं वा अपस्मारस्य दीर्घकम्॥५५॥

अष्टचत्वारिंशांशं तु अपस्मारोदयं कुरु।
उष्णीषं चैकभागोन कैशा-न्तं च द्विधा भवेत्॥५६॥

हृदयं नाभिपर्यन्तं तत्समं परिकीर्तितम्।
नाभिमेढ्रस्य मूलान्त मानं षणमातृ(त्र)कं भवेत्॥५७॥

सप्ताङ्गुलं चोरुदीर्घं जानुदीर्धं या द्वयर्ङ्गुलम्।
जङ्घादि घो (चो) रुतुल्यं स्याद्व्य (न्त)रं चरणोदयम्॥५८॥

मन्वंशं तु करं हिक्का मध्यमाङ्गुलिसीमकम्।
शेषं युक्त्या तु कर्तव्यं शाययेत्तु अधोमुखम्॥५९॥

शंभो सव्यशरीरस्थावुभौ पादौ तु कीर्तितम्।
अपस्मारेदरोच्चं तु धर्मनन्दाष्टमात्रकम्॥६०॥

तन्मुखं तु समुद्धृत्य बाललीलासमन्वितम्।
व्यालं वै वामहस्तेन दक्षिणे तस्य चैन्द्रियम्।
सस्यश्यामनिभाकारमपस्मारं द्विजोत्तम।
कलांशं पद्मपीठोच्चं विस्तारं च घतुर्गुणम्॥६२॥

सपादं सार्धपादोनं द्विगुणं वा तदायतम्।
ऊर्ध्वपद्ममधोपद्मं पिण्डिकां नो(चो)क्तवद्रवेत्॥६३॥

प्रभामण्डलसंयुक्तमनेन विधिना कुरु।
गुणाङ्गुलं समारभ्य शतमात्रावसानकम्॥६४॥

तावदेवाङ्गुलाख्या तु कालकोनश्यातोदयम्।
एकाङ्गुलं समारभ्यैकैकावयववर्धनम्॥६५॥

पश्चात्सख्यासनं ख्याते धण्डः स्यात्प्रथमस्य तु।
तत्तदद्यांशहीनं तु ऊर्ध्वोर्ध्वं तु क्रमात्कृशाम्॥६६॥

एकद्वित्रिचतुष्पञ्चषट्सप्तवसुमात्रकम्।
पुनः पुनस्तथा संख्यमुपकुर्यात्प्रकल्पयेत्॥६७॥

कतृरिच्छावशात्तेषु दण्डसंख्यं तु तत्कुरु।
नानाताद (ल) लताभिश्च नानापुष्पैश्च शोभितम्॥६८॥

तस्योपरिष्टादलिनं हस्तं वै शिखरं बुधः।
कर्तव्यं परितो विप्र तालस्याभ्यन्तरान्वितम्॥६९॥

भानुमण्डलं वा धीमान्प्रभामण्डलवर्तनम्।
तस्य वामे उमा देवी प्रागुक्तविधिना कुरु॥७०॥

एतस्थ प्रथमं पक्का सर्वलोकहितावहम्।
तदेव दक्षिणे पार्श्वे जटाग्रे च विभाजिते॥७१॥

शम्भोर्देहान्तरं चैव षोडशाङ्गुल (संमितम्)।
स्त्रीमानोक्ताङ्ग(सं) युक्तं हृदयं चालिसंयुतम्॥७२॥

एवं मानविधिं युत्कं नृत्तं युक्त्य द्वितीयकम्।
तदेव वामपादं तु अपस्मारोपरि स्थितम्॥७३॥

ऊद्घृतं दक्षिणं पादं वामपादं प्रसारितम्।
ललाटमध्यवामे तु वामनासापुटान्तके॥७४॥

लम्बयेद्ब्रह्मसूत्रं तु स्थितपादस्य गुल्फके।
शेषं प्रागिव कर्तव्यं यथानृत्ततृतीयकम्॥७५॥

अवकीर्णजटाभारजटामुकुटसंयुतम्।
जटामण्डलसंयुक्तं विशेषप्रथनृत्तवत्॥७६॥

चतुर्थं नृत्तमेतद्धि सर्वप्राणिहितावहम्।
कर्णान्तमुद्धृतं सव्यपादं वामं तु कुञ्चितम्॥७७॥

भूका (ता) रूष्टकसमायुक्तमेतत्पञ्चकनृत्तकम्।
अभयं शूलपाशं च डमरुं दक्षिणे करे॥७८॥

कपालं चाग्निपाशं च गण्डं हस्तिकरोपमम्।
गजहस्तोपमं हस्तं प्रसार्य दक्षिणानुकम्॥७९॥

यद्वत्प्रथमनृत्तं स्यात्सर्वसूत्रं प्रसारयेत्।
चित्तपञ्चमनृत्तं स्यादेवमेवेति नृत्यते॥८०॥

दोर्भिः षोडशसंयुक्तं वामे गौरीसमायुतम्।
हस्ताभ्यामुद्धृतं स्कन्धं स्तनं तस्य प्रसारितम्॥८१॥

अभयं शूलपाशं च खड्गं डमरुकध्वजम्।
वेतालं सूचिहस्तं च दक्षमष्टकरं भवेत्॥८२॥

अनलं गजहस्ताभं खेटकं विस्मयं तथा।
घण्टां चैव कपालं च छुरिकां सूचिमेव च॥८३॥

वामे त्वष्टभुजाख्यातं शेषं पञ्चमनृत्तवत्।
एवं षष्ठाष्टमं ख्यातं राजराष्ट्रसुखावहम्॥८४॥

त्रिनेत्रमष्टहस्तं च सुविकीर्णजटाधरम्।
कुञ्चितं वामपादं तु अपस्मारोपरि स्थितम्॥८५॥

वामपार्श्वे शिरस्थस्य विकीर्णाङ्घ्रिश्च दक्षिणे।
उद्धृतं दक्षिणाङ्गुष्ठमग्रं संहितसङ्गमम्॥८६॥

पूर्वसूत्रं तथाङ्गुष्ठनीव्रं भान्वङ्गुलं भवेत्।
अभयं शूलपाशां च डमरुं दक्षिणे करे॥८७॥

कपालमग्निपात्रं च तथा विस्मयहस्तकम्।
गजहस्तोपमं वामे चतुर्थे चैवमेव हि॥८८॥

गजहस्तोपमं सव्यं वामं व्यालसमं तु वा।
ललाटस्य तु मद्ये तु वामे तु स्थानमध्यमे॥८९॥

वामाङ्घ्रिनलिकामध्ये लम्बयेद्ब्रह्मसूत्रकम्।
तत्सूत्राद्वामजान्वे (न्वन्तं) नीव्रं चैव नवाङ्गुलम्॥९०॥

नतमानं दशांशं स्याद्वामे गौरीसमायुतम्।
स्पतमं नृत्तमाख्यातं जगद्दुःखविनाशकम्॥९१॥

तमेव षड्भुजं नेदमभयं डमरुं तथा।
शूलं दक्षिणपार्श्वे तु कपालं विस्मयं तथा॥९२॥

गजहस्तोपमं वामे सूत्रं प्राय (प) यदष्टकम्।
चतुर्भुजं त्रिनेत्रं वा जटामुकुटमण्डनम्॥९३॥

अभयं डमरुं सव्ये वामेऽग्निर्गजहस्तवत्।
अपस्मारं विना पीठे वामाङ्घ्रिकुञ्चितं स्थितम्॥९४॥

तत्तत्पुरस्थितं पीठे सव्यपादकनिष्ठके।
तत्पादं कुञ्चितं युक्त्या सूत्रं युक्त्या तु लम्बयेत्॥९५॥

नवमं नृत्तमाख्यातं गङ्गाधरमतः परम्॥९६॥

(इत्यंशुमद्भेदे काश्यपशिल्पे नृत्तमूर्तिलक्षणं नाम पञ्चषष्टितमः पटलः)

॥अय षट्षष्ठितमः पटलः॥

गङ्गाधरमहं वक्ष्ये संक्षेपेणाधुना शृणु।
स्वस्तिकं दक्षिणं पादं वामपादं तु कुञ्चितम्॥१॥

ललाटमध्यमात्संर्व नीत्वा नवयवान्तकम्।
दक्षिणे चाक्षिसीमन्ते सव्यनासापुटान्तरे॥२॥

हिक्का मध्यमनाभिस्तु सव्ये द्व्यङ्गुलकं भवेत्।
दक्षिणे मेढ्रमूलं स्यान्मध्ये वेदाङ्गुलान्तरे॥३॥

पार्ष्णोभ्च मध्यमे चैव हिक्कासूत्रं प्रलम्बयेत्।
युगांशं नतमानं तु पादाङ्गुष्टद्वयान्तरे॥४॥

अष्टादशाङ्गुलं प्रोक्तं त्रयांशं पार्ष्णिकान्तरम्।
वसिष्ठस्य जटाबन्धं वामे त्वीषन्नताननम्॥५॥

दक्षिणे पूर्वहस्तं तु कुरु देवीस्तनाश्रितम्।
वामेन पूर्वहस्तेन देवीमालिङ्गनं कुरु॥६॥

दक्षिणे परहस्ते तु ज (टाजाह्नवि) संयुतम्।
उष्णीषान्तं समुद्धृत्य वामे कृष्णयुगं ध्रुवम्॥७॥

देवस्य वामपार्श्वे तु देवीवहितकाननम्।
स्वस्तिकं वामपादं तु दक्षिणं कुञ्चितं भवेत्॥८॥

समजङ्ग (ङ्घ) नतं सूत्रं कल्पयेत्कल्वपित्तमः।
प्रसार्य दक्षिणं हस्तं वामहस्तं तु पुष्पकम्॥९॥

अथवा दक्षिणे हस्ते प्रकोष्ठस्य त्रिवर्गकम्।
श्रेणिहस्ततलं लम्ब्य स्वन्पस्थितिमिव क्रमात्॥१०॥

सर्वाहंकारसंयुक्तं सर्वालंकारसंयुतम्।
भागीरथीदक्षिणे पार्श्वे मुनिभिः पठ्यतेश्वरः॥११॥

गङ्गाधरं हरमिति ततो वै त्रिपुरान्तकम्॥१२॥

इत्यंशुमद्भेदे काश्यपशिल्पे गङ्गाघरमूर्तिलक्षणं नाम षट्षष्ठितमः पटलः।

॥अथ सप्तषाष्ठितमः पटलः॥

त्रिपुरान्तकमूर्त्यास्तु लक्षणं वक्ष्यते क्रमात्।
त्रिचतुष्पञ्चमात्रं स्यान्नतमानं यथाक्रमम्॥१॥

अभङ्गं समभङ्गं च अतिभङ्गमिति त्रिधा।
प्रतिमोच्चनतं भागं मानमेवं हि कल्पयेत्॥२॥

पादाङ्गुष्टयोश्चैव द्व्यन्तरं षोडशाङ्गुलम्।
अभङ्गं तद्विजानीयादष्टादशाङ्गुलं समम्॥३॥

विंशत्यङ्गुलमाख्यात (म) तिभङ्गमिति स्मृतम्।
तस्त्रिभागैकभागं तु पार्ष्ण्योस्तु द्व्यन्तरं भवेत्॥४॥

उष्णीषाद्वामपार्श्वे तु नेत्रान्ते तत्पुटान्तके।
हनोर्वामे समालम्ब्य दक्षिणस्तनयामके॥५॥

नाभेर्दक्षिणपार्श्वे तु वामोरुसमपार्श्वके।
दक्षिणाङ्घ्रेस्तु पार्ष्ण्योस्तु वामपार्श्वे तु लम्बयेत्॥६॥

अभङ्गं सूत्रमाख्यातं समभङ्गमथो शृणु।
ललाटमध्यनासाग्रे पादयोः पार्ष्णिमध्यमे॥७॥

लम्बयेत्पूर्वसूत्रं तु द्व्यन्तरं त्वेवमूह्यताम्।
तत्सूत्राद्वामपार्श्वे तु हिक्कासूत्रं शिवाङ्गुलम्॥८॥

अर्धाङ्गुलं तु तत्सूत्रं व येन्द्रथ मे मेढ्र तु मध्यमे।
तत्सूत्रादक्षिणे नाभिमेढ्रमध्यं युगाङ्गुलम्॥९॥

(त) त्सूत्राद्वामजान्वन्तमर्धमात्रं विधीयते।
समभङ्गीति ख्यातमतिभङ्गमथो शृणु॥१०॥

उष्णीषाद्वामपार्श्वे तु नेत्रान्ते च पुटान्तके।
दक्षिणो स्तनमद्यान्तं तत्सूत्रं तु गुणाङ्गुलम्॥११॥

नाभिमध्ये तु वामे तु सूत्रनीव्रं गुणाङ्गुलम्।
तत्सूत्रं वामजान्वन्तमर्धमात्रं विधीयते॥१२॥

वामाङ्घ्रिपर्ष्णिसव्ये तु पार्श्वसूत्रं प्रलम्बयेत्।
स्पर्शनं वेशनं नीव्रं स्म(स)पादस्थानकोर्त(क्त)वत्॥१३॥

एवं त्रिभङ्गसूत्रेषु संमिश्रं तु न कारयेत्।
उत्तमं चातिभङ्गं स्यात्समभङ्गं तु मध्यमम्॥१४॥

अभङ्गमधमं ख्यातं त्रिपुरान्तकमूर्तितः।
दक्षिण स्वस्तिकं पादं वामपादं तु कुञ्चितम्॥१५॥

दक्षिणे पूर्वहस्ते तु द्वे नाभी सूत्रसन्तक(त)म्।
सिंहकर्णं तु तद्धस्तं बाणमध्यं तु पिण्डितम्॥१६॥

बाणा (या) मं तु तत्सप्तत्र्यङ्गुलं तु विधीयते।
कनिष्ठाङ्गुलिपरीणाहं देवशस्य करौ स्थितौ॥१७॥

आस्यं पञ्चाङ्गुलव्यासमास्योच्चं व्यासदृशम्।
आस्पतुङ्गं समं पूज्यं तुङ्गमन्याङ्गुलीततम्॥१८॥

वामहस्ते धनुर्धृत्वा कक्षान्तात्तत्करोर्ध्वकम्।
एकद्वित्र्यङ्गुलं वाऽपि तस्मादृत्यानतं तु वा॥१९॥

शाताङ्गुली (लं) तु तुङ्ग वा पञ्चसप्तनवाङ्गुलम्।
हीनं वाऽप्यधिकं वाऽपि नवधा धनुषान्वितम्॥२०॥

पूर्णमुष्टितु नाहं स्यान्मध्यमाग्रै कृशौ कुरु।
अग्रं मध्याङ्गुलव्यशासं वृत्तवर्णे विचित्रकम्॥२१॥

बाणनाहं त्रिभागैकं रज्जुनाहं तु तन्तुना।
धनुर्दीर्घाद्यभागे तु सप्तांशं रज्जुदीर्घकम्॥२२॥

तद्दीर्घस्यानुकूलं तु धनुर्वक्रमुदाहृतम्।
त्रिवक्रं सहितं वाऽथ बालचन्द्रो भवेत्तथा॥२३॥

धनुषा (रा) कृतिरेवं स्याल्लोहजं दारुजं तु वा।
कर्तरीपरहस्तौ द्वौ टङ्कं कृष्णमृगान्वितम्॥२४॥

टङ्कं दक्षिणहस्ते तु वामहस्ते मृगो धृतः।
जटामुकुटसंयुक्तं सर्वाभरणभूषितम्॥२५॥

प्रवालसदृशाप्रख्यं वामे गौरीसमायुतम्।
त्रिपुरान्तकमूर्तिस्तु प्रथमं लक्षणाञ्चितम्॥२६॥

देवस्य वामपादं तु अपस्मारोपरि स्थितम्।
शेषं प्रागिव कर्तव्यं द्वितीयं लक्षणं भवेत्॥२७॥

स्वस्तिकं वामपादं तु दक्षिणं कुञ्चितं भवेत्।
शेषं प्रागिव कर्तव्यं सूत्रादितरपाश्र्वकम्॥२८॥

तृतीयं लक्षणं प्रोक्तं चतुर्थ लक्षणं हितम्।
तदेव वामपादं तु अपस्मारशिरः स्थितः॥२९॥

प्रागिवैवावशेषं तु चतुर्थं लक्षणं हितम्।
कटौ बाणधरे हस्ते मध्यरेखाकलाङ्गुलम्॥३०॥

तुर्यांशं मनुमात्रं वा त्रयोदशाङ्गुलं तु वा।
भानुरुद्राङ्गुलं वाऽथ द्व्यन्तरं षड्विधं भवेत्॥३१॥

तत्परं कूर्परं नीव्रं श्रोणिपार्श्वं तथा भवेत्।
कक्षाद्धनुर्धनुर्हस्ते मणिबन्धान्तरं ततः॥३२॥

तत्करे कूर्परोद्धारं हृदयान्तमुदाहृतम्।
एकद्वित्रिचतुष्पञ्चमात्रं तन्मानकं तु वा॥३३॥

सर्वेषामपिसामान्यं द्व्यन्तरं कथितं मतम्।
तदेव पूर्वहस्तौ द्वौ कटकौ हृदयास्थितौ॥३४॥

वामे दक्षिणहस्तं तु क्रमाद्द्वंद्वद्वयोर्मुदा।
बाणमूलं धृतं सव्यं वामं बाणग्रंकं धृतम्॥३५॥

परहस्ते दक्षिणे टङ्कं धनूंषि वामहस्तके।
सव्ये पार्श्वे भृगुर्वाथ वामे गौरीसमायुतम्॥३६॥

अपस्मारं विना पादं नतसूत्रं च पार्श्वयोः।
एवं चतुर्भुजोपेता मूर्तिः पञ्चविधा भवेत्॥३७॥

अतिभङ्गं नतो भेदमष्टहस्तसमन्वितम्।
बाणं च परशुं खड्गं यज्ञं वै दक्षिणे करे॥३८॥

धनुषी विस्मयं खेटं मृगहस्तमथापि वा।
वामहस्तमिदं ख्यातं पूर्वहस्तात्करान्तकम्॥३९॥

यथाशोभं तथा तुङ्गं कल्पयगौरिसंयुतम्।
षष्टमप्येवमाख्यातं सप्तमं च अथोच्यते॥४०॥

बाणं चक्रं तथा शूलं टङ्कं वज्रं च दक्षिणे।
धनुः शङ्खं तथा सूचिं विस्मयं खेटकं तथा॥४१॥

वामे पञ्चकरं ख्यातमतिभङ्गस्तथोपरि।
तथैव दक्षिणं जानुं वामोपरि निधापयेत्॥४२॥

तत्पूर्वे या(वा)मपादं तु तले न्य(स्य) रथोपरि।
रथं तु मुकुलोपेतं मुकुलं रज्जुनाऽऽवृतम्॥४३॥

मुकुलाभ्यन्तरे ब्रह्म चतुर्वक्त्रं चतुर्भुजम्।
तस्य दक्षिणहस्तौ द्वौ वेणुदण्डकमण्डलुम्॥४४॥

कुण्डिका पद्मपाशं च वामहस्तद्वयोर्धृतम्।
रथस्य मुकुलाधस्ताद्वृषभं चातिवर्णकम्॥४५॥

रथं याप (पूर्वे) णमार्गेण कल्पयेत्कल्पवित्तमः।
त्रिपुरान्तकमाख्यातमष्टभेदं द्विजोत्तम्॥४६॥

प्रवालसदृशं प्रणां(ख्यं) सत्त्वराजसमुश्रु (संयु) तम्।
सर्वाभरणसंयुक्तं मेघवक्त्रं त्रिनेत्रकम्॥४७॥

तस्य वामे स्थिता देवी प्रागुक्तविधिना कुरु।

सामान्यलक्षणं कार्यं त्रिपुरान्तकमूर्तिनः
(इत्यंशुभद्भेदे काश्यपशिल्पेत्रिपुरान्तक मूर्तिलक्षणं नाम सप्तष्टि नमः पटलः।)

॥अथाष्टषष्टितमः पटलः॥

अथ कल्याणमूर्तेस्तु लक्षणं वक्ष्यतेऽधुना।
ललाटमध्यवामे तु वामनेत्रावसानके॥१॥

वामनासापुटान्ते च हिक्कामध्ये चलं भवेत्।
दक्षिणं नाभिमध्ये तु देवहत्वा(स्ता)ङ्गुलं भवेत्॥२॥

नीत्वा स्थिताङ्घ्रिगुल्फः स्यान्मध्ये सूत्रं प्रलम्बयेत्।
द्व्यन्तरं नतमानं च समभङ्गं यथाक्रमम्॥३॥

स्वस्तिकं वामपादं तु दक्षिणं कुञ्चितं भवेत्।
दक्षिणं पूर्वहस्तं तु गौरीदक्षिणहस्तधृत्॥४॥

वरदं वामहस्तं तु परहस्तद्वयोस्त(र्व) रम्।
दक्षिणे परशुं वाऽथ वामे कृष्णमृगं तथा॥५॥

जटामुकुटसंयुक्तं सर्वाभरणभूषितम्।
देवं प्रवालवर्णाभं पार्श्वे तस्य विशेषतः॥६॥

सरस्यश्यामनिभा देवी प्राग्वन्मानादिसंमताम्।
उत्पलं वामहस्ते तु धृतदक्षिणहस्तकम्॥७॥

शंभोर्दक्षिणसंग्राहलज्जालम्बसमन्वितम्।
पूर्वस्यानुगुणं शीघ्रं सर्वाभरणभूषितिम्॥८॥

हस्ताभ्यां संस्पृशोद्वेदौ तौ (गौ)र्याधस्तु कटिं द्विजः।
देवाग्रे कारयेत्कुण्डं होमकर्म प्रजापतिः॥९॥

शंभोर्वै स्तनसोमान्तं प्रजेशस्योदयं भवेत्।
चतुभुजं चतुर्वक्त्रं सर्वाभरणभूषितम्॥१०॥

अजिनं चाक्षमाला च वामहस्तेऽधरे पु(प)रे।
दक्षिणं पूर्वहस्तं तु धृतवामकरः क्रमात्॥११॥

उत्तराभिमुखासीनः पद्मपीठे प्रजापतिः।
प्रभाग्रौ देवीदेवेशौ देवी देवस्य दक्षिणे॥१२॥

दक्षिणभिमुखो विष्णुर्होमस्योत्तरदिक्स्थितः।
शंभोर्वै नासीसीमान्तं श्रेष्ठायामं स्तनान्तकम्॥१३॥

तयोर्मध्येष्ट वा भज्य नवधा केशवोदयम्।
श्यामवर्णं समं भागं शङ्खचक्रं परे करे॥१४॥

हिरण्यपरकोणापा पूर्वहस्तद्वयोपरि।
संग्राह्यं वरदे हस्ते सुतीर्थोदकपूर्वकम्॥१५॥

अनादिगोत्रसंभूतं श्रीशैवं परमेश्वरम्।
आदिगोत्रा उमा गौरी तवैवास्मिन्ददाम्यहम्॥१६॥

इत्युक्तवा वरदे हस्ते दद्यात्तीर्थोदकं हरिः।
अष्ट लोकेशविद्येशसिद्धप(य)श्च गणादयः॥१७॥

ऋष्यश्चैव गन्धर्वा अप्सराश्च सदैवताः॥१८॥

इत्यंशुमद्रूदे काश्यपशिल्पे कल्याणमूर्तिलक्षणं नामाष्टषष्टितमः पटलः।

॥अथैकोनसप्ततितमः पटलः॥

अर्धनारीशमूर्तेस्तु लक्षणं वक्ष्यते शृणु।
चतुर्भुजं षड्भुजं च द्विभुजं परिकीर्तितम्॥१॥

सभङ्गं स्थानकस्योक्तमागेणैवानतोदयः।
स्वस्तिकं दक्षिणं पादमितरं कुञ्चितं भवेत्॥२॥

वामार्धं पार्वतीरूपं दक्षिणार्धं महेश्वरम्।
अभयं परशुं सव्ये हस्ते वह्निं शिवांशके॥३॥

वृषभं मूर्तिकन्यस्तकूर्परं वामहस्तके।
तदन्यद्वामहस्तं तु कटकं पुष्पसंयुतम्॥४॥

द्विभुजे वरदं सव्ये वामहस्ते तु पुष्पधृत्।
शिवास्य (वस्याऽऽ)भरणं सव्ये वामे श्रीभूषणाञ्चितम्॥५॥

पुस्तकं दक्षिणे पार्श्वे वामे स्त्रीणां पयोधरम्।
अथवा कुञ्चितं सव्यं पादं वाम तु स्वस्तिकम्॥६॥

सव्यं शूलघरं हस्तं वामे पुष्करकं धृतम्।
वरदं दक्षिणं हस्तमन्योक्षिशिरपूर्वकम्॥७॥

कपालं दक्षिणे हस्ते वामहस्तं प्रसारितम्।
दक्षिणे रौद्रदृष्टिः स्याद्वामे पार्श्वे तु सीतलम्॥८॥

दुकूलं चोरुमध्यान्तंस्वयं गुल्फान्तमन्यकम्।
एवं विस्तारतः प्रोक्तमर्धनारीश्वरं परम्॥९॥

इत्यंशुमद्भेदे काश्यशिल्पे ऽर्धनारीश्वरलक्षणं नामैकोनसप्ततितमः पटलः।

॥अथ सप्ततितमः पटलः॥

अथ वक्ष्ये विशेषेण गजहामूर्तिलक्षणम्।
ललाटमध्यनासाग्रं वामेतु स्तनमध्यमात्॥१॥

चामद्विपिण्डमध्यात्तु पूर्वसूत्रं प्रसारयेत्।
तत्सूत्राद्दक्षिणे वामे पादपार्ष्ण्यन्तरं द्विज॥२॥

साष्टत्रिशांतिमात्रं वा षटत्रिंशत्यङ्गुलं तु वा।
तत्सूत्राद्वामनो(तः)सव्यपादाङ्गुष्ठान्तरं द्विज॥३॥

एकविंशतिमात्रं वा एकोनविंशदेव वा।
चतुर्हस्ताष्टहस्तं वा सर्वाभरणसंयुतम्॥४॥

चतुर्भुजं चेत्पांशं च भे(ग)जचर्म च दक्षिणे।
गजास्यं गजचर्म स्याद्वामपार्श्वकरद्वयम्॥५॥

चतुर्दोर्ह्येवमाख्यातमष्टहस्तमथोच्यते।
गजस्य मस्तकं पाशं गजचर्म च दक्षिणे॥६॥

गजशृङ्गं कपालं च गर्जचर्म च विस्मयम्।
वामपार्श्वे तु चत्वारो हस्तमे(स्ता ह्ये)वं प्रकीर्तितम्॥७॥

शंभोर्वामाङ्ध्यधस्तात्तु गजस्येव तु मस्तकम्।
मुकुटस्योपरिष्टात्तु गजपुच्छं प्रकाशयेत्॥८॥

पार्श्वयोगे जयायां तु यथा युक्त्या तु कारयेत्।
प्रभामण्डलवच्छेषं गजचर्म प्रकल्पयेत्॥९॥

शूलखड्गधरं चर्म गजशृङ्गं च दक्षिणे।
कपालं खेटकं खड्गं गजचर्म च वामके॥१०॥

ललाटमध्यनासाग्रं दक्षिणस्तनमध्यमात्।
सव्यपीठस्य मध्यं तु लम्बयेद्ब्रह्मसूत्रकम्॥११॥

स्वस्तिकं वामपादं तु गजस्य मस्तकोपरि।
उद्धृतं दक्षिणं पादं वाममुत्कुटिकं भवेत्॥१२॥

तदङ्घ्रिपार्ष्णयोः स्फिक्पिण्डादद्व्यन्तरं चतुरङ्गुलम्।
तज्जानुवामकक्षस्यं असिसूत्रं समं नयेत्॥१३॥

एवं द्विविधनीत्वा तु गजहामूर्तिरुच्यते।
दक्षसूत्रादुमा देवी शंभोर्वामोभयान्वितम्॥१४॥

एवं हि कल्पितं बिम्बमृ(म्वं रा)जाविजयमाप्नुयात्॥१५।

इत्यंशुमद्भदे काश्यपशिल्पे गजहामूर्तिलक्षणं नाम सप्ततितमः पटलः।

॥अथैकसप्ततितमः पटलः॥

अथ वक्ष्ये विशेषेण पाशुपत (स्य) लक्षणम्।
समपत्स्थानकं प्रोक्तं चन्द्रशेखरमूर्तिवत्॥१॥

त्रिनेत्रं च चतुर्बाहुं मूर्धकेशं महाधनुम्।
अभयं शूलहस्तं च दक्षिणे तु करद्वये॥२॥

वरदं चाक्षमाला च वामपार्श्वकरद्वये।
प्रवालसदृशप्रख्यं सौम्यनेत्रं तु शीतलम्॥३॥

सर्वाभरणसंयुक्तं किंचित्प्रहसिताननम्।
नित्योत्सवस्थबिम्बार्थं स्थानकं वासनं तु वा॥४॥

तदेवाग्निसमं वर्णं रक्ताक्षं कुटिलद्र(भ्रु)वम्।
तीक्ष्णनेत्रस्य (त्रैश्च) संयुक्तं व्यालयज्ञेपवीतिनम्॥५॥

ज्वालानलशिखाकारमतिरत्ननिवासधृक्।
शूलं तथो (त्वधो)मुखं धृत्वा कपालं वरदोद्धृतम्॥६॥

अथवाऽभयं विना शूलं मूलं धृत्वा तु तत्करे।
शूलाग्रं वरदेनैव गव्यतिर्यग्गते ध्रुवम्॥७॥

दक्षिणे वरदे हस्ते टङ्कं खङ्गं तु वामके।
कौतुकं पाशुपतनं बलिलिङ्गे तु पूज्यते॥८॥

ध्यानपूजानिमित्तायामेतन्मूर्तिं वदाम्यहम्।
एतन्मूर्तिं सकृदध्यायेत्सर्वशस्त्रविनाशनम्॥९॥

एवं तु रौद्रमूर्त्यं (र्तिं) तु प्रतिमां नैव कारयेत्॥१०॥

इत्यंशुमद्भेदे काश्यपशिल्पे पाशुपतमूर्तिलक्षणं नामैकसप्ततितमः पटलः।

॥अथ द्विसप्ततितमः पटलः॥

अथ कंकालमूर्तेस्तु लक्षणं वक्षयतेऽधुना।
पादौ तु पादुकोपेतै भिक्षुकंकाललक्षणम्॥१॥

रक्षार्थं परिवारार्थं मोक्षार्थं तु विधीयते।
स्थानकं गमनं ग्राह्यं द्वाविंशं तु प्रवक्ष्यते॥२॥

स्थानकं मूलबेरं च गमनं चोत्सवं भवेत्।
दारुजा लोहजा वाऽथ सुधामृन्मयशर्करा॥३॥

शिला च चित्रं वा कुर्यात्प्रतिमां वा यथाविधि।
एवं च प्रतिमां कुर्यान्मानोन्मानप्रमाणवित्॥४॥

प्रमाणमङ्गैर्वा कृत्वा मानं संग्राह्य बुद्धिमान्।
अङ्गुलैर्यवसंयुक्तैर्हस्ततालवितस्तिभिः॥५॥

अयादि शुभं संग्राह्यं मानं शुद्ध्यर्थकं भवेत्।
पादावधिष्ठानमानं द्वारमुङ्गसमेऽपि वा॥६॥

मूललिङ्गसमोत्तुङ्गं सार्ध द्वित्रियवं तु वा।
तयोर्मध्याष्टभागं तु नवधा तुङ्गमानकम्॥७॥

उत्सवोद्यममानेन समस्तविधिरुच्यते।
वामपादस्थितं चैव दक्षिणं गम्य वक्ष्यते॥८॥

पादौ पादधृतौ चैव भवेद्दक्षिणकुञ्चितम्।
पार्ष्ण्यूर्ध्वदृग्भवेत्पूर्वं ब्रह्मसूत्रं प्रलम्बयेत॥९॥

पूर्वहस्तं कृतं वाऽपि तर्जन्यङ्गुष्ठस्पृक्क्यया॥१०॥

योनिसीमावसानेन दूर्वाकारऐ(इ) वापि वा।
अथ वामकरे पात्रौ (त्रं) नाभिसीमावसानकम्॥११॥

डमरुं पू(वा)हमस्ते तु हनुसीमावसानकम्।
वामे शूलस्य हस्तं तु शिखिपिक्खण्डसंयुतम्॥१२॥

कङ्कालं च तदग्रे तु बन्धयेद्धृदयोपरि।
बाहुसीमावसानेन तत्कन्याच्यविकं भवेत्॥१३॥

एकद्वित्रिचतुर्मात्रं नताधिक्यादिमेव हि।
स्थानके पूर्वसूत्रं वा भङ्गमानमथो शृणु॥१४॥

ललाटवामपार्श्वे तु नेत्रान्ते च पुटान्तके।
हनोर्वामे तु हिक्कायां हृदये कालकोलकम्॥१५॥

नाभेश्च दक्षिणे सूत्रं पक्षाङ्गुलमिति त्रयम्।
योनिनीव्रं तु सूत्रं वा दक्षिणे युगमात्रकम्॥१६॥

वामपादस्थितं वाऽपि द्विपादान्तरमध्यमे।
स्थानकं ह्येवमाख्यातं गमनेषु विधीयते॥१७॥

गमनेषु तु सूत्रं वा ललाटे वामपार्श्वके।
वामाङ्घ्रिगुल्फमद्ये तु द्विपार्श्वके सूत्रकं भवेत्॥१८॥

सूत्रं ललाटमध्ये च दक्षिणे तु द्वयाङ्गुलम्।
वामे च पुटपार्श्वे तु हिक्काहृदयमध्यमे॥१९॥

नाभिवामे द्वयाङ्गुल्यं योनिवामे युगाङ्गुलम्।
वामाङ्घ्रिगुल्फस्पृशं स्याद्गमनस्य तु सूत्रकम्॥२०॥

अभङ्गस्योक्तमार्गेण नतमात्रं च बुद्धिमान्।
गमने सूत्रकं वाऽपि हस्तयोर्नीव्रमेव वा॥२१॥

सव्यहस्ततृणं कुर्यात्सूत्राद्व्यन्तरमंशकम्।
द्वविंशतिद्व्यङ्गुलं वापि त्रयोविंशतिरेव च॥२२॥

मणिबन्धे मध्यमां तु बाह्ये चैव तथैव हि।
नीव्रं तत्रिविधं चैव पात्रे वामकरेऽपि वा॥२३॥

कलासप्तदशं चाष्टमानानौ चा(नतश्चा)पि नीव्रकम्।
नाभिसीमावसाने तु कूर्परं तस्य नीव्रकम्॥२४॥

म(प)ञ्चाङ्गुलमथो वाऽपि तिथिषोडशमेव वा।
दक्षिणं तृणकं हस्ते योनिसीमावसानके॥२५॥

एकद्वित्रिचतुर्मात्रं मृगसस्य (सूत्रं) प्रलम्बयेत्।
ज्ञानमुद्रासिंहकर्णौ यथासौन्दर्यमाचरेत्॥२६॥

वामहस्ते परे शूलबाहुसीमावसानके।
पूर्वसूत्रं तथैव स्याद् शिखाबद्धस्य नीव्रकम्॥२७॥

चत्वारिंशतिमात्रं वा शूलं तु खगु(ड्ग)तोपरि (मरे)।
शूलाग्रो घातुको पीवा कङ्कालं बन्ध्येत्सुधीः॥२८॥

दक्षिणेपरहस्तेन डमरुं कटिकेऽपि वा।
तु(क)टिदीर्वस्य विस्तारं नवांशैरितिकेऽपि वा॥२९॥

मण्डं क्षीणं गुणाङ्गुल्यं पद्माकारं द्विपार्श्वके।
वलयद्वयसंयुक्तं तर्जनी ऋजुतो भवेत्॥३०॥

तर्जन्यां गृह्यमेवं हि हनुसीमावसानकम्।
मणिबन्धस्य नीव्रं तु पूर्वसूत्रं तथैव च॥३१॥

चत्वारिंशतिमेवाह्यमंशाधिकमथापि च।
वामे कपालमात्रं वा भान्वंशं रसनीव्रकम्॥३२॥

धनं मेघाङ्गुलं वाऽपि सुवृत्तंनिर्व्रणं भवेत्।
मकरकुण्डलमेवं हि शङ्खपत्रं तु वामके॥३३॥

जटामण्डलमेवोक्तं विकीर्णं केशामण्डलं।
दक्षिणे तु शेखरं वा पाजन्विर्वामकेऽपि वा॥३४॥

करोटिमन्दबन्धं च धुत्तूरकुसुमावृतौ।
बकयक्षं तथैवोक्तमर्कपुष्पैश्च दूर्वकैः।।३५।।

पिका (ना) किजगबन्धं च कटौ रुद्राक्षमालिका।
नाग कङ्कणं कोष्ठेषु नानारत्नविभू, षितिम्।।३६।।

व्याघ्रचर्माम्बरधरं रुद्रवक्त्रप्रकाशितम्।
भस्मोद्धूलितदिव्याङ्गं किंचित्प्रहसिताननम्।।३७।।

एतत्कङ्कालनामास्ति वामस्कन्धोपरि त्यजेत।
अनेकभूतैर्जायाभिः सेवितं वन्दितं च तैः।।३८।।

बलिपात्रधृतं भूतमग्रे गे(हे)मसमन्वितम्।
दत्त्वा त्वन्नं तु तत्पात्रे निधायाकृतिजायया।।३९।।

किंचित्प्रकाशितं योनिसंयुक्तं नत(व)वाससा।
संभूता मनसोपेता जायाः सर्वतने(त्रेनै)कशः।।४०।।

दक्षिणे कटिपार्श्वे तु क्षुरिकाश्चैव बन्ध्येत्।
क्षुरिकाहेमसंकाशामुपबन्धसमाञ्चिता।।४१।।

उभयोः पार्श्वयोर्हस्ते नानानागैर्विभूषिताम्।
ऋषिभिर्देवगन्धर्वैः सिद्धविद्याधरादिभिः।।४२।।

हृदयं कलिसंयुक्तं संभ्रान्तमनसाञ्चितैः।
सर्वानित्यसदानन्दं सेविताद्यैः सुपूजितम्।।४३।।

वीथीं संमार्जयेद्वायुः पर्जन्यो जलसेचनम्।
पुष्पवृटष्टिकृतो देवा ऋषयः स्तोत्रपाटकाः।।४४।।

ऋग्यजुः सामाथर्वाणः स्तुतिं कुर्युः परे परे।
चर्मबन्धं च कांसं च वीणा सुषिरमेव च।।४५।।

शङ्खध्वनिसमायुक्तं पञ्चवाद्यं महा(समा)रभेत्।
तुम्बुरु नारदाद्यैश्च जपवाद्यं सलक्षणम्।।४६।।

चन्द्रादित्यादिचिद्रोजाचा (वद्राजच्चा) मरा दिव्ययोषितः।
सर्वलोकोपकारार्थमिन्द्रस्य सवनादिषु।।४७।।

वाभूतागमनादेवा योन्येव (निसीमा) वसानकम्।
पञ्चतालेन भूतं च मानोन्मानप्रमाणकम्।।४८।।

भूते तु शिरसो (सः) पात्रं द्विहस्तं स्पर्श एव वा।
पात्रह (वि) स्तारके वाऽपि विंशातिरङ्गुलं तु वा।।४९।।

निम्नमानं दशाङ्गुल्यं खनमेकाङ्गुलं भवेत्।
हिरण्यं दक्षदिग्भागे जानुसीमावसानकम्।।५०।।

मूर्धन्यादिपदान्ते च हरिणीं तुङ्गमेव च।
देवस्य पूर्वसूत्रे तु स्पर्शमानं तथैव हि।।५१।।

नासाग्रे विंशदङ्गुल्यं त्रयोविंशादथाङ्गुलम्।।५२।।

स्पर्शनं कुक्षिनासाग्रमङ्गुष्ठमूलं लम्बयेत्।
सूत्रवामे तु नीव्रान्तमष्टाङ्गुल्यशराङ्गुलम्।।५३।।

तत्सूत्राद्दक्षिणाङ्गुष्ठे नीव्रकं तु नवाङ्गुलम्।
दशरूद्राङ्गुलं वाऽथ द्वादशाङ्गुलमेव च।।५४।।

सूत्रस्थानं तु निम्नं वा सव्य पार्ष्ण्यर्न्तरेऽपि वा।
द्वाविंशदङ्गुलं वाऽपि त्रयोविंशतिर्मव वा।।५५।।

सूत्रात्पार्श्वं तु सीमान्तं दक्षिणाङ्गुष्ठनिम्नकम्।
एकद्वित्रिचतुष्पञ्चरसाङ्गुल्यं तु नीव्रकम्।।५६।।

पीठे दक्षिणपार्ष्ण्यें (श्वे) तु वेदपञ्चरसाङ्गुलम्।
पादुकायामकं वाऽपि पादतालायसीम (वसान) कम्।।५७।।

उत्सेधेन गुणाङ्गुल्यमूर्ध्वमानं तु पद्मकम्।
तर्जन्यङ्गुष्ठयोर्मध्ये मुकुलाकृति बन्धयेत्।।५८।।

द्व्यङ्गुलं कुमुदोत्सेधं सुवृत्तं सुन्दरं भवेत्।
कैलासशिखरे रम्ये शीगन्धे देवनायकम्।।५९।।

ऋषीणां संगमे प्रीत्या भगवान्परमेश्वरः।
दण्डकारण्यलीलायां मुनीनां सर्वशान्तये।।६०।।

तेषां श्रीणां च पौरन्ध्रा (न्ध्ये) विघाताय च लीलया।
भिक्षस्वरूपं नग्नेन कटिसूत्रविवर्जितः।।६१।।

इत्ययं परमेशानः कैलासं त्रैविनीयतम्।
मिक्षां करोम्यहं विप्र कङ्कालस्य तु मोक्षणम्॥६२॥

काश्यप उवाच-

त्वया वै वर्धितं चास्य कङ्कालस्यो (स्य) फलं कथम्।

शिव उवाच-

इदानीं पुरतो विप्र कथ्यते तत्सविस्तरम्॥६३॥

तदहं भुवनादीनि याचेऽभयेपुरस्करः।
कम्पितस्तु समस्तानि भवनान्यधिवासितः॥६४॥

प्रार्थयेद्यस्तु मां भिक्षां मासं भयनिवृत्तये।
अण्डानां सुस्थितार्थं च सर्वलोकोपकारकम्॥६५॥

कङ्कालमोचनान्तं तु तद्धुनैवमहं द्विज।
भिक्षान्ते मोचयेदेतत्कङ्कालमभयं भवेत्॥६६॥

काश्यप उवाच-

एवं कङ्कालमाख्यातं करिरर्थ (हरमर्धहरि) शृणु॥६७॥

इत्यंशुमद्भेदे काश्यपशिल्पे कङ्कालमूर्तिलक्षणं नाम द्विसप्ततितमः पटल।

॥अय त्रिसप्ततितमः पटलः॥

अथ वक्ष्ये विशेषेण हरिर (म)र्धहरं परम्।
आर्जवं स्वस्थि(स्ति)कं स्थानं स्थानकं समपादकम्॥१॥

दक्षिणं चाभयं वामं (मे) कटकं पूरिमाश्रितम्।
परशुं दक्षिणे वामे (भागे) शङ्खायुधधरं परम्॥२॥

सव्ये वामे च मुकुटे जटाकिरीटमण्डितम्।
प्रवालं श्यामरूपं तु तस्यो (च्छो) भाभरणान्वितम्॥३॥

दक्षिणे तूग्रदृष्टिः स्याद्वामे दृष्टिः स(सु) शीतलम् (ला)।
किंचित्प्रकाशितार्धं च दृष्ट्र्या तु तल्ललाटके॥४॥

सर्वाभरणसंयुक्तं दिगम्बरसमन्वितम्।
शिरश्चक्रसमायुक्तं तस्य लक्षणमुच्यते॥५॥

प्रणमं च चटाभारं नग्नरूपं नताननम्।
ललाटपट्टसंयुक्तं कटिसूत्रविवर्जितम्।
शुद्धश्वेतनिभं प्रोक्त मानं नागविभूषितम्।।७।।

दक्षिणे पूर्वहस्तं तु मृगस्या सन्नकं भरेत्।
वामे तु वूर्वहस्तं तु वरदं स्यात्कपालधृत्।।८।।

दक्षिणे परहस्ते तु डमरुं च धरेद्विज।
वामे तु शिखिपिञ्छं च कर्तव्यं शीतलं धृतम्।।९।।

सितवस्त्रोत्तरीयं तु नागेन कटिवेष्टितम्।
श्वेतयज्ञोपवीतं तु नीलवर्णात्रिपुण्ड्रधृत्।।१०।।

पझपीठोपरिष्टात्तु शेषं कङ्कालमूर्तिवत्।।११।।

(इत्यंशुमद्भेदे काश्यपशिल्पे भिक्षाटनमूर्तिलक्षणं नाम चतुः सप्ततितमः पटलः।)

।।अय पञ्चसप्ततितमः पटलः।।

अथ वक्ष्ये विशेषेण चण्डेशानुग्रहं परम्।
उमासहितवत्सर्व वामे किंचिन्नताननम्।।१।।

दक्षिणे त्वभयं वर्ज्य तथा त्वाभरणं भवेत्।
मवा (तद्वा) मे कटकं न्यस्य अधस्ताच्चडमूर्तिनाम्।।२।।

हृदयाञ्जलिसंयुक्तौ हस्तौ तदभिसंयुतम्।
आसनादिसुखासीनं चण्डेशं वर्णसंनिभम्।।३।।

देवीदेवेश्वरौ मध्ये स्कन्दमूर्तिं विना बुधः।
चणडेशानुग्रहं ख्यातं दक्षिणं कीर्तितं परम्।।४।।

(इत्यंशुमद्भेदे काश्यपशिल्पे चण्डेश नुग्रहो नाम पञ्चसप्ततितमः पटलः।)

।।अथ पट्सप्ततितमः पटलः।।

अथ वक्ष्ये विशेषेण दक्षिणामूर्तिलक्षणम्।।

लम्बयेद्दक्षिणं पादं वामाङ्घ्रिनल (का) ग्रकम्।।१।।

सव्योर्वग्रं निधातव्यं वामपादं तु शाययेत्।
ललाटदक्षिणे सव्ये नेत्रान्तं पत्पुटान्तके।।२।।

यवत्रयान्तरं नीत्वा लम्ब्य नाभेस्तु मध्यमे।
मेढ्रमूलं तु मध्ये स्यात्पूर्वसूत्रं प्रलम्बयेत्॥३॥

नतमत्यर्थमात्रं स्याच्चतुर्भुजसमन्वितम्।
दक्षिणे पूर्वहस्ते तु अक्षमालाधरं परम्॥४॥

वरदं पूर्वहस्त स्यादष्टहस्तमथापि वा।
वामजानूपरिष्टाच्च वरदे तलपृष्ठकम्॥५॥

वामजानूपरिष्टात्तु दण्डके कूर्परान्यसेत्।
वामे चापरहस्तं तु वह्निर्वा व्यालमेव वा॥६॥

अर्धेन्दुवक्त्रं सर्वाङ्गं मम दास्यति कोपकम्।(?)
विकीर्णमूर्धजं वाऽपि जटामण्डलमेव वा॥७॥

वामे धत्तूरनागौ च दक्षिणे चन्द्रशेखरम्।
हसितं वक्त्रसंयुक्तं सर्वाभरणभूषितम्॥८॥

सितवस्त्रोत्तरीयं च सितयज्ञोपवीतिनम्।
त्रिनेत्रं धवलं वामे सव्ये मकरकुण्डलम्॥९॥

कर्णौ तु पत्रशङ्खं स्यात्कुण्डलैर्वाऽथमण्डितम्।
रुद्राक्षे (क्षैः) कण्ठमालाभा हृ (भिर्हृ) न्मालां च विमू (लाभिश्च भू)
षितम्॥१०॥

व्याघ्रचर्माम्बरोपेतं सर्वक्लेशविवर्जितम्।
नारदो जमदग्निश्च वशिष्ठो भृगु दक्षिणे॥११॥

भरद्वाजश्च शुनकश्चागस्त्यो वामपार्श्वके।
वन्दितं किन्नराद्या (द्यै) स्तु वटवृक्षसमाश्रित्ताः (तैः)॥१२॥

अपस्मारोपरिष्टात्तु लम्बपादतलं न्यसेत्।
सूत्रं तत्पादपार्ष्ण्यं तु वेदं स्यान्मनुमात्रकम्॥१३॥

सूत्रं तत्पादजान्वोस्तु द्व्यन्तरं भानुमात्रकम्।
श्यामवर्णमपस्मारं नागलीलासमन्वितम्॥१४॥

धर्मव्याख्यानमित्येवं कल्पयेत्कल्पवित्तमः।
तदेव वामपादेनकुटि (क्कुटा) सनसंयुतम्॥१५॥

पूर्वहस्तद्वयोर्वीणाधृतं युकत्या द्विजोत्तम्।
शेषं प्रागिव कर्तव्यमेतद्वीणाधरं परम्॥१६॥

तदेव वीणाहीनं तु ज्ञानमुद्राभयान्वितम्।
वामं प्रसारितं हस्तं वामजान्वोर्ध्वको (कू) र्परम्॥१७॥

दक्षिणे तु परे चाक्षमालां वामेब्जमुत्पलम्।
शुद्धश्वेतनिभं वर्णं शेषं पूर्ववदाचरेत्॥१८॥

ज्ञानमूर्तिरिति ख्यातं सर्वालंकारसंयुतम्।
अन्यान्याङ्घ्रितलं विप्र स्पिक्पिण्डाथ (धः) प्रकल्पयेत्॥१९॥

ज्ञानमुद्रा हि (हृ) दिस्थारे (ने) त्वभ्यन्तरधृतं करम्।
वरदं वामहस्ते तु मेढ्रपीठोपरि न्यसेत्॥२०॥

दक्षिणे चाब्जमालां (वा) मालाऽब्जं वामहस्तके।
नासाग्रं तु समीक्ष्याक्षावार्जवं सूत्रभेदकाः॥२१॥

अपरे तु जटालम्बमृषिभिः सेवितं परम्।
योगमूर्तिरिति ख्यातं ध्याने दुःखनिवृत्तिदम्॥२२॥

लम्बयेद्दक्षिणं पादं वाममुत्कुटिकासनम्।
योगपट्टंत था बध्वा देहं चोत्कुटिकासनम्॥२३॥

प्रसार्य वामहस्तं तु वामजानूपरि द्विज।
प्रागिवैव कृतं शेषं तदपि योसमूर्ति वै (वत्)॥२४॥

ऊरु मूर्ध्नि समायुक्तो अन्योन्यं पादपाणिकौ।
योगपट्टिकयोपेतं जङ्घामध्यं द्विजोत्तम्॥२५॥

प्रसार्य पूर्वहस्तौ तु जानूपरि निधापितौ।
अपरे दक्षिणे चाक्षो वामद्वा (क्षमाला वा) मे कमण्डपः (लु)॥२६॥

जटामण्डलसंयुक्तं करोद्या (ट्या) चन्द्रशेखरम्।
नीलग्रीवासमायुक्तं शङ्खकुन्देन्दुसंनिभम्॥२७॥

अपरे चार्पयेद्वृक्षः नानासर्पविभूषितः।
हृन्मालाकर्णमालाद्यादूर्वावक्षोविराजितम्॥२८॥

वटवृक्षं समाश्रित्य ऋषिभिः सेवितं पदम्।
योगमूर्तिरिति ख्यातं सर्वपापहरं परम्।।२९।।

एवं (चा) नेकभेदेन दक्षिणामूर्तिलक्षणम्।।३०।।

(इत्यंशुमद्भेदे) काश्यपशिल्पे दक्षिणामूर्तिलक्षणं नाम षटसप्ततितमः पटलः।)

।।अथ सप्तसप्ततितमः पटलः।।

अथ कक्ष्य विशेषेण कालहामूर्तिलक्षणम्
वसूनन्दं तु देशांशं वान (भाग) मानं द्विजोत्तम्।।१।।

सूत्रं भान्वङ्गुलं वाऽथ नेत्रसूत्रं मयोच्यते।
ललाटदक्षिणे सव्येतन्त्रमध्ये तथैव च।।२।।

हिक्कासूत्रं च वामे तु वामस्तनाक्षं दक्षिणे।
नाभिमध्ये तु वामे तु सूत्रान्तरं यवाष्टकम्।।३।।

मेढ्रमूलस्य मध्ये तु वामे षडङ्गुलं न्यसेत्।
स्थिताङ्घ्रिगुल्फमष्टे तु पूर्वसूत्रं प्रलम्बयेत्।।४।।

देवस्य दक्षिणं पादं पद्मापद्मोपरि स्थितम्।
प्रथमं नृत्तमूर्तिस्तु दक्षिणे स्थितपादवत्।।५।।

वामपादं धृतोधृत्य कुञ्चितं तलमुद्धृतम्।
अङ्गुष्ठमुद्धृतं चाग्रे कालस्य हृदयं न्यसेत्।।६।।

सुदृद्धिः स्यात्त्रिनेत्रं च जटामुकुटमण्डितम्।
चतुर्भुजसमायुक्तमष्टहस्तमथापि वा।।७।।

दक्षिणे पूर्वहस्तं तु शूलं खट्वाङ्गमुद्धृतम्।
दक्षिणे परहस्तं तु परशुं वरदं तथा।।८।।

वामे वूर्वकरं नाभिसीमान्तं सूच्यतो (धो) गतम्।
सूच्याग्रं पूर्वसूत्रान्तं कलाम (प) ञ्चागुलं तु वा।।९।।

कर्णशूलधरे हस्ते मणिबन्धान्तरं बुधः।
वामे तु परहस्तं तु विस्मयं परिकल्पयेत्।।१०।।

हिक्कासूत्रं समं टङ्कगकरद्वयान्तरं मुखम्।
उष्णीषान्तं समुद्धृत्य विस्मयोऽनामिकाग्रकम्।।११।।

कण्ठान्तं मणिबन्धन्तं शूल हस्ते समान्तरम्।
चतुर्देवे (र्हस्ता) ख्यमाख्यातमष्टहस्तमथ शृणु॥१२॥

शूलं परशुवज्रं च खड्गं दक्षिणहस्तके।
द्विभुजं वा द्विपादं वा सुदंष्ट्रं पादपाणिकम्॥१३॥

करण्डमुकुटोपेतं मसूर्यारास्यनिर्गमम्।
महाभव्यसमायुक्तं सपाशं हृदयं चलम्॥१४॥

विकीद्दष्टाशकं र्णके शाययेदूर्ध्ववक्त्रकम्।
कालहामूर्तिमेवं हि प्रोक्तं लिङ्गेद्भवे तथा॥१५॥

(इत्यशुमद्भेदे काश्यपशिल्पे कालहामूर्तिर्लक्षणं नाम सप्तसप्ततितमः पटलः।)

॥अथाष्टसप्ततितमः पटलः॥

अथ वक्ष्ये विशेषेण लिङ्गेद्भवमिदं शृणु।
लिङ्गाकारस्य मध्ये तु चन्द्रशेखरमूर्तिवत्॥१॥

नलका पाद (काङ्घ्रि) तलाविप्र लिङ्गगूढसमन्वितम्।
पितामहसरूपेण ऊर्ध्वाङ्गं वामपार्श्वके॥२॥

विष्णुवाहनरूपेण दक्षिणांशं तथागतम्।
विष्णुर्दक्षिणपार्श्वे तु वामपार्श्वे पितामहः॥३॥

हृदयाञ्चलिसंयुक्तौ स्थितौ तु लिङ्गमुच्यते।
रक्तश्यामहिरण्याभं लिङ्गविष्णुपितामहम्॥४॥

एवं लिङ्गेद्भवं ख्यातं वृक्षसंग्रहणे शृणु॥५॥

नामाष्टसप्ततितमः पटलः।
(इत्यंशुमद्भेदे काश्यपशिल्प लिङ्गेद्भवलक्षणं नामाष्टसप्ततितमः पटलः)।

Appendix VI

शिव तन्त्र

तत्रादौ पटलप्रारम्भः।

अथ वक्ष्ये महेशस्य मन्त्रान्सर्वार्थसिद्धिदान्।
यैः पूर्वर्षिवाक्यैश्च शिवसायुज्यमञ्जसा॥३॥

अथ शिवपञ्चाक्षरीमन्त्रप्रयोगः।
मन्त्रो यथा (शारदातिलके) ऊँ नमश्शिवाय'।
विनियोगः। अस्य श्रीशिवपञ्चाक्षरीमन्त्रस्य वामदेव ऋषिः।

पंक्तिश्छन्दः।

ईशानो देवता। ऊँ बीजाय नमः शक्तिः।

शिवायेति कीलकम्।

चतुर्विधपुरुषार्थसिद्ध्यर्थे न्यासे विनियोगः।

अथ ध्यानम्।

ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं रत्नाकल्पोज्जवलाङ्गं
परशुमृगवराभीतिहस्तं प्रसन्नम्।
पद्मासीनं समन्तात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं विश्वाद्यं विश्रवबीजं
निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम्॥१॥

ऊँ नमो भगवते सकलगुणात्मशक्तियुक्तायानन्ताय योगपीठात्मने नमः।

संविन्मयः परो देवः परामृतरसप्रिय।

अनुज्ञां शिव मे देहि परिवारार्चनाय च।
ऊँ अभीष्टसिद्धिं मे देहि शरणागतवत्सल।
भक्त्या समर्पये तुभयं प्रथमावरणार्चनम्॥१॥

इत्यावरणपूजां कृत्वा धूपादिनमस्कारान्तं सम्पूज्य जपं कुर्यात्। अस्य पुरश्ररणं
चतुर्विंशतिलक्षात्मकं जपः।

जपानते दशांशेन वा चतुर्विंशतिसहस्त्रमन्त्रैः पायसं त्रिमधुपलाशेन होमयेत्।

तत्तद्दशांशेन तपेण मार्जने कृत्वा शुद्धान् विप्रांश्र पायसादिना भोजयेत्।

एवं कृते मन्त्रः सिद्धो भवति। सिद्धे च मन्त्रे मन्त्री प्रयोगान् साधयेत। (तथा च)

तत्त्वलक्षं जपेन्मन्त्रं दीक्षितः शैववर्त्मना।
तावत्संख्यासहस्त्राणि जुहुयात्पायसैः शुभैः॥१॥

ततः सिद्धो भवेन्मन्त्रः साधकाभीष्ठसिद्धिदः।
इत्थं सम्पूजयेद्देवं सह नित्यशो जपेत्॥२॥

सर्वपापविनिर्मुक्तः प्राप्नुयाद्वाञ्छितां श्रिराम्।
त्रिसहस्त्रंजपेन्मन्त्रं दीर्घमायुरवाप्नुयात्।
दिसहस्त्रं जपेद्रोगान् मुच्यते नात्र संशयः॥३॥

सहस्त्रवृद्धया प्रजपेत्सर्वान्कामानवाप्नुयात्॥४॥

आज्यान्वितैस्तिलैः शुद्धैर्जुहुयाल्लक्षमादरात्।
उत्पातजनितान्क्लेशान्नाशयेन्नात्र संशयः।
शतलक्षं जपेत्साक्षाच्छिवो भवति मानवः॥५॥

इति शारदातिलकोक्तशिवपञ्चाक्षरमन्त्रप्रयोगः।

विनियोगः ऊँ अस्य श्रीशिवाष्टाक्षरमन्त्रस्य वामदेव ऋषिः।

पंक्तिच्छन्दः।

उमापतिर्देवता सर्वेष्टसिद्धये विनियोगः।

बन्धूकसन्निभं देवं त्रिनेत्रं चन्द्रशेखरम्।
त्रिशूलधारिणं वन्दे चारुहासं सुनिर्मलम्॥१॥

कपालधारिणं देवं वरदाभयहस्तकम्।
उमया सहितं शम्भु ध्यायेत्सोमेश्वरं सदा॥२॥

इति ध्यायेत्।

ऊँ नमो भगवते सकलगुणात्मशक्तियुक्तायानन्ताय योगपीठात्मनेनमः।

संविन्मयः परो देवः परामृतरसप्रिय।

अनुज्ञां शिव मे देहि परिवारार्चनाय च।

अभीष्टसिद्धिं मे देहि शरणागतवत्सल।
भक्त्या समपये तुभ्यं प्रथमावरणार्चनम्॥१॥

ततो भूपुरे पूर्वादिक्रमेण इन्द्रादिदशदिक्पालान् वज्राद्यायुधानि च पूजयित्वा पुष्पाञ्चलिं च दद्यात्।
इत्यावरणपूजां कृत्वा धूपादि नमस्कारान्तं सम्पूज्य जपं कुर्यात्।

अस्य पुरश्र्वरणं चतुर्दशलक्षं जपेत् तत्तद्दशांशेन होमतर्पणमार्जनब्राह्मणभोजनं च कुर्यात्।

एवं कृते मन्त्रः सिद्धो भवति भवति सिद्धे च मन्त्रे मन्त्री प्रयोगान् साधयेत्। तथा च।

मनुलक्षं जपेन्मन्त्रं तत्सहस्त्रं यथाविधि।
जुहुयान्मधुरासिक्तैरारग्वधसमिद्धरैः॥१॥

एवं यो भजते मन्त्री देवेशं तमुमापतिम्।
स भवेत्सर्वलोकानां प्रियः सौभाग्यसम्पदाम्॥२॥

इत्यष्टाक्षरशिवमन्त्रप्रयोगः।

अत त्रयक्षरमृत्युञ्जय मन्त्रप्रयोगः।

विनियोगः अस्य त्र्यक्षरात्मकमृत्युञ्जय मन्त्रस्य कहोल ऋषिः।

गायत्री छन्दः। मृत्युञ्जयो महादेवो देवता।

जूं बीजम्। सः शक्तिः।

सर्वेष्टसिद्ध्यर्थे जपे विनियोगः।

चन्द्रार्काग्निविलोचनं स्मितमुखं पद्मद्वयान्तः स्थितं
मुद्रापाशमृगाक्षसूत्रविलसत्पाणिं हिमांशुप्रभम्।
कोटीरेन्दुगलत्सुधाप्लुततनुं हारादिभूषोज्ज्वलं कान्त्या विश्वविमोहनं
पशुपतिं मृत्युञ्जयं भावयेत्॥१॥

ॐ नमो भगवते सकलगुणात्मशक्तियुक्ताय अनन्ताय योगपीठात्मने नमः।

ॐ संविन्मयः परो देवः परामृतरसप्रिय।

अनुज्ञां शिव मे देहि परिवारार्चनाय मे।

अभीष्टसिद्धिं मे देहि शरणागतवत्सल।
भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम्॥१॥

इत्यावरणपूजां कृत्वा धूपादिनमस्कारान्तं सम्पूज्य जपं कुर्यात्।

अस्य पुरश्चरणं लक्षत्रयं जपः। पुरश्चरण दशांशेन
दुग्धाज्यलोलितैरमृताखण्डै हौमः।

तत्तद्दशांशेन तर्पणमार्जन ब्राह्मणाभोजनं च कुर्यात्।

एवं कृते मन्त्रः सिद्धो भवति।

सिद्धे च मन्त्रे मन्त्री प्रयोगान् साधयेत्।

(तथाच शरदायाम्) 'गुणलक्षं जपेन्मन्त्रं तद्दशांशं विशालधीः।
जुहुयादमृताखण्डः शुद्धदुग्धाज्वलोलितः॥१॥

जपा पूजादिभिः सिद्धे मन्त्रेस्मिन्मनुना क्रमात्।
कुर्यात्प्रयोगान् कल्पोक्तानभीष्टान्फलसिद्धये॥२॥

दुग्धयुक्तैः सुधाखण्डैर्मन्त्री मासं सहस्त्रकम्।
आराधितेग्नौ जुहुयाद्विधिवद्विजितेन्द्रियः॥३॥

सन्तुष्टः शङ्करस्तेन सुधाप्लावितविग्रहः।
आयुरारोग्यसम्पत्तियशः पुत्रान्विवर्द्धयेत्॥४॥

सुधावटौ तिला दूर्वाः पयः सर्पिः पयोहविः।
इत्युक्तैः सप्तभिर्द्रव्यैर्जुहुयात्सप्तवासरम्॥५॥

क्रमाद्दशांशतो नित्यमष्टोत्तरमतन्द्रितः।
सप्ताधिकान् द्विजात्रित्यं भोजयेन्मधुरान्वितम्॥६॥

विकारानुगुणं मन्त्री वर्द्धयेद्धोमवासरान्।
होतृभ्यो दक्षिणां दद्यादरुणा गाः पयस्विनीः॥७॥

गुरुं सम्प्रीणयेत्पश्राद्धनाद्यैर्देवताधिया।
अनेंन विधिना साध्यं कृत्वा द्रोहज्वरादिभिः॥८॥

विमुक्तः सुचिरं जीवेच्छरदां शतमञ्जसा।
अभिचारे ज्वरे तीव्रे घोरोन्मादे शिरोगदे॥९॥

असाध्यरोगक्ष्वेडादौ महादाहे महामये।
होमोयं शान्तिदः प्रोक्तः सर्वसम्पत्प्रदायकः॥१०॥

द्रव्यैरेतैः प्रजुहुयात्रिजन्मसु यथाविधि।
भोजयेन्मधुरैर्भोज्यैर्ब्राह्मिणान्वेदपारगान्॥११॥

दीर्घमायुरवन्पोति वाञ्छितां विन्दति श्रियम्।
एकादशाहुतीर्नित्यं दूर्वाभिर्जुहुयाद्बुधः॥१२॥

अपमृत्युजिदेष स्यादयुरारोग्यवर्द्धनः।
त्रिजन्मसु सुधावल्लीकाश्मरीबकुलोद्भवः॥१३॥

समिद्वरैः कृतो होमः सर्वमृत्युगदापहः।
सिद्धान्नैर्विहितो होमो महाज्वरविनाशनः।
अपामार्गसमिद्धोमः सर्वामयनिषूदनः॥१४॥

इति त्र्यक्षरमृत्युञ्जयमन्त्रप्रयोगः।

अथत्र्यंबकमन्त्रप्रयोगः।

(शारदातिलके) 'अथ त्रैयम्बकं मन्त्रमभिधास्या म्यनुष्टुभम्।
यं भजन्तं नरं कालः स्वयं वीक्षितुमक्षमः॥१॥

'मन्त्रो यथाः

ॐ त्र्यम्बकं यजामहे सुगन्धिम्पुष्टिवर्धनम्।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् इति मन्त्रः।

अस्य विधानम्।

विनियोगः अस्य त्रयम्बकमन्त्रस्य वसिष्ठ ऋषिः।

अनुष्टुप् छन्दः।

त्र्यम्बकपार्वतीपतिर्देवता। त्र्यं बीजम्।

वं शक्तिः।

कं कीलकम्।

सर्वेष्टसिद्ध्यर्थे जपे विनियोगः।

हस्ताभ्यां कलशद्वयोमृतसैराप्लावयन्तं शिरो।
दूभ्यां तौ दधतं नृगाक्षवलये द्वाभयां वहन्तं परम्।

अंकन्यस्तकरद्वयामृतघटं कैलासकान्तं शिवं।
स्वच्छाम्भोजगतं नवेन्दुमुकुटं देवं त्रिनेत्रं भजे॥१॥

इति ध्यायेत्।

ॐ नमो भगवते सकलगुणात्मशक्तियुक्ताय अनन्ताय योगपीठात्मने नमः।
ॐ संविन्मयः परो देवः परामृतरसप्रिय। अनुज्ञां शिव मे देहि परिवारार्चनाय मे॥१॥

'अभीष्टसिद्धिं मे देहि शरणागतवत्सल।
भक्तया समर्पये तुभ्यं प्रथमावरणार्चनम्॥१॥

अस्य पुरश्वरणमेकलक्षजपः।
दशद्रव्यैर्दशांशतो होमः।

तत्तद्दशांशेन तर्पणमार्जनब्राह्मणभोजनं च कुर्यात्।

एवं कृते मन्त्रः सिद्धो भवति।

सिद्धे मन्त्रे मन्त्री प्रयोगान् साधयेत्।

तथा च 'जपेन्मन्त्रमिमं लक्षमेवं ध्यायञ्जितेन्द्रियः।

जुहुयाद्दशभिर्द्रव्यैरयुतं घृतसंप्लुतैः॥१॥

बिल्वं पलाशं खदिरं परं च तिलसर्षपौ।
दुग्धं दधि पुनर्दूर्वा होमे तानि विदुर्बुधाः॥२॥

एवंकृते प्रयोगार्हो जायतेऽयं महामनुः।
अयुतं जुहुया द्बिल्वसमिद्भिः सम्पदे सुधीः॥३॥

जुहुयाद्ब्रह्मवृक्षस्य समिद्भिर्ब्रह्मतेजसे।
खादिरैरयुतं हुत्वा कान्तिं पुष्टिमवाप्नुयात्॥४॥

वटवृक्षस्य समिधो जुहुयादयुतावधि।
धनधान्यसमृधाद्धः स्यादचिरेणैव साधक॥५॥

तिलैस्तत्संख्यया हुत्वा सर्वपापैः प्रमुच्यते।
सिद्धार्थैरयुतंहुत्वा शत्रून्विजयते नृपः॥६॥

अनेनैव विधानेन नश्येन्मृत्युरकालजः।
पायसेन कृतो होमो रक्षाश्रीकीर्ति कान्तिदः॥७॥

गोदुग्धेन च शुद्धान्नं हुत्वाकृत्या विनाशयेत्।
अयमेव मतो होमः शान्विश्रीसम्पदावहः॥८॥

दधिहोमेन सम्वादं कुर्याद्विद्वेषिणोर्मिथः।
प्रत्यहं जुहुयान्मन्त्री दूवाअष्टोत्तरं शतम्॥९॥

आमयान्निखिलाञ्जित्वा दीघमायुरवाप्नुयात्।
जुहुयाज्जम्बुकाष्टेनपायसान्नैर्घृतान्वितैः॥१०॥

इच्छन्ननिन्दितां लक्ष्मीमारोग्यमतुलं यशः।
गव्यदुग्धधृताक्ताभिर्दूर्वाभिर्जुहुयाद्वशी॥११॥

स विंशतिशतं सम्यक् स्वजन्मदिवसे सुधीः।
आमयैः सकलैर्मुक्तो जीवद्वर्षशतं सुधीः॥१२॥

काश्मरीसमिधस्तिस्रः पयोन्नं त्रिशतं पृथक्।
जुहुयात्ब्राह्मणानन्ते भोजयेन्मधुरान्वितम्॥१३॥

प्रीणयेद्धनधान्याद्यैरात्मनो गुरुमादरात्।
हुत्वा पर्वाणि मन्त्रिणे।
अनामयमवाप्नोति दीर्घमायुः श्रिया सह॥१४॥

सघृतेन पयोन्नेन हुत्वा पर्वाणि मन्त्रिणे।
राजश्रियमवाप्नोति षण्मासान्नात्र संशयः॥१५॥

लाजैर्विशुद्धैर्जुहुयात्कन्या हैषा वराप्तये।
क्षीरद्रुमसमिद्धोमाद्ब्राह्मणादीन्वशं नयेत्॥१६॥

स्नात्वा सहस्त्रं प्रजपेदादित्याभिमुखो मनुम्।

आधिव्याधिविनिर्मुक्तो दीर्घमायुरवाप्नुयात्।
अनेन मनुना सर्व साधयेदिष्टमात्मनः।

इति त्र्यम्बकमन्त्रप्रयोगः।

अथ महामृत्युञ्जय मन्त्रप्रयोगः।

(मन्त्रमहोदधो) महामृत्युञ्जयं वक्ष्ये दुरितापन्निवारणम्।
यं प्राप्य भार्गवः शम्भोर्मृतान् दैत्यानजीवयन्॥१॥

मन्त्रो यथाः।

अथ विधानम्।

देशकालौ संकीर्त्य मम शरीरे ज्वराद्यमुकरोगनिरासद्वारा सद्यः आरोग्यार्थममुक-कामनासिद्ध्यर्थं वा श्रीमहामृत्युञ्जयदेवता प्रीत्यर्थममुकासंख्यापरिमितश्रीमहामृत्युञ्जयजपं करिष्ये।

इति संकल्प्य।

ऊँ गुरवे नमः॥१॥

ऊँ गणपतये नमः॥२॥

ऊँ स्वेष्टदेवतायै नमः॥३॥

इति नत्वा न्यासादिकं कुर्यात्।

विनियोगः ऊँ अस्य श्रीमहामृत्युञ्जयमन्त्रस्य वामदेवकहोलवसिष्ठा ऋषयः।

पंक्तिगायत्र्यनुष्टुभश्छन्दान्सि।

सदाशिवमहामृत्युञ्जयरुद्रा देवताः।

श्री बीजम्। ह्रीं शक्तिः।

महामृत्युञ्जयप्रीतये विनियोगः।

अथ ध्यानम्। 'हस्ताम्भोजयुगस्थकुम्भयुगलादुद्धृत्य तोयं शिरः सिञ्जन्तः करयोर्युगेन दधतं स्वांके सकुम्भौ करौ।

अक्षस्त्रङ्मृगहस्तमम्बुजगतां मूर्धस्थचन्द्रस्त्रवत्पीयूषोन्नतनुं भजे सगिरिजं मृत्युञ्जयं त्र्यम्बकम्।

ऊँ नमो भगवते सकलगुणात्मशक्तियुताय अनन्ताय योगपीठात्मने नमः।

संविन्मयः परो देवः परामृतरसप्रियः अनुज्ञां शिव मे देहि परिवारार्चनाय मे।

अभीष्टसिद्धिं मे देहि शरणागतवत्सल।
भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम्।।१।।

ऊँ मृत्युञ्जय महारुद्र त्राहि मां शरणागतम्।
जन्ममृत्युजरारोगैः पीडितं कर्मबन्धनैः।।१।।

तावकस्त्वद् गतप्राणस्त्वच्चित्तोहं सदा मृड।
इति विज्ञाप्य देवेशं जपेन्मृत्युञ्जयं परम्।।२।।

अस्य पुरश्चरणमेकलक्षजपः।

जपान्ते दशांशतो दशद्रव्यैर्होमः।
होमदशांशेन मन्त्रान्ते मृत्युञ्जयं तर्पयामीत्युक्त्वा दुग्धमिश्रित जलेन तर्पयेत्।

ततस्तर्पणदशांशेन मन्त्रान्ते आत्मानमभिषिञ्चामि नमः।

इति यजमानमूर्द्धन्यभिषेकः होमतर्पणाभिषेकः होमतर्पणाभिषेकाशक्तौ तत्स्थाने तत्त-द्विगुणो जपः कार्यः। ततोभिषेकदशांशतोष्टोत्तरशतसंख्यातो वा ब्राह्मणभोजनं कुर्यात्।

एवं कृते मन्त्रः सिद्धो भवति।

सिद्धे च मन्त्रे मन्त्री प्रयोगान् साधयेत्।

तथा च।

जपेन्मन्त्रमिमं लक्षमेवं ध्यायञ्जितेन्द्रियः।
दशद्रव्यैः प्रजुहुयात्तानि बिल्वफलं तिलाः।।१।।

पायसं सर्षपादुग्धं दधि दूर्वा च सप्तमी।
वटात्पलाशात्खदिरात्समिधो मधुरप्लुताः।।२।।

एवंकृते प्रयोगार्हो जायतेयं महामनुः।
जन्मभेदशमे तस्मात्पुनश्चेकोनविंशके।।३।।

जुहुयाद्यः सुधावल्याः समिधश्चतुरंगुलाः।
स रोगान् सकलाञ्शत्रून् पराभूय श्रियायुतः।।४।।

श्रीफलोत्थाभिर्होमः सम्पत्तिसिद्धये।
समिद्भिः श्रीफलोत्थाभिर्होमः सम्पत्तिसिद्धये।।५।।

पलाशतरुचाभिस्तु ब्रह्मगवार्चससिद्धये।
वटोत्थाभिर्धनप्राप्त्यै खादिरीभिस्तु कान्तये।।६।।

तिलैरधर्मनाशाय सर्षपैः शत्रुनष्टये।
पायसेन कृतो होमः कान्ति श्रीकीर्तिदायकः।।७।।

कृत्वा मृत्युक्षयारोग्युं दध्ना सम्वादसिद्धिदः।
होमसंख्या तु सर्वत्रायुतमानेन कीर्तिता।।८।।

अष्टोत्तरशतं दूर्वात्रिकहोमाद्रुजां क्षयः।
स्वजन्मदिवसे यस्तु पायसैर्मधुरान्वितैः।।६।।

जुहोति तस्य वर्द्धते कुलमारोग्यकीर्तयः।
गुडूचीबकुलोत्थाभिः समिद्भिर्हवनं नृणाम्।।१०।।

जन्मतापत्रयं रोगायू मृत्युं चापि विनाशयेत्।
प्रत्यहं जुहुयाद्दूर्वा अपमृत्युविनष्टये।।११।।

किं बहूक्तेन सर्वेष्टं प्रयच्छति शिवो नृणाम्।

अपामार्गसमिद्भिश्च सिद्धान्नैर्ज्वरनष्टये।

दुग्धाक्तैरमृताखण्डैर्मासं होमोखिलाप्तये।

इति महामृत्युञ्ज्यमन्त्रप्रयोगः।

अथ दशाक्षररुद्रमन्त्रविधानम्।

विनियोगः अस्य श्रीरुद्रमन्त्रस्य बौधायन ऋषिः।

पंक्तिश्छन्दः। रुद्रो देवता।

ममाभीष्टसिद्ध्यर्थे जपे विनियोगः।

एवं यं संपुटं कुर्यात्स स्यात्किल्बिषवर्जितः।

तं दीप्यमानमोक्षन्ते प्रेतचौराद्युपद्रवाः।

न पराभवितुं शक्ताः पलायन्ते विदूरतः।

ऊँ हिरण्यगर्भः समवर्तताग्रेभतस्यजातः पतिरेक आसीत्।

सदाधारपृथिवींद्यामुतेमाङ्कस्मैदेवायहविषाविधेम।।१।।

यः प्राणतों॥२॥

ब्रह्मयज्ञानम्प्रथमम्पुरस्ताद्विसीमतः सुरुचोवेनऽआवः।

सुबध्न्याउपमाअस्यव्विष्टाः सतश्चयोनिमसतश्चविवः॥३॥

महीद्यौः पृथिवीचन इमंयज्ञम्मिमिक्षताम्।

पिपृतान्नोभरीमभिः॥५॥

उपश्वाय ५ । अग्नेनयं ६ ।

यातेअग्नें ७ । इमंयमः ८ ।

अथ ध्यानम्। कैलासाचलसन्निभं त्रिनयनं पञ्चास्यमम्बायुतं
नीलग्रीवमहीशभूषणधरं व्याघ्रत्वचा प्रावृतम।
अक्षस्त्रग्वरकुण्डिकाभयकरं चान्द्रीं कलां बिभ्रतं गङ्गाम्भोविलसज्जटं
दशभुजं वन्दे महेशं परम्॥१॥

इति ध्यात्वा लिङ्गत्तोभद्रमण्डले सर्वतोभद्रमण्डले वा स्वेस्वे स्थाने मण्डूकादिपर-तत्त्वान्तपीठदेवता आवाह्य ॐ मं मण्डूकादिपरतत्त्वान्तपीठदेवताभ्यो नमः इति पीठदेवताः सम्पूज्य पीठशक्तीः पूजयेत्। तत्र क्रमः।

ॐ संविन्मयः परा देव परामृतरसप्रिय।
अनुज्ञां रुद्र मे देहि परिवारार्चनाय मे॥१॥

ॐ अभीष्टसिद्धिं मे देहि शरणगतवत्सल।

भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम्।

ॐ नमो विरञ्चिविष्णवीशभेदन परमात्मने।
सर्गसंस्थितिसंहारव्यापृतव्यक्तमूर्तये॥१॥

नमश्चतुर्धाप्रोद्भूतभूतभीतात्मनो भुवः।
भूरिभारार्तिसंहर्त्रे भूतनाथाय शूलिने॥२॥

विश्वग्रासाय विकसत्कालकूटविशाषिने।
तत्कालाङ्कङ्कितग्रीवनीलकण्ठाय ते नमः॥३॥

नमो ललाटनयनप्रोल्लसत्कृष्णवर्त्मने।
ध्वस्तस्मरनिरस्ताधियोगिध्यताय शम्भवे॥४॥

नमो देहार्द्धकान्ताय दग्धदक्षाध्वराय च।
चतुर्वर्गेष्ट सिध्यर्थदायिने मायिनेणेव॥५॥

स्थूलाय मूलभूताय शूलवारितविद्विषे।
कालहन्त्रे नमश्चन्द्रखण्डमण्डितमौलये॥६॥

दिग्वाससे कपर्दान्तर्भ्रान्ताहिशरदिन्दवे।
देवदैत्योरगेन्द्रादिमौलिघृष्टांघ्रये नमः॥७॥

भस्मासक्ताय भक्ताय भुक्तिमुक्तिप्रदायिने।
सकृद्व्यक्तस्वरूपाय शङ्कराय नमोनमः॥८॥

नमोन्धकान्तकरिपवेऽसुरद्विषे नमोस्तु ते द्विरदवरावभेदिने।

विषोल्लसत्फणिकुलबद्धमूर्तये नमः सदा वृषवरवाहनाय ते॥९॥

वियनमरुगुतवहवायुकुम्भिनीमखेशरव्यमृतमयूखमूर्तये।
नमः सदा नरकायावभेदिने भवेह नो भव भयभङ्ग कृद्विभो॥१०॥

इति रुद्रस्तवेन स्तुत्वा साष्टाङ्गं प्रणम्य जपं कुर्यात्।

अस्य पुरश्चरणं दशलक्षजपः। अयुतहोमः।

तत्तद्दशांशेन तर्पणमार्जनब्राह्मणभोजनं च कुर्यात्।

एवं कृते मन्त्रः सिद्धो भवति। सिद्धे मन्त्रे मन्त्री प्रयोगान् साधयेत्।

'प्रयोगान् पूर्वमन्त्रोक्तन्। कुर्वीतात्र दशाक्षरे।
दशाक्षरं भजन् विप्रो रुद्रजापी भवेत्सदा॥१॥

एवमर्चन्महादेव पञ्चङ्गन्यासपूर्वकम्।
दशाक्षरजपासक्तो न सीदेत्स्वेष्टसाधने॥२॥

मनोहराणि गेहानि सुन्दर्यो वामलोचनाः।
धनमिच्छापूरणान्तं लभते शिवसेवनात्॥३॥

इति मन्त्र महोदधिशान्तिसारादिप्रोक्तं दशाक्षररुद्रमन्त्रविधानम्।

अथ त्वरितरुद्रमन्त्रपुरश्चरणप्रयोगः।

यो रुद्रोग्नौयोप्सुयऔषधीषुयोरुद्रोविश्वाभुवनाविवेश तस्मैरुद्रायनमोस्तु'
इत्येकत्रिंशदक्षरो मन्त्रः।

अस्य विधानम्।

विनियोगः अस्य त्वरितरुद्रमन्त्रस्य अथर्वणऋषिः।

अनुष्टुछन्दः। त्वरितरुद्रसंज्ञको देवता।

नमः इति बीजम्। अस्तु इति शक्तिः।

त्वरितरुद्रप्रीत्यर्थे जपे विनियोगः।

एषतेरुद्रभागःसहस्सहस्त्राम्बिकयातंजुषस्व स्वाहा।

अथ ध्यानम्।

रुद्रं चतुर्भुजं देवं त्रिनेत्रं वरदाभयम्।
दधानमूर्ध्व हस्ताभ्यां शूलं डमरुमेव च॥१॥

अङ्कसंस्थामुमां पद्मे दधानं च करद्वये।
आद्ये करद्धये कुम्भं मातुलुङ्गं च बिभ्रतम्॥२॥

इति ध्यात्वा मानसौपचारैः सम्पूज्य भेदपक्षे शिवे पीठे गन्धादिपूजनं कृत्वा अधः शाय्येकभक्ताशो जपं कुर्यात्।

अस्य पुरश्ररण विंशातिसहस्त्रजपः।

तत्तद्दशांशेन होमतर्पणमार्जनब्राह्मणभोजनं च कुर्यात्।

एवं कृते मन्त्रः सिद्धो भवति। सिद्धे च मन्त्रे मन्त्री प्रयोगान् साधयेत्।

तथा च।

अधःशाय्येकभक्ताशी ब्रह्मचारी हविष्यभुक्।
अयुते दू जपेत्सर्वं प्रत्यहं पूजयेच्छिवम्॥१॥

जुहुयात्तद्दशांशेन तद्दशांशेन तर्पणाम्।
मार्जनं तद्दशांशेन तद्दशांशेन भोजयेत्॥२॥

जपेत्त्वरितरुद्रं तु सर्वकामसमृद्धये।
श्रीकामः शान्तिकामो वा जपेल्लक्षमतन्द्रितः॥४॥

बिल्वसमिद्धिः श्रीकामः शान्तिकामः शमीमयैः।
जुहुयादाज्यसम्मिश्रैस्तर्पणं मार्जनं ततः॥५॥

जपत्वा लक्षं सुपुत्रार्थी पायसं जहुयात्ततः।
वित्तार्थीश्रीफलैर्होममायुष्कामस्तु दूर्वया॥६॥

तिलेराज्येन सम्मिश्रैस्तेजस्कामो घृतेन वै।
व्रीहिभिः पशुकामस्तु राष्ट्रकामस्तु वै यवैः॥७॥

पायसं सर्वकामेन होतव्यं शर्करान्वितम्।
मध्वक्तान्याम्रपत्राणि तीव्रज्वरविनाशिना॥८॥

हिमभूतज्वरार्थं तु गुडूचीभिर्हुनेद् ध्रुवम्।
एवं कृते सिद्धिः स्यात्फलार्थं तु ततो जपेत्।
पुरश्चरणमेवं तु कृत्वा सम्पूज्य शङ्करम्॥३॥

सर्वरोगविनाशाय सूर्यस्याभिमुखो जपेत्॥९॥

अयुते द्वे जपाहोमः कार्योर्कसमिधा शुभः।
औदुम्बरैरन्नकामस्तेजस्कामस्तु बादरैः॥१०॥

अपामार्गसमिद्धोमाद्भूतबाधा विनश्यति।
ग्रहबाधाविनाशाय जपेदश्वत्थसन्निधौः॥११॥

लवणान्वितदध्याक्तस्तीक्ष्णाग्राश्वत्थसम्भवाः।
हूयन्ते समिधः शुष्काः स्वाहान्तं मन्त्रमुच्चरेत्॥१२॥

दशापञ्चाहुतीर्हुत्वा गच्छगच्छेत्युदीरयेत्।
यावद्धोमो बलिर्देयः पुरुषाहारसम्मितः॥१३॥

एवं कृते प्रमुच्येत पुमान् स्त्री वा महाग्रहात्।
जुहुयाच्छतपत्राणि संहृष्टो जयमाप्नुयात्॥१४॥

लाजाहोमेन कन्यार्थी कन्यां प्राप्नोति रूपिणीम्।
लाजाश्च मधुसम्मिश्राः श्वेतपुष्पाणि वा पुनः॥१५॥

हूयन्ते हरिते देशे तस्य विश्वं वशे भवेत्।
वामाङ्गमुत्तमं कार्य स्त्रीवशित्वे विचक्षणैः॥१६॥

हस्त्यश्वामात्यशान्त्यर्थं तिलैश्चाज्येन संयुतैः।
होमस्थाने तु संस्थाप्य कुम्भमेकं जलान्वितम्॥१७॥

मन्त्रं जप्त्वा सहस्त्रं तु कुम्भं स्पृश्य प्रयत्नतः।
अभिषेकं तु तेषां वै शालां प्रोक्ष्य प्रदक्षिणम्॥१८॥

ग्रहग्रामादिशान्तिस्तु सर्वैः कार्या तु पूर्ववत्।
वास्तुपूजा प्रकर्तव्या प्राच्यां दिशि पदे शुभे॥१९॥

ईशानाय बलिः कायेः पशूनां पतये तथा।
एवं कृते पशूनां तु प्रजानां शान्तिमाप्नुयात्॥२०॥

अद्भुतेषु च सर्वेषु पशूनां ग्रामबाह्यतः।
उपविश्य जपेद्रुद्रं त्वरितं बहुभिः सह॥२१॥

होमः पलाशासमिधाः कर्तव्यो घृतसंयुजाः।
ईशानाय बलिः कार्यो यस्यां दिशि तद् भुतम्॥२२॥

तदाशापतये चैवं पशूनां पतये तथा।
ब्वृष्टिकामो जपेल्लक्षं तिलैर्होमो घृतान्वितैः॥२३॥

बलिपूजा प्रकर्तव्या शिवस्य वरुणस्य च।
सर्वस्मिन्नपि चैवार्थे त्वरितस्य जपो भवेत्॥२४॥

अयुतद्वयजाप्यैस्तु यावल्लक्षं ततोधिकम्।
एवं कृते तु सिद्धिः स्यान्निष्कामः प्राप्नुयाच्छिवम्॥२५॥

ऐहिकामुष्मिकानभोगान्भुक्त्वा सायुज्यमाप्नुयात्।

इत्येकत्रिंशदक्षरत्वरितरुद्रमन्त्रपुरश्वरणम्।

अथ दक्षिणामूर्तिमन्त्रप्रयोगः।

अथ वक्ष्ये मन्त्ररत्नं समस्तपुरुषार्थदम्।
अवापुर्ये जप्तेन दिव्य ज्ञानं मुनीश्वरा॥१॥

तत्रोदौ षट्त्रिंशदक्षरमन्त्रप्रयोगः (शारदातिलके) मन्त्रो यथा।

ॐ ह्रीं दक्षिणामूर्तये तुभ्यं वटमूलनिवासिने।

ध्यानैकनिरताङ्गाय नमो रुद्राय शम्भवे ह्रीं ॐ इति षट्त्रिंशदक्षरमन्त्रः।

विनियोगः अस्य दक्षिणामूर्तिमन्त्रस्य शुकऋषिः।

अनुष्टुप् छन्दः। दक्षिणामूर्तिशम्भुदेवता चतुर्विधपुरुषार्थ सिद्धये जपे विनियोगः।

अथ ध्यानम्:

हिमाचलतटे रम्ये सिद्धकिन्नरसेविते।
विविधदुमशाखाभिः सर्वतो वारितातपे॥१॥

सुपुष्पितैर्लताजालैराशिलष्टकुसुमद्रुमैः।
शिलाविवरनिर्गच्छन्निर्झरानितसेविते॥२॥

गायद्भृङ्गाङ्गनासंघे नृत्यद्बर्हिकदम्बके।
कूजत्कोकिलसङ्घेन मुखरीकृतदिङ्मखे॥३॥

परस्परविनिर्मुक्तमात्सर्यमृगसेविते
आद्यैः शुकाद्यैर्मुनिभिरजस्रं समधिष्टिते॥४॥

पुरन्दरमुखैर्देवैः सेवायातैर्विलोकितम्।
वटवृक्षं महोच्छायं पद्मरागफलोज्ज्वलम्॥५॥

गारुत्मतमयैः पत्रैर्निबिडैरुपशोभितम्।
नवरत्नमयाकल्पैर्लम्बमानैरलंकृतम्॥६॥

सजलैः स्थलजैः पुष्पैरामोदिभिरलंकृतम्।
श्रृण्वद्भिर्वेदशास्त्राणि शुकबृन्दैर्निषेवितम्॥७॥

संसारतापविच्छेदकुशलच्छायमद्भुतम्।
विचिन्त्य तस्य मूलस्थे रत्नसिंहासने शुभे॥८॥

आसीनममिताकल्पं शरच्चन्द्रनिभाननम्।
स्तूयमानं मुनिगणैर्दिव्यज्ञानाभिलाषिभिः॥९॥

संस्मरेज्जगतामाद्यं दक्षिणामूर्तिमव्ययम्॥१०॥

कैलासाद्रिनिभं शशाङ्कशकलस्फूर्जज्जटामण्डितं।

नासालोकनतत्परं त्रिनयनं वीरासनाध्यासितम्।

मुद्राटङ्ककुरङ्गजानुविलसत्पाणिं प्रसन्नाननं
कक्षाबद्धभुजङ्गम मुनिवृतं वन्दे महेशं परम्॥११॥

इति ध्यात्वा शिवपञ्चाक्षरोदिते पीठे पीठपूजां विधाय तामेव आवरणपूजां च कृत्वा जपं कुर्यात्।

अस्य पुरश्चरणमयुतद्वयाधिकं त्रिलक्षं जपः।
तथा च। अयुतद्वयसंयुक्तं गुणलक्षं जपेन्मनुम्।
तद्दशांशं तिलैः शुद्धैर्जुहुयात्क्षीरसंयुतैः॥१॥

पञ्चाक्षरोदिते पीठे विधानेन प्रपूजयेत्।
उपचारैः समुत्पन्नैः पाद्याद्यैः परमेश्वरम्॥३॥

नित्यं सहस्रमष्टार्द्धं परं विन्दति वाङ्मयम्।
त्रिवारं जप्तमेतेन मनुना सलिलं पिबेत्॥४॥

नित्यशोदक्षिणामूर्ति ध्यायन्साधकसत्तमः।
शास्त्रव्याख्यानसामर्थ्यं लभते वत्सरान्तरे॥५॥

ब्राह्मीसैन्ध्वसिद्धार्थवचाकोष्टपणोत्पलैः।
सुगन्धिसंयुतः कल्कैः श्रृतं ब्राह्मीरसे घृतम्॥६॥

मनुनानेन सञ्जप्तमयुतं साधु साधितम्।
निपीतं कविताकान्तिरक्षायुः श्रोघृतिप्रदम्॥८॥

इति षट् त्रिंशदक्षरदक्षिणामूर्तिमन्त्रप्रयोगः।

अथ द्वाविंशत्यक्षरदक्षिणामूर्तिमन्त्रप्रयोगः।

'ऊँ नमो भगवते दक्षिणामूर्त्तये मह्यं मेधां प्रयच्छ स्वाहा।' इतिद्वाविंशत्यक्षरो मन्त्रः।

विनियोगः

अस्य दक्षिणामूतिंमन्त्रस्य चतुर्मुख ऋषिः।

गायत्री छन्दः।

वेदव्याख्यानतत्परदक्षिणामूर्तिर्देवता।

सर्वेष्टसिद्धये जपे विनियोगः।

इति न्यासविधिं कृत्वा पूर्ववत् वटमूलस्थं मन्त्रदैवतं सञ्चित्यध्यायेन्त्।

सफटिकरजतवर्णं मौक्तकीमक्षमालाममृतकलशविद्यज्ञानमुद्राः करग्रैः।

दधतमुरगकक्षं चन्द्रचूडं त्रिनेत्रं विधृतविविभूषं दक्षिणामूर्तिमीडे॥१॥

इत्यावरणपूजां कृत्वा धूपादिनीराजनान्तं सम्पूज्य जपं कुर्यात् अस्य पुरश्चरणं लक्षात्मको जपः।

तथा च।

लक्षमेकं जपेन्मत्रं ब्रह्मचारि व्रते स्थितेः।

जुहुयात्सधृतैः पद्मौर्दशांशं संस्कृतेऽनले॥१॥

इत्थं पूजादिभिः सिद्धे मन्त्रेस्मिन्साधकोत्तमः।
वल्लभो जायते वाचां वाचस्पतिरिवापरः॥२॥

मन्त्रेणानेन सञ्जप्तैर्विशुद्धैः सलिलैः सुधीः।
अभिषिञ्चेत्स्वशिरसि श्रियमारोग्यमाप्नुयात्॥३॥

कण्ठमात्रे जले स्थित्वा जपेन्मन्त्रं सहस्त्रकम्।
प्रत्यहं मण्डलादर्वाक्कवीनामग्रणीर्भवेत्॥४॥

गौर्या पार्श्वस्थया सार्द्धं श्रीकामी चिन्तयन्विभुम्।
अयुतं प्रजपेन्मन्त्रं भूयसीं श्रियमाप्नुयात्॥५॥

भुञ्चानः प्रयतो मन्त्री गोमूत्रे श्रृतमोदनम्।
भिक्षान्नमथ वा मन्त्रमयुतद्वितयं जपेत्॥६॥

अश्रुतान्वे दशास्त्रादीन् व्याचष्टे नात्र संशयः।

सिद्धगन्धर्वमुनिभियोगीन्द्रैरपि सेविते॥७॥

ज्ञानवागर्थिनां प्रीत्यै कथितौ मन्त्रनायकौ।

इति द्वाविंशत्यक्षरदक्षिणामूर्तिमन्त्रप्रयोगः।

अथ पार्थिवलिङ्गविधानम्।

(मन्त्रमहोदधौ) अथ प्रातःकृत्य-क्रिया।

नद्यादौ स्नात्वा स्वासने प्राङमुख उदङ्मुखो वोपविश्य आचम्य प्राणानायम्य।

देशकालौ संकीर्त्य मम श्रीमहादेवप्रसन्नार्थममुककामनायं वा अमुकसंख्यापरिमित-पार्थिवलिङ्गपूजनं करिष्ये।

हृदयादिषडङ्गन्यासः ॐ ह्लां पृथिव्यै नमः हृदयाय नमः॥१॥

ॐ ह्लां पृथिव्यै नमः शिरसे स्वाहा॥२॥

ॐ ह्लां पृथिव्यै नमः शिखायै वषट्॥३॥

ॐ ह्लां पृथिव्यै नमः कवचाय हुं॥४॥

ॐ ह्लां पृथिव्यै नमः नेत्रत्रयाय वौषट्॥५॥

ॐ ह्लां पृथिव्यै नमः अस्त्राय फट्॥६॥

इति हृदयादिषडङ्गन्यासः।
एवमेव करन्यासं कुर्यात्।

ततो मृदमानीय शर्करा बहिष्कृत्य शुद्धपात्रे निधाय 'वं' इति सुधाबीजेन मृदमासिंच्य पिण्डं कृत्वाग्रे संस्थाप्य तस्मादल्पमृदं गृहीत्वा 'ॐ ह्लीं गं ग्लौं गणपतये ग्लौं गं ह्लीं' इति मन्त्रेण बालगणेश्वरं कृत्वा पीठे संस्थाप्य लिङ्गं कुर्यात्।

तद्यथा।

'ॐ नमो हराय' इति मन्त्रेण बिभीतकफलमात्रमृदं गृहीत्वा' 'ॐ नमो महेश्वराय' इति मन्त्रेण अंगुष्ठमानादधिकं वितस्तितमात्रावधि यथेष्टं लिङ्गं कृत्वा 'ॐ नमः शूलपाणये' इति मन्त्रेण पीठे लिङ्गं स्थापयेत्।

एवं यथासंख्यं लिङ्गं कृत्वा अवशिष्टमृदा ॐ ऐं हुं क्षुं क्लीं कुमाराय नमः इति मन्त्रेण कुमारं कृत्वा लिङ्गपक्त्यन्ते संस्थाप्य प्रतिष्ठां च कुर्यात्।

ततः ॐ नमः पिनाकिने इहागच्छ इह तिष्ट इति लिङ्गे शिवामावाह्य ध्यायेत्।

अथ ध्यानम्।

दक्षाङ्कस्थं गजपतिमुस्वं प्रामृशन्दक्षदोष्णा वामोरुस्थं नगपतनयाङ्के गुहं चापरेण।

इष्टाभीती परकरयुगे धारयन्निन्दुकान्तिमव्यादस्मांस्त्रिभुवननतो नीलकण्ठ-स्त्रिनेत्रः॥१॥

इति ध्यात्वा मानसोपचारैः सम्पूज्य पाद्यादिपूजनं कुर्यात्।
तद्यथा। ॐ नमः पशुपतये इति मन्त्रेण स्नापयित्वा शतरुद्रियमन्त्रण अभिषेकं कुर्यात्।

ततः ऊँ नमः शिवाय' इति मन्त्रेण गन्धपुष्पधूपदीपनैवेद्यान्यर्पयेत्।

इति पूजां कृत्वावरणपूजां कुर्यात्।

तद्यथा। पूर्वादिवामावर्तेन।

इत्यद्यौ मूर्तीः सम्पूज्य पूर्वादिक्रमेण इन्द्रादिदशदिक्पालान् वज्राद्यायुधानि च पूजयेत्। इत्यावरणपूजां कृत्वा धूपादिनमस्कारान्तं सम्पूज्य तिस्त्रः प्रदक्षिणाः कृत्वा स्तुतिपाठेन स्तुत्वा 'ऊँ नमश्शिवाय' इति षडक्षरं यथाशक्ति जपित्वा ऊँ नमो महादेवेति मन्त्रेण विसृजेत्।

ततो गणेशगुहौ स्वस्त्रमन्त्राभ्यामेवाखिलोपचारैः सम्पूज्य विसृजेत्।

तथाच। पूजयेत्कार्यवशतो लक्षावधि सहस्त्रतः।
लक्षपार्थिवलिङ्गानां पूजनाद्भुवि मुक्तिभाक्॥१॥

लक्षं तु गुडलिङ्गानां पूजनात्पार्थिवो भवेत्।
या नारी गुडलिङ्गानि सहस्त्रं पूजयेत्सती॥२॥

भर्तुः सुखमखण्डं सा प्राप्नोति पार्वती भवेत्।
नवनीतस्य लिङ्गानि सम्पूज्येष्ठमवान्पुयात्॥३॥

भस्मनो गोमयस्यापि वालुकायास्तथा फलम्।
क्रीडन्ति पृथुका भूमौ कृत्वा लिङ्गं रजोमयम्॥४॥

पूजयन्ति विनोदेन तेपि स्युः क्षितिनायकाः।
प्रातर्गोमयलिङ्गानि नित्यं यस्त्रीणि पूजयेत्॥५॥

बृहतीबिल्वयोः पत्रैर्नैवेद्यं गुडमर्पयेत्।
एवं मासत्रयं कुर्वन्ननल्पं लभते धनम्॥६॥

एकादशैव लिङ्गानि गोमयोत्थानि यो यजेत्।
प्रातर्मध्याह्नयोः सायं निशीथे प्रतिवासरम्॥७॥

स सर्वाः सम्पदो यायात् षणमासदेवमाचरन्।
एकादश यजेन्नित्यं शालिपिष्टमयानि सः॥८॥

लिङ्गानि मासमात्रेण स कल्मषचयं दहेत्।
स्फाटिकं पूजितं लिङ्गमेनोनिकरनाशनः॥९॥

सर्वकामप्रदं पुंसामुदुम्बरसमुद्भवम्।
रेवाश्मजं सर्वसिद्धिप्रदं दुःखविनाशनम्॥१०॥

यथाकथञ्चिल्लिङ्गस्य पूजा नित्यकृतेष्टदा।
यो यजेत्पिचुमन्दोत्थैः पत्रैर्गोमयजं शिवम्॥११॥

क्रुद्धं महेश्वरं ध्यायेत्स पराजयते रिपून्।
यो लिङ्गपूजयेन्नित्यं शिवभक्तिपरायणः॥१२॥

मेरुतुल्योपि तस्याशु पापराशिर्लयं व्रजेत्।
दोग्ध्रीणां तु गवां लक्षं यो दद्याद्वेदपाठिने॥१३॥

पार्थिवं योर्चयेल्लिङ्गं तयोर्लिङार्चको वरः।
चतुर्दश्यां तथाष्टम्यां पौर्णमास्यां विधुक्षये॥१४॥

पयसा स्नापयेलिङ्गं धरादानफलं व्रजेत्।
लिङ्गपूजनं विधायाग्रे स्तोत्रं वा शतरुद्रियम्॥१५॥

प्रजपेत्तन्मना भूत्वा शिवे स्वं विनिवेदयेत्।
यत्संख्याकं यजेल्लिङ्गं तन्मितं होममाचरेत्॥१६॥

आज्यान्वितैस्तिलैरग्नौ घृतैर्वा पायसेन वा।
शिवमन्त्रेण तस्यान्ते ब्राह्मणान् भोजयेच्छतम्॥१७॥

एवं कृते समस्तेष्टसिद्धिर्भवति निश्चितम्॥१८॥

इति पार्थिवलिङ्गपूजनविधानम्।

इति शिवपटलः समाप्तः।

अथ शिवापूजापद्धतिप्रारम्भः।

तत्रादौ मन्त्रानुष्ठानोपयोगि पूर्वकृत्यम्।

चन्द्रतारादिबलान्विते सुदिने सुमुहूर्ते तीर्थपुण्यक्षेत्रनिर्जनस्थानादावनुष्ठानयोगयभूमि परिग्रहणं कृत्वा तत्र मार्जनदहनखननसम्प्लावनादिभिः स्मृत्युक्तैः शोधनोपायैः शुद्धिं सम्पाद्य जपस्थानस्य चतुर्दिक्षु क्रोशं क्रोशदूयं वा चतुरस्त्रमाहारविहारार्थं परिकल्प्य जपस्थानभूमौ कूर्मशोधनं कुर्यात्। ततः पुरश्वरणात्प्राक तृतीयदिवसे क्षौरादिकं विधाय ततः प्रायश्चित्ताङ्गभूतविष्णुपूजाविष्णुतर्पणविष्णुश्राद्धं होमं चान्द्रायणादिव्रतं च कुर्यात्। व्रत्ताशक्तौ गोदानं द्रव्यदानं च कुर्यात्। यदि सर्वकर्मणामशक्तौ ततः प्रायश्वितताङ्गभूतपञ्चगव्यप्राशनं कुर्यात्।

तत्र मन्त्रः।

यत्त्वगस्थिगतं पापं देहे तिष्ठति मामके।
प्राशनात् पञ्चगव्यस्य दहत्यग्निरिवेन्धनम्॥१॥

मूलं पठित्वा प्रणवेन पञ्चगव्यं पिबेत्।

तद्दिने उपवासः कर्तव्यः।

अशक्तश्चेत् पयःपानं हविष्यान्नेनैकभक्तव्रतं वा कुर्यात्।

पुरश्चरम्णात्पूर्वदिने स्वदेहशुद्ध्यर्थं पुरश्चरणाधिकारप्राप्त्यर्थ चायुत गायत्रीजपं कुर्यात्। तद्यया।

देशकालौ संकीर्त्य ज्ञाताज्ञातपापक्षयार्थं
करिष्यमाणशिवपुरश्वरणाधिकारार्थममुकमन्त्र सिद्ध्यर्थ च गायत्र्यायुत
जपमहँ करिष्ये।

इति सङ्कल्प्य गायत्र्यायुतं जपेत्। ततो।
गायत्र्याचार्यर्षि विश्वामित्रं तर्पयामि॥१॥

गायत्रीछन्दस्तर्पयामि॥२॥

सवितारं देवं तर्पयामि॥३॥

इति तर्पणं कृत्वा ततस्तस्यां रात्रौ देवतोपास्ति शुभाशुभस्वप्नं च विचारयेत्। तद्यथा। स्नानादिकं कृत्वा हरिपादाम्बुजं स्मृत्वा कुशासनादिशय्यायाँ यथासुखं स्थित्वा बृषभध्वजं प्रार्थयेत्॥

तत्र मन्त्रः।

ॐ भगवन्देवदेवेश शूलभृद्वृषवाहन।
इष्टानिष्टं समाचक्ष्व मम सुप्तस्य शाश्वतः॥१॥

ॐ नमोऽजाय पिङ्गलाय महात्मने
वामाय विश्वरूपाय स्वप्नाधिपतये नमः॥२॥

स्वप्ने कथय मे तथ्यं सर्वकार्येष्वशेषतः।
क्रियासिद्धिं विधास्यामि त्वत्प्रसादान्महेश्वर॥३॥

इति तर्पणं कृत्वा ततस्तस्यां रात्रौ देवतोपास्तिं शुभाशुभस्वन्पं च विचारयेत्।
तद्यथा स्नानादिकं कृत्वा हरिपादाम्बुजं स्मृत्वा कुशासनादिशय्यायां यथासुखं
स्थित्वा बृषभध्बजं प्रार्थयेत्।

तत्र मन्त्रः।

ॐ भगवन्देवदेवेश शूलभृद्वृषवाहन।
इष्टानिष्टं समाचक्ष्व मम सुप्तस्य शाश्वतः॥१॥

ॐ नमोऽजाय त्रिनेत्राय पिङ्गलाय महात्मने।
वामाय विश्वरूपाय स्वप्नाधिपतये नमः॥२॥

स्वप्ने कथय मे तथ्यं सर्वकार्येष्वशेषतः।
क्रियासिद्धिं विधास्यामि त्वत्प्रसादान्महेश्वर॥३॥

इति मन्त्रेणाष्टोत्तरशतवारं शिवं प्रार्थ्य निद्रां कुर्यात।

ततः स्वन्पं दृष्टं निशि प्रातर्गुरुवे विनिवेदयेत्।

अथ वा स्वयं स्वन्प विचारयेत्।

इति पूर्वकृत्यम्।

अथ प्रातःकृत्यम् पुरश्चरणदिवसे श्रीमत्साधकेन्द्रः प्रातः कालात्पूर्व दण्डद्वयात्मके
ब्राह्मे मुहूर्ते चोत्थाय निद्रास्थानाद्बहिर्निर्गत्य हस्तौ पादौ प्रक्षाल्याचम्य रात्रिवस्त्रं
परित्यज्यान्यवस्त्रं परिधाय शुद्धासन उपविश्य शिरसि सहस्त्रदलपङ्कजे
कोटीन्दुप्रकाशपीठे श्रीगुरुं ध्यायेत्।

आनन्दमानन्दकरं प्रसन्नं ज्ञानस्वरूपं निजबोधरूपम्।
योगींद्रमीड्यं भवरोगवैद्यं श्रीमद्गुरुं नित्यमहं भजामि॥१॥

'प्रातःप्रभृति सायान्तं सायादि प्रातरन्ततः।
यत्करोमि जगन्नाथ तदस्तु तव पूजनम्॥१॥

इत्यनेन मन्त्रेण सर्वं गुखे विनिवेद्य तदाज्ञां गृहीत्वा शिवः प्रातः स्मरणं कुर्यात्।
शिवप्रातः समरणं यथा।

प्रातःस्मरामि भवभीतिहरं सुरेशं गङ्गाधरंवृषभवाहनमम्बिकेशम्।
खष्ट्वाङ्गशूलवरदाभयहस्तमीशं संसाररोगहरमौषधमद्वितीयम्॥१॥

विश्वेश्वरं विजितविश्वमनोभिरामं संसाररोगहरमोषधमद्वितीयम्।।२।।

प्रातर्भजामि गिरिशं गिरिजार्धयेहं सर्गस्थितिप्रलयकारणमादिदेवम्।

प्रातभजामि शिवमेकमनन्तमाद्यं वेदान्त्वेद्यमखिलं पुरुषं महान्तम्।
नामादिभेदरहितं षङ्भावशून्यं संसाररोगहरमौष धमद्वितीयम्।।३।।

प्रातःसमुत्थाय शिवं विञ्चित्य श्लोकत्रयं येऽनुदिनं पठन्ति।
ते दुःखजातं बहुजन्मसञ्चितं हित्वा पदं यान्ति तदेव शम्भौः।।४।।

इति प्रातःस्मरणं कृत्वा गुरुमन्त्रदेवतात्मनामैक्यं विभाव्य अजपाजपं गुरुं समर्पयेत्
अथाजपाजपसङ्कल्पः संक्षेपतः।

'आधारे लिङ्गनाभौ हृदयसरसिजे तालुमूले ललाटे द्वे पत्रे षोडशारे द्विदशदशदले द्वादशार्द्धे चतुष्के।
वासान्ते वालमध्ये डफकठसहिते आदियुक्ते स्वराणां हंक्षं तत्त्वार्थयुक्तं सकलदलगतं वर्णरूपं नमामि।।१।।

षट्शतं तु गणेशस्य षट्सहस्त्रं प्रजापतेः। षट्सहस्त्रं गदापाणेः षट्सहस्त्रं पिनाकि नः
आत्मनः तत्सहस्त्रं च सहस्त्रं परमात्मन।।
श्रीगुरुभ्यश्श्व ह्येतानि विनियोजयेत्।।३।।

हंसो गणेशो विधिरेव हंसो हंसो हरिर्हंसमयश्व शम्भुः।
हंसोपि जीव परमात्महंसो हंसो गुरुर्हंसमयश्व शम्भुः।।४।।

इति पठित्वा अहोरात्रोच्चरितं षट्शताधिकमेकविंशतिसहस्त्रमुछ्वासनिःश्वासात्मकमजपा गायत्रीमन्त्रजपं श्रीगणेशब्रह्मविष्णुरुद्रजीवात्मपरमात्म-श्रीगुरुभ्यो यथासंख्यं समर्पयामि।

इत्युक्त्वाष्टोत्तरशतावृत्तिं हंसगायत्रीं जपेत्।

हंसगायत्रीमन्त्रो यथा।

'ॐ त्रैलौक्यचैतन्यमयि त्रिशक्ते श्रीविश्वमातर्भवदाज्ञायैव।
प्रातः समुत्थाय तव प्रियार्थं संसारयात्रामनुवर्तयामि।'

'ॐ समुद्रमेखले देवि पर्वतस्तनमण्डले।
विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे।।१।।

इति भूमिं संप्रार्थ्य श्वासानुसारेण भूमौ पदं दत्त्वा बहिर्व्रजेत्।
इति प्रातः कृत्यम्।

ततो ग्रामाद्बहिर्नैर्ऋत्यकोणे जनवर्जिते देशे उत्तराभिमुखः अनुपानत्कः वस्त्रेण शिरःप्रावृत्य मनमोचनं कृत्वा मृत्तिकया जलेन यथा संख्यं शौचं कृत्वा हस्तौ पादौ प्रक्षाल्य गण्डूषं च कृत्वा दन्तधावनं कुर्यात्।

तद्यथा।

आम्रचम्पकापामार्गाद्यन्यतमस्य दूादशांगुलं दन्तकाष्ठं गृहीत्वा प्रार्थयेत्।

ॐ आयुर्बलं यशो वर्चः प्रजापशुधनानि च।
श्रियं प्रज्ञां च मेधां च त्वन्नो देहि वनस्पते॥१॥

सर्वदेवोपयोगिपद्धतिमार्गेण तीर्थस्नानं मङ्गलस्नानं च कुर्यात्।

अशक्तश्चेद्गृहस्नानं कुर्यात्।

तत्र प्रयोगः।

तात्कालिकोद्धृतोदकेन उष्णोदकेन वा स्नानं कृत्वा न तु पर्युषितशीतोदकेन।

तद्यथा।

ताम्रादिबृहत्पात्रे जलं गृहीत्वा तीर्थान्यावाहयेत्।

तत्र मन्त्रः।

'ॐ ब्रह्माण्डोदरतीर्थानि करैः स्पृष्टानि ते रवे।
तेन सत्येन मे देव तीर्थं देहि दिवाकर॥१॥

ॐ गङ्गे च यमुने चैव गोदावरि सरस्वति।
नर्मदे सिन्धुकावेरि जलेस्मिन्सन्निधिं कुरु॥२॥

आवाहयामि त्वां देवि स्नानार्थमिह सुन्दरि।
एहि गङ्गे नमस्तुभ्यंसर्वतीर्थ समन्विते॥३॥

इति मन्त्रेण तीर्थान्यावाह्य 'ॐ ऋतं च सत्यम्' इति मन्त्रेणाभि मन्त्र्य स्नायात्।

एवं स्नात्वा शुष्कं शुभ्रं कर्पासोत्पन्नवस्त्रं परिधाय सूर्यायार्घ्यं दद्यात्।

तत्र मन्त्रः।

'ॐ एहि सूर्य सहस्रांशो तेजोराशे जगत्पते।
अनुकम्पय मां देव गृहाणार्घ्य नमोस्तु ते॥१॥

इति मन्त्रेणार्घ्यं दत्वा स्नायी वस्त्रं परिपीड्याचम्य शैवं पञ्चत्रिपुपुण्ड्रं वैष्णवं द्धादशोर्ध्वपुण्ड्रं च तिलकं सर्वदेवोपयोगिपद्धतिमार्गेण कुर्यात्।

इति तिलकं कृत्वा नित्यनैमित्तिकं समाप्य दूरपूजनं कुर्यात्।

अथ दूरपूजनम्।

गृहदूरमागत्य मूलेन फडिति दूरं सम्प्रोक्ष्य दक्षिणशाखायाम्।

ॐ गं गणपतये नमः॥१॥

ॐ दुं दुर्गायै नमः॥२॥

वामशाखायाम् ॐ वं वटुकाय नमः॥३॥

ॐ क्षं क्षेत्रपालाय नमः॥४॥

दूरोपरि ॐ सं सरस्वत्यै नमः॥५॥

देहल्याम् ॐ सुदर्शनायांस्त्राय फट्॥६॥

इति पूजयेत्।

इति दूरपूजनं कृत्वा क्षेत्रं कीलयेत्।
तथा च जपस्थाने गत्वा 'ॐ गृहीतस्यास्य मन्त्रस्य पुरश्चरणसिद्धये।
मयेयं गृह्यते भूमिर्मन्त्रोयं सिद्धिमेति च॥१॥'

इति मन्त्रेणभूमिं संग्राह्य अश्वत्थोदुम्बरप्लक्षाणामन्यतमस्य वितस्तिमात्रान् दश कीलान् 'ॐ नमः सुदर्शनायास्त्राय फट्'।

इति मन्त्रेणाद्योत्तरशताभिमन्त्रितान्।

'ॐ ये चात्र विघ्नकर्तारो भूवि दिव्यन्तरिक्षगाः।
विघ्नभूताश्च ये चान्ये मम मन्त्रस्य सिद्धिषु॥१॥

मयैतत्कीलितं क्षेत्रं परित्यज्य विदूरतः।
अपसर्पन्तु ते सर्वे निर्विघ्नं सिद्धिरस्तु मे॥२॥

इति मन्त्रेण दशदिक्षु दश कीलान् निखनेत्।

ततस्तेषु 'ऊँ सुदर्शनायास्त्राय फट्' इति मन्त्रेण प्रत्येकं कीलान् सम्पूज्य तत्रैव पूर्वादिक्रमेण इन्द्रादिदशदिक्पालानावाह्य पञ्चोपचारैः सम्पूज्य जपस्थानमध्ये गणेशकूर्मानन्तवसुधाक्षेत्रपालंश्च सम्पूज्य दिक्पालेभ्यः क्षेत्रपालगणपतिभ्यश्च माषभक्तबलिं दत्वा तद्बाह्य भूतबलिं दत्वा तद्बाह्ये भूतबलिं दद्यात्।

तत्र मन्त्रः।

'ये रौद्रा रौद्रकर्माणो रौद्रस्थाननिवासिनः।
मातरोप्युग्ररुपाश्च गणाधिपतयश्च मे॥१॥

भूचराः खेचराश्चैव तथा चैवान्तरिक्षगाः।
ते सर्व प्रीतमनसः प्रतिगृह्णत्विमं बलिम्॥२॥

इति मन्त्रद्वयेन दशदिक्षु बाह्य माषभक्तबलिं दद्यात्। ततो वामकरांगुलिभिरर्घ्य-जलेनोत्सृज्य पुष्पाञ्जलिं गृहीत्वाः

ऊँ भूतानि यानीह वसन्ति भूतले बलिं गृहीत्वा विधिवत्प्रयुक्तम्।

सन्तोषमासाद्य व्रजन्तु सर्व क्षमन्तु नान्यत्र नमोस्तु तेभ्यः॥१॥

'ऊँ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा।
यः स्मरेत्पुण्डरीकाक्षं स बाह्यभ्यन्तरःशुचिः॥१॥

इति मन्त्रेण मण्डपान्तरं प्राक्ष्य तत्र तावदासनभूमौ कूर्मशोधनं कार्यम्।

यत्र जपकर्ता एक एव तदा कूर्ममुखे उपविश्य तत्रैव जपं दीपस्थापनं कुर्यात् यत्र बहवः जापकास्तत्र कूर्ममुखोपरि दीपमेव स्थापयेत्।

एवं कूर्मशोधनं विधाय तत्रासनाधो जलादिना त्रिकोणं कृत्वा।

तत्र ऊँ कूर्माय नमः॥१॥

ऊँ ह्रीं आधारशक्रि कमलासनाय नमः॥२॥

ऊँ पृथिवयै नमः॥३॥

इति गन्धाक्षतपुष्पैः सम्पूज्य तदुपरि कुशासनं तदुपरि मृगाजिनं तदुपरि कम्बलाद्यासनमास्तीर्य स्थापितानां त्रयाणामासनानामुपरि क्रमेण ऊँ अनन्तासनाय नमः॥१॥

ॐ विमलासनाय नमः॥२॥

ॐ विमलासनाय नमः॥२॥

ॐ पद्मासनाय नमः॥३॥

इति मन्त्रत्रयेण त्रीन् दर्भान् प्रत्येकं निदध्यात्।
एवमासनं संस्थाप्य तत्र प्राङ्मुख उदङ्मुखो वा उपविश्य आसनं शोधयेत्।

तद्यथा।

ॐ पृथ्वीति मन्त्रस्य मेरुपृष्ठ ऋषिः।

कूर्मो देवता।

सुतलञ्छन्दः।

असने विनियोगः।

'ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता।
त्वं च धारय मां देवि पवित्रं कुरु चासनम्॥१॥

इति मन्त्रेणासनां प्रोक्षयेत्।

ततः मूलेन शिखां बद्ध्वा ॐ केशवाय नमः॥१॥

ॐ नारायणाय नमः॥२॥ ॐ माधवाय नमः॥३॥

इति त्रिराचम्य प्राणानायम्य।

देशकालौ संकीर्त्य अमुकगोत्रः श्रीअमुक देवशर्माहं स्वमहादेवामुकमन्त्रसिद्धि-प्रतिबन्धकाऽशोषदुरिक्षयपूर्वकामुकमन्त्रसिद्धि कामोऽद्यारभ्य यावता कालेन सेत्स्यति तावत्कालपर्यन्तममुकमन्त्रस्य इयत्संख्याजपतद्दशांशहोमतद्दशांशत-र्पणतद्दशांशमार्जन तद्दशांशाभिषेकतद्दशांशब्राह्मण भोजनरूपपुरश्रण (केवल-जपरूपपुरश्चरणं वा) महं करिष्ये।

इति सङ्कल्प्य।

ॐ सुदर्शनायास्त्राय फट्' इति मन्त्रेण तालत्रयं दिग्बन्धनं कुर्यात्।

ततोभूतशुद्धिः स्वप्राणप्रतिष्ठामन्तर्मातृकाबहिर्मातृकासृष्टिस्थितिसंहारमातृकान्यासं च सर्वदेवोपयोगिपद्धतिमार्गेण प्रयोगोक्तन्यासान् कुर्यात्।

अथ पीठ पूजनम्। पीठादौ रचिते सर्वतोभद्रमण्डले लिङ्गतोभद्रमण्डले वा स्ववामे श्रीगुरुभ्यो नमः॥१॥

दक्षिणे ऊँ गणपतये नमः॥२॥

मध्ये स्वेष्टदेवतायै नमः॥३॥

इति नत्वा पीठमध्ये।

इति मण्डूकादिपरतत्वान्तपीठदेवताः सम्पूज्य प्रयोगोक्तनवपीठशक्तीः पूजयेत्।

ततः सुवर्णादिनिर्मितं यन्त्रं मूर्ति वा ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धारां जलधारां च दत्त्वा स्वच्छवस्त्रेण संशोष्य आसनमन्त्रेण पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य प्राणप्रतिष्ठां च कुर्यात्।

तद्यथा।

देशकालौ संकीर्त्य मम महादेवनूतनयन्त्रे मूर्तौ वा प्राणप्रतिष्ठां करिष्ये।

मन्निति त्रिवारं पठेत्।

मनोजूतिर्जुतिर्जुषता सुप्रतिष्ठा प्रतिष्ठा।

इत्युक्त्वा संस्कारसिद्धये पञ्चदशप्रणवावृत्तीः कृत्वा अनेन महादेवसपरिवारयन्त्रस्यगर्भाधानादिपञ्चदश संस्कारान्सम्पादयामि इति वदेत्।

ततः।

ऊँ यन्त्रराजाय विद्महे महायन्त्राय धीमहि तन्नो यन्त्रः प्रचोदयात्।

इत्यष्टोत्तरशतकृत्वोभिमन्त्र्य पाद्यादिपूजनं कुर्यात्

अथ पाद्यादिपूजनम्।

आयाहि भगवञ्शम्भो शार्व त्वं गिरिजापते।

प्रसन्नो भव देवेश नमस्तुभ्यं हि शङ्कर।

विश्वेर महादेव राजराजेश्वरप्रिय।

आसनं दिव्यमीशान दास्येहं तुभ्यमीश्वर।

ऊँ स्वागतं देवदेवेश मद्भाग्यात्त्वमिहागतः।

प्राकृतं त्वमदृट्वा मां बालवत्परिपालय।

ॐ महादेव मंहेशान महादेव परात्पर।

पाद्यं गृहाण मद्दत्त पार्वतीसहितेश्वर।

त्र्यम्बकेश सदाचार जगदादि विधायक।

अर्घ्यं गृहाण देवेश साम्ब सर्वार्थदायक।

ॐ त्रिपुरान्तक दीनार्तिनाशिच्छ्रीकण्ठ शाश्वत्।

गृहाणाचमनीयं च पवित्रोदककल्पितम्।

ॐ गङ्गासरस्वतीरेवापयोष्णीनर्मदाजलैः।
स्नापितोसि मया देव तथा शान्तिं कुरुष्व मे।

ॐ मधुरं गोपयःपुण्यं पटपूतं पुरस्कृतम्।

स्नानार्थं देवदेवेश गृहाण परमेश्वर।

दुर्लभं दिवि सुस्वादु दधि सर्वप्रियं परम्।

पुष्टिदं पार्वतीनाथ स्नानाय प्रतिगृह्यताम्।

घृतं गव्यं शुचि स्निग्धं सुसेव्यं पुष्टिमिच्छताम्।

गृहाण गिरिजानाथ स्नानाय चन्द्रशेखर।

ॐ मधुरं मृदु मोहघ्नं स्वरभङ्ग विनाशनम्।

महादेवेश शर्करेयं प्रदीयते।

ॐ गङ्गा गोदावरी रेवा पयोष्णी यमुना तथा।

सरस्वत्यादि तीर्थानि स्नानार्थं प्रतिगृह्यताम्।

ॐ वस्त्राणि पट्टकूलानि विचित्राणि नवानि च।

मयनीतानि देवेश प्रसन्नो भव शङ्कर।

ॐ सौवर्णं राजतं ताम्रं कर्पासस्य तथैव च।

उपवीतं मया दत्तं प्रीत्यर्थं प्रतिगृह्यताम्।

ॐ सर्वेश्वर जगद्वन्द्य दिव्यासनसमास्थित।

गन्धं गृहाण देवेश चन्दनं प्रतिगृह्यताम्।

अंगुष्ठः कनिष्ठामूललग्नो गन्धमुद्रा।

इति गन्धम्।।१६।।

ॐ अक्षताश्च सुरश्रेष्ट शुभ्रा धोताश्च निर्मलाः।

मया निवेदिता भक्त्या गृहाण परमेश्वर।

माल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो मयाहृतानि पूजार्थं पुष्पाणि प्रतिगृह्यताम्।

ॐ बिल्वपत्रं सुवर्णेन त्रिशूलाकारमेव च।

मयार्पितं महादेव बिल्वपत्रं गृहाण मे।

इति पुष्पान्तैरुपचारैः सम्पूज्य विशेषफलकांक्षी सहस्त्रनामभिः प्रत्येकाम्ना पुष्पबिल्वपत्रद्धारा शिवं पूजयेत्। ततः प्रयोगोक्तावरणपूजां कृत्वा धूपादिपूजनं कुर्यात्।

अथ धूपादिपूजनम्।

फडिति धूपपात्रं संप्रोक्ष्य नम इति गन्धपुष्पाभ्यां सम्पूज्य पुरतो निधाय 'र' इति वह्निबीजेन उपरि अग्निं संस्थाप्य तदुपरि मूलेन दशाङ्गं दत्त्वा घण्टां वादयन्।

ॐ वनस्पतिरसोत्पन्नो गन्धाढयो गन्ध उत्तमः।

आघ्रेयः सर्वदेवानां धूपायं प्रतिगृह्यताम्।

साङ्गाय सपरिवाराय श्रीमहादेवाय धूपं समर्पयामि।

इति पठित्वा देवस्य वामभागे धूपपात्रं निधाय तर्जनीमूलयोरंगुष्ठयोगो धूपमुद्रा तां प्रदर्शयेत्।

इति धूपम्।।२०।।

ततो दीपपात्रं गोघृतेनापूर्य मन्त्राक्षरतन्तुभिर्वर्तो निक्षिप्य 'ॐ' इति प्रणवेन प्रज्वाल्य घण्टां वादयन् नेत्रादिपादपर्यन्तं दीपं प्रदर्शयेत्।

तत्र मन्त्रः।

ॐ आज्याक्तवर्तिसंयुक्तं वह्निना दीपितं तु यत्।

दीपं गृहाण देवेश त्रैलोक्यतिमिरापहम्।

साङ्गाय सपरिवाराय महादेवाय दीपं समर्पयामि।

इति पठित्वा देवस्य दक्षिणभागे निधाय ततः शङ्खजलमुत्सृज्य मध्यमांगुष्ठलग्नां दीपमुद्रां प्रदर्शयेत्।

इति दीपम्॥२१॥

ततो देवस्याग्रे देवदक्षिणतो वा जलेन चतुरस्त्रमण्डलं कृत्वा स्वर्णादिनिर्मितं भोजनपात्रं संस्थाप्य तन्मध्येषड्रसोपेतं विविधप्रकारं वा नैवेद्यं निधाय 'ऊँ ह्रीं नमः' इति मन्त्रेणार्घ्यजलेन प्रोक्ष्य मूलेन संवीक्ष्य अधोमुखदक्षिणहस्तोपरि तादृशं वामं निधाय नैवेद्यमाच्छाद्य (ऊँ यं) इति वायुबीजेन षोडशधा सञ्जाप्य वायुना तन्गतदोषान् संशोष्य दक्षिणकरतले तत्पृष्ठलग्नं वामकरतलं कृत्वा नैवेद्यं प्रदर्श्य (ऊँ वं) इति सुधाबीजं षोडशवारं सञ्जाप्य तदुत्थामृतधारया प्लावितं विभाव्य मूलेन प्रोक्ष्य धेनुमुद्रां प्रदर्श्य मूलेनाद्यधाभिमन्त्र्य गन्धपुष्पाभ्यां सम्पूज्य देवस्योद्गतं तेजः स्मृत्वा वामांगुष्ठेन नैवेद्यपात्रं स्पृष्ट दक्षिणकरेण जलं गृहीत्वाः।

'ऊँ अपूपानि च पक्वानि मण्डका वटकानि च।

पायसं सूपमन्नं च नैवेद्यं प्रतिगृह्यंताम्।'

साङ्गाय सपरिवाराय श्रीमहादेवाय नमः।

नैवेद्यं समर्पयामि।

इति ब्भूतले देवदवक्षिणकरे जलं क्षिप्वा वामहस्तेम अनामामूलयोरंगुष्ठयोगे ग्रासमुद्रां प्रदर्श्प देवं भुकवन्तं विभा व्यज़लँदद्यात्॥ तद्यथा॥

ऊँ नमस्ते देवदेवेश सर्वतृप्तिकरं वरम्।

परमानन्दपूर्ण त्वं गृहाण जलमुत्तमम्।

ऊँ साङ्गाय सपरिवाराय श्रीमहादेवाय नमः।

जलं समर्पयामि।

इति मन्त्रेण स्वर्णादिपात्रस्थं कर्पूरादिसुवासितं जलं निवेद्य देवेन तज्जलं प्राशितमिति भावयन् अन्तःपटं दत्त्वा देवकीर्तनं कुर्यात्॥२३॥

ऊँ उच्छिष्टोप्यशुचिर्वापि यस्य स्मरणमात्रतः।

शुद्धिमाप्रोति तम् ते पुनराचमनीयकम्।

ॐ कर्पूरादीनि द्रव्याणि सुगन्धीनि महेखर।
गृहाणजगतां नाथ करोद्वर्तन हेतवे।

ॐ कूष्माण्डं मातुलुगं च नारिकेलफलानि च।
गृहाण पार्वतीकान्त सोमशेश्वर शङ्कर।

ॐ पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम्।
गृहाण देवदेवेश द्राक्षादीनि सुरेश्रर।

ॐ हिरण्यगर्भगर्भस्थं हेमबीजसमन्वितम्।
पञ्चरत्नं मया दत्तं गृह्मतां वृषभध्वज।

ॐ कदलीगार्भसम्भूतं कर्पूरं च प्रदीपितम्।
आरार्तिक्यमहं कुर्वे पश्य मे वरदो भव।'

ॐ हरविश्वाखिलाधार निराधार निराश्रय।
पुष्पाञ्चलिं गृहाणेश सोमेश्वर नमोस्तुते।

'ॐ यानिकानि च पापनि जन्मान्तरकृतानि वै।
तानि सर्वाणि नश्यन्तु प्रदक्षिणपदेपदे।

ॐ हेतवे जगतामेव संसारार्णवसेतवे।
प्रभवे सर्वविद्यानां याम्भवे गुरवे नमः॥३२॥

इति साद्याङ्गं प्रणम्य पुष्पाञ्चलिं च दत्त्वा स्तुतिपाठेन स्तुत्वा बद्धाञ्चलिः प्रार्थयेत्।

तद्यथा।

'ज्ञानतोऽज्ञानतो वाऽथं न मया क्रियते शिव।
मम कृत्यमिदं सर्वमेतदेव क्षमस्व मे॥१॥

अपराधसहस्राणि क्रियन्तेऽहर्निशं मया।
दासोऽयमिति मां मत्वा क्षमस्व परमेश्वर॥२॥

अपराधो भवत्येव सेवकस्य पदेपदे।

कोऽपरः सहतां लोकं केवलं स्वामिनं विना॥३॥

भूमौ स्खलितपादानां भूमिरेवावलम्बनम्।
त्वयि जातापराधानां त्वमेव शरणं शिव॥४॥

'यतुक्तं यदि भावेन पत्रं पुष्पं फलं जलम्।
निवेदितं च नैवेद्यं गृहाणाथानुकम्पय॥५॥

इति पठित्वा देवस्य दक्षिणकरे पूजार्पणजलं दत्त्वा सर्वदेवोपयोगिपद्धतिमार्गेण मालायाः संस्कारान् कुर्यात्।

अशक्तश्चेत्साधारणं कुर्यात्।

तद्यथा।

मूलेन मालां सम्प्रोक्ष्य गन्धादिभिस्सम्पूज्य ध्यायेत्।

ॐ ह्रीं मालेमाले महामाये सर्वशक्तिस्वरूपिणि।
चतुर्वर्गेस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव॥१॥

ॐ अविघ्नं कुरु माले त्वं सर्वकार्येषु सर्वदा।

इति मन्त्रेण दक्षिणहस्ते मालामादाय ह्वदये धारयन् स्वेष्टदेवतां ध्यात्वा मध्मांगुलिमध्यपर्वणि संस्थाप्य ज्येष्ठाग्रेण भ्रामयित्वा एकाग्रचित्तो मन्त्रार्थ स्मरन् यथाशक्ति प्रातःकालमारभ्य मध्यंदिनं यावत् मूलमन्त्रं जपेत्।

नित्सशः समाना जपाः कार्या न तु न्यूनाधिकम्।

ततो जपान्तेः

'ॐ त्वं माले सर्वदेवानां प्रीतिदा शुभदा मम।

शुभं कुरुष्व मे भद्रे यशो वीर्य च सर्वदा।

तेन सत्येन सिद्धिं मे देहि मार्तनमोस्तु ते।

ॐ ह्रीं सिद्धचै नमः।'

इति मालां शिरसि निधाय गोमुखीं रहसिं स्थापयेत्।

नाशुचिः स्पर्शयेत्।

नान्यस्मै दद्यात्।

अशुचिस्थाने न निधापयेत्।

स्वयोनिवद्गुप्तां कुर्यात्।

इति जपं कृत्वा कवचस्तोत्रसहस्त्रनामादिकं पठित्वा पुनः मूलमन्त्रोक्तऋष्यादिन्यासं हृदयादिषडङ्गन्यासं च कृत्वा पञ्चोपचारैः सम्पूज्य पुष्पाञ्जलिं च दत्त्वा जपदेवार्पणं कुर्यात्। तद्यथा।

अर्घ्योदकेन चुलकमादायः

'ॐ गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृत जपम्।
सिद्धिर्भवतु मे देव त्वत्प्रसादात्त्वयि स्थितिः॥१॥'

ॐ इतः पूर्व प्राणबुद्धिदेहधर्माधिकारतो जाग्रत्स्वप्नसुषुप्तितुर्यावस्थासु मनसा वाचा कर्मणा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत्स्मृतं यदुक्तं यत्कृतं तत्सर्वं ब्रह्मार्पणं भवतु स्वाहा। मदीयं च सकलं श्रीमहादेवाय समर्पयामि नमः।

ॐ तत्सदिति ब्रह्मार्पणं भवतु।

ॐ आवाहनं न जानामि न जानामि विसर्जनम्।
पुजाभागं न जानामि त्वं गतिः परमेश्वर॥१॥

मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर।
यत्पूजितं मया देव परिपूर्णं तदस्तु मे॥२॥

यदक्षरपदभ्रष्टं मात्राहीनं च यद्भवेत्।
तत्सर्वं क्षम्यतां देव प्रसीद परमेश्वर॥३॥

कर्मणा मनसा वाचा त्वत्तो नान्या गतिर्मम।
अन्तश्चरश्च भूतानामिष्टस्त्वं परमेश्वर॥४॥

अन्यथा शरणं नास्ति त्वमेव शरणं मम।

तस्मात्कारुण्यभावेन क्षमस्व परमेश्वर॥५॥

प्रातर्योनिसहस्त्रेषु सहस्त्रेषु व्रजाम्यहम्।
तेषु चेष्टाचला भक्तिरच्युतेस्तु सदा त्वयि॥६॥

गतं पापं गएं दुःखं गत दारिद्यष्टमेव च।
आगता सुखसम्पत्तिः पुण्या च तव दर्शनात्॥७॥

देवो दाता च भोक्ता च देवरूपमिदं जगत्।
देवं जपति सर्वत्र यो देवः सोहमेव हि॥५॥

क्षमस्व देवदेवेश क्षम्यते भुवनेश्वर।
त्व पादाम्बुजे नित्यं निश्चला भक्तिरस्तु मे॥६॥

'साधुं वाऽसाधु वा कर्म यद्यदाचरितं मया।
तत्सर्वं कृपया देव गृहाणाराधनं मम।'

'ॐ गच्छगच्छ परस्थाने स्वस्थाने परमेश्वर।
पूजाराधनकाले च पुनरागामनाय च।'

इत्यक्षतान् निक्षिप्य विसर्जनं कृत्वा देवं स्वहृदयं स्थापयेत्। तद्याथा।

'ॐ तिष्ठतिष्ठ परस्थाने स्वस्थाने परमेश्वर।
यत्र ब्रह्मादयो देवाः सर्वे तिष्ठन्ति मे ह्यदि॥१॥

इति हृदयकमले हस्तं दत्त्वा देवं संस्थाप्य मानसोपचारैः सम्पूज्य स्वात्मानं देवरूपं भावयन् यथासुखं विहरेत्।

एवमेव विधिना जपं समाप्य संस्कृते वह्नौ जपदशांशतो होमः तत्तद्दशांशेन तर्पणमार्जनब्राह्मणभोजनं च कुर्यात्।

एतत्सर्व सर्वदेवोपयोगिपद्धतिमार्गेण कुर्यात्

इति शिवपूजापद्धतिः समाप्ता।

अथ सदशिवकवचप्रारमभः।

श्रीदेव्युवाच।

भगवन्देवदेवेश सर्वाम्नायप्रपूजित।
सर्वं मे कथितं देव कवचं न प्रकाशितम्॥१॥

प्रासादाख्यस्य मन्त्रस्य कवचं मे प्रकाशय।

सवरक्षाकरं देव यदि स्नेहोस्ति मां प्रति।

विनियोगः प्रासादमन्त्रकवचस्य वामदेवऋषिः पंक्तिच्छन्दः।

सदाशिवो देवता। साधकाभीष्टसिद्धये जपे विनियोगः।

शिरो मे सर्वदा पातु प्रासादाख्यः सदाशिवः।
षडक्षरस्वरूपो मे वदनं तु महेश्वरः॥३॥

पञ्चाक्षरात्मा भगवान्भुजौ मे परिरक्षतु।
मृत्युञ्जयस्त्रिबीजात्मा आस्यं रक्षतु मे सदा॥४॥

वटमूलं समासीनो दक्षिणामूर्तिरव्ययः।

सदा मां सर्वदः पातु षट्त्रिंशार्णस्वरूप धृक्।
द्वाविंश्वर्णात्मको रुद्रो दक्षिणः परिरक्षतु।

त्रिवर्णात्मा नीलकण्ठः कण्ठं कण्ठं रक्षातु सर्वदा॥६॥

चिन्तामणिर्बीजरूपो ह्यर्द्धनारीश्वरो हरः।
सदा रक्षतु मे गुह्येसर्वसम्पत्प्रदायकः॥७॥

एकाक्षरस्वरूपात्मा कूटव्यापी महेश्वरः।
मार्तणडभैरवो नित्यं पादौ मे परिरक्षतु॥८॥

तुम्बुराख्यो महाबीजस्वरूपस्त्रिपुरान्तकः।
सदा मां रणभूमौ च रक्षतु त्रिदशाधिपः॥९॥

ऊर्ध्वमूर्द्धानमीशानो मम रक्षतु सर्वदा।
दक्षिणास्यं तु तत्पुरुषोऽव्यान्मे गिरिनायकः॥१०॥

अघोराख्यो महादेवः पूर्वास्यं परिरक्षतु।
वामदेवः पश्चिमास्यं सदा मे परिरक्षतु॥११॥

उत्तरास्यं सदा पातु सद्योजातस्वरूपधृक्।
इत्थं रक्षाकरं देवि कवचं देवदुर्लभम्॥१२॥

प्रातःकाले पठेद्यस्तु सोभीष्टं फलमाप्नुयात्।
पूजाकाले पठेद्यस्तु कवचं साधकोत्तमः॥१३॥

कीर्तिश्रीकान्तिमेधायुः सहितो भवति ध्रुवम्।
कण्ठे यो धारयेदेतत्कवचं मत्स्वरुपकम्॥१४॥

युद्ध च जयमाप्नोति द्यूते वादे च साधकः।
कवचं धारयेद्यस्तु साधको दक्षिणे भुजे॥१५॥

देवा मनुष्यगन्धर्वा वश्यास्तस्य न संशयः।
कवचं शिरसा यस्तु धारयेद्यतमानसः॥१६॥

भूर्जप्रत्रे त्विमां त्विमां शुक्लपट्टेन वोष्टिताम्॥१७॥

करस्थासास्य देवेशि अणिमाद्यष्टसिद्धयः।
रजतोदरसंविष्टां कृत्वा वा धारयेत्सुधीः।
सम्प्राप्य महती लक्ष्मीमन्ते मद्देहरूपभाक्॥१८॥

यस्मै कस्मै च दातंव्यं न प्रकाश्यं कदाचन।
शिष्याय भक्तियुक्ताय साधकाय प्राकाशयेत्॥१९॥

अन्यथा सिद्धिहानिः स्यात्सत्यमेतन्मनोरमे।
तव स्नेहान्महदेवि कथितं शुभम्॥२०॥

न देयं कस्यचिद्भद्रे यदीच्छेदात्मनो हितम्।

योर्चयेद्गन्धपुष्पाद्यैः कवचं मन्मुखोदितम्।

तेनार्चिता महादेवि सर्वे देवा न संशयः।

इति भैरवतन्त्रे सदाशिवकवचं समाप्तम्।

अथ सदाशिवस्तोत्रप्रारम्भः।

धरापोग्निमरुद्व्योममखेशेन्दुर्कमूर्तये।
सर्वभूतान्तरस्थाय शङ्कराय नमो नमः॥१॥

श्रुत्यन्तकृतर्वासाय श्रुतये श्रुतिजन्मने।
अतीन्द्रियाय महसे शाश्वताय नमोनमः॥२॥

स्थूलसूक्ष्मविभागाभ्यामनिर्देश्याय शम्भवे।
भवाय भवसम्भूतदुःखहन्त्रे नमोस्तु ते॥३॥

तर्कमार्गातिदूराय तपसां फलदायिने।
चतुर्वर्गवदान्याय सर्वज्ञाय नमोनमः॥४॥

आदिमध्यान्तशून्याय निरस्ताशेषभीतये।
योगिध्येयाय महते निर्गुणाय नमो नमः॥५॥

विश्वात्मनेऽविचिन्त्याय विल्सत्चन्द्रमौलये।
कन्दर्पकालाय कालहन्त्रे नमोनमः॥६॥

विषाशनाय विहरदृषस्कन्धमुपेयुषे।
सरिद्ग्रामसमाबद्धकपर्दाय नमोनमः॥७॥

शुद्धाय शुद्धभावाय शुद्धानामन्तरात्मने।
पुरान्तकाय पूर्णाय पुण्यनाम्ने नमोनमः॥८॥

भक्ताय निजभक्तानां भुक्तिमुक्तिप्रदाायिने।
विवाससे विवासाय विश्वेषां ते नमोनमः॥९॥

त्रिमूर्तिमूलभूताय त्रिनेत्राय नमोनमः।
त्रिधाम्ना धामरूपाय जन्मनाय नमोनमः॥१०॥

देवासुरोरत्नकिरणारूणितांध्रये।
कान्ताय निजकान्तायै दत्तार्द्धा नमोनमः॥११॥

स्तोत्रेणानेन पूजायां प्रीणयेज्जगतः पतिम्।
भक्तिमुक्तिप्रदं भक्त्या सर्वज्ञं परमेश्वरम्॥१२॥

इति सदाशिवस्तोत्रं समाप्तम्।

अथ शतनामस्तोत्रप्रारम्भः।

'ॐ शिवो महेश्रर: शम्भुः पिनाकी शशिशेखरः।
वामदेवो विरूपाक्षः कपर्दी नीललोहितः॥१॥

शङ्करः शूलपाणिश्र खट्वाङ्गी विष्णुवल्लभः।
शिपिविष्टोम्बिकानाथः श्रीकण्ठो भक्तवल्लभः॥२॥

भवः सर्व त्रिलोकेशः शितिकण्ठः शिवाप्रियः।
उग्रः कपली कामारिरन्धकासुरसूदनः॥३॥

गङ्गाधरो ललाटाक्षः कालकाल कृपानिधिः।
भीमः परशुहस्तश्च मृगपाणिर्जटाधरः॥४॥

कैलासवासी कवची कठोरस्त्रिपुरान्तकः।
वृषाङ्को वृषभारूढो भस्मोद्धूलितविग्रहः॥५॥

सामप्रियः स्वरमयस्त्रयीमूर्तिरनीश्वर।
सर्वज्ञः परमात्मा च सोमसूर्याग्निलोचनः॥६॥

हविर्यज्ञमयः सोमः पञ्चवक्त्रः सदाशिवः।
विश्वेश्वरो वीरभद्रो गणनाथः प्रजापतिः॥७॥

हिरण्यरेता दुर्द्धर्षो गिरीशो गिरिशोऽनघः।
भुजङ्गभूषणो भर्गो गिरिधन्वा गिरिप्रियः॥९॥

कृत्तिवासाः पुरारातिर्भगवान्प्रमथाधिपः।
मृत्युञ्जयः सूक्ष्मतनुर्जगद्व्यापी जगद्गुरुः॥९॥

व्योमकेशो महासेनो जनकश्वारुविक्रमः।
रुद्रो भूतपतिः स्थाणुरहिबुध्न्यो दिगम्बरः॥१०॥

अष्टमूर्तिरनेकात्मा सात्त्विकः शुद्धविग्रहः।
शाश्वतः खण्डपरशुरजः पाशाविमोचकः॥११॥

मृडः पशुपतिर्देवो महादेवोऽव्ययः प्रभुः।
पूषदन्तभिदव्यग्रो दक्षाध्वर हरो हरः॥१२॥

भगनेत्रभिदव्यक्तः सहस्त्राक्षः सहस्त्रपात्।
अपवर्गप्रदोनन्तस्तारकः परमेश्रर:॥१३॥

इमानि दिव्यनामानि जप्यन्ते सर्वदा मया।
नामकल्पलतेयं मे सर्वाभीद्यप्रदायिनी॥१४॥

नामान्येतानि सुभगे शिवदानि न संशयः।
वेदसर्वस्वभूतानि नामान्येतानि वस्तुतः॥१५॥

एतानि यानि नामानि तानि सर्वार्थदान्यतः।
जप्यन्ते सादरं नित्यं मया नियमपूर्वकम्॥१६॥

वेदेषु शिवनामानि श्रेष्ठन्यघहराणि च।
सन्त्यनन्तानि सुभगे वेदेषु विविधेष्वपि॥१७॥

तेभ्यो नामानि संगृह्य कुमाराय महेश्ररः।
अष्टोत्तरसहस्त्रं तु नाम्नामुपदिशत्पुरा॥१५॥

इति शिवाष्टोत्तरंशतनामस्तोत्रं सम्पूर्णम्।
अथ शिवसहस्त्रनामस्तोत्रारम्भः।

श्रीविष्णुरुवाच।
शिवो हरो मृडो रुद्रः पुष्करः पुष्पलोचनः॥२॥

अर्थिगम्यः सदाचारः शर्वः शम्भुर्महेश्वरः।
चन्द्रापीडश्चन्द्रमौलिर्विश्वादिश्चामरेश्वरः॥३॥

वेदान्तसारसन्दोहः कपाली नीललोहितः।
ध्यानाधारापरिच्छेद्यो गौरीभर्ता गणेश्वरः॥४॥

अष्टमूर्तिर्विवमूर्तिस्त्रिवर्गः स्वर्गसाधनः।
ज्ञानगम्यो हढप्रज्ञो देवदेवस्त्रिलोचनः॥५॥

वामदेवो महादेवः पटुः परिबृढो हदः।
विश्वरुपो विरूपाक्षो वागीशः शुचिमत्तरः॥६॥

शर्वः प्रमाणसंवादीवृषाङ्को वृषवाहनः।
ईशः पिनाकी खट्वाङ्गी चित्रवेषचिश्रन्तनः॥७॥

तमोहरो महायोगी गोप्ता ब्रह्माण्डहृज्जटी।
कालकालः कृत्तिवासः सुभगः प्रणतात्मकः॥८॥

त्रिपुण्ड्रधारी चाक्षुष्यो दुर्वासाः पुरशासनः।
दिव्यायुधः स्कन्दगुरुः परमेष्ठी परात्परः॥९॥

अनादिमध्यनिधनो गिरीशो गिरिबान्धवः।
कुबेरबन्धुः श्रीकण्ठो लोकवर्णोत्तमो मृदुः॥१०॥

समाधिवेद्यः कोदण्डी नीलकण्ठः परश्वधी।
विशालाक्षो मृगव्याधः सुरेशः सूर्यतापनः॥११॥

धर्मधामा क्षमाक्षेत्रं भगवान् भगनेत्रभित्।
उग्रः पशुपतिस्तार्क्ष्यः प्रियभक्तः प्रियंवदः॥१२॥

दाता दयाकरो दक्षः कपर्द्दी कामशासनः।
श्मशाननिलयः सक्ष्मः श्मशानस्थो महेश्वरः॥१३॥

लोककर्ता मृगपतिर्महाकर्ता महौषधिः।
उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः॥१४॥

नीतिः सुनीतिः शुद्धात्मा सोमः सोमतरः सुखी।
सामपोऽमृतपः सौम्यो महाज्योतिर्महा द्युतिः॥१५॥

नेजामयऽमृतमयान्नमयश्च सुधापतिः।
अजातशत्रुरालोक सम्भाव्यो हव्यवाहनः॥१६॥

लोककरो वेदकरः सूत्रकारः सनातनः।
महर्षिः कपिलाचार्यो विश्वदीप्तिर्विलोचनः॥१७॥

पिनाक पाणिर्भूदेववशगः स्वस्तिकृत्सुधीः।
धातृधामा धामकरः सर्वदः सर्वगोचरः॥१८॥

ब्रह्मसृग्विश्वसृक्सर्वः कर्णिकारप्रियः कवि।
शाखोविशाखो गोशाखः शिवो भिषगनुत्तमः॥१९॥

गङ्गाप्लवोदको भव्यः पुष्कलः स्थपतिः स्थिरः।
विजितात्मा विधेयात्मा भूतवाहनसारथिः॥२०॥

सगणो गणवर्यश्च सुकीर्तिशिच्छन्नसंशयः।
कामदेवः कामपालो भस्मोद्धूलितविग्रहः॥२१॥

भस्मप्रियो भस्मशायी कामी कान्तः कृतागमः।
समावर्तो निवृत्तात्मा धर्मपुञ्जः सदाशिवः॥२२॥

अकल्मषश्चतुर्बाहुर्दुरावासो दुरासदः।
दुर्लभो दुर्गमो दुर्गः सर्वायुधविशारदः॥२३॥

अध्यात्मयोगनिलयः सुतन्तुस्तन्तुवर्द्धनः।
शुभाङ्गो लोकसारङ्गो जगदीशो जनार्दनः॥२४॥

भस्मशुद्धिकरो मेरुरोजस्वी शुद्धविग्रहः।
असाध्यः सधुसाध्यश्र भृत्यमर्कटरूपधृक्॥२५॥

हिरण्यरेताः पौराणो रिपुजीवहरोऽचलः।
महाह्रदो महागर्तः सिद्धबृन्दारकेडितः॥२६॥

व्याघ्र चर्माम्बरो व्याली महाभूतो महानिधिः।
अमृतानुभवः श्रीमान् पांचजन्यः प्रभञ्जनः॥२७॥

पञ्चविंशतितत्त्वस्थः पारिजातः परात्परः।
सुलभः सुव्रतः शूरोवाङ्मयी कनिधिर्निधिः॥२८॥

वर्णाश्रमगुरुर्वर्णी शत्रुजिच्छत्रुतापनः।
आश्रमः क्षपणः क्षामो ज्ञानवानचलेश्वरः॥२९॥

प्रमाणभूतो दुर्ज्ञेयः सुपर्णो वायुवाहनः।
धनुर्धरो धनुर्वेदो गुणः शशिगुणाकरः॥३०॥

सत्यः सत्यपरो दीनो धर्माङ्गो धर्मसाधनः।
अनन्तदृष्टिरानन्दो दण्डी दमयिता दमः॥३१॥

अभिचार्यो मनामायो विश्वकर्मा विशारदः।
वीतरागो विनीतात्मा तपस्वी भूतवाहनः॥३२॥

उन्मत्तवेषः प्रच्छन्नो जितकामोर्चितप्रियः।
कल्पान्तः प्रकृतिः कल्पः सर्वलोकप्रजापतिः॥३३॥

तरस्वी तारको धीमान् प्रधानः प्रभुरव्ययः।
लोकपालोंतर्हितात्मा कल्पादिः कमलेक्षणः॥३४॥

वेदशास्त्रार्थतत्त्वज्ञो नियमो नियमाश्रयः।
चन्द्रः सूर्यः शनिः केतुर्विरागो विद्रुमच्छविः॥३५॥

भक्तिवश्यः परब्रह्म मृगबाणार्पणे नयः।
अद्रिरद्र्यालयः कान्तः परमात्मा जगद्गुरुः॥३६॥

सर्वकामालयस्तुष्टो माङ्गल्यो मङ्गलावृतः।
महातपा दीर्घतपाः स्थविष्ठः स्थविरो द्रुमः॥३७॥

अहः संवत्सरो व्याप्तिः प्रमाणं परमं तपः।
संवत्सरकरो मन्त्रः प्रत्ययः सर्वदर्शनः॥३८॥

अजः सर्वेश्वरः सिद्धो महारेता महाबलः।
योगो योग्यो महातेजाः सिद्धः सर्वादिविग्रहः॥३९॥

वसुर्वसुमनाः सत्यः सर्वपापहरो हरः।
सुकीर्तिः शोभितः श्रावी ह्यवाङ्मनसगोचरः॥४०॥

अमृतःशाश्वतः शान्तो द्रोणहस्तः प्रतापवान्।
कमण्डलुधरो धन्वी वेदाङ्गो वेदविन्मुनिः॥४१॥

भ्राजिष्णुर्भोजनं भोक्ता लोकनाथो दुरावरः।
अतीन्द्रियो महामायः सर्वावासश्चतुष्पथः॥४२॥

कालयोगी महानादो महोत्साहो महाबलः।
महाबुद्धिर्महावीर्यो भूतचारी पुरन्दरः॥४३॥

निशाचरः प्रेतचारी महाशक्तिर्महाद्युतिः।
अनिर्द्रेश्य वपुः श्रीमान् सर्वाचार्यमनोगतिः॥४४॥

बहुश्रुतो महामायो नियतात्मा ध्रुवोध्रुवः।
तेजस्तेजोद्युतिधरो नरकः सर्वशासकः॥४५॥

नृत्यप्रियो नित्यनृत्यः प्रकाशात्मा प्रकाशकः।
स्पष्टः क्रूरो बुधो मन्त्रः समानः सारसंप्लवः॥४६॥

युगादिकृद्युगावर्तो गम्भीरो वृषवाहनः।
इष्टो विशिष्टः शिष्टेः शरभः शरभो धनुः॥४७॥

तीर्यरूपस्त्तीर्थनामा नीर्थानामा तीर्थाह्श्यः सुतीर्थदः।
अपान्निधिरधिष्टानं विजयो जयकालवित्॥४८॥

प्रतिष्टितः प्रमाणज्ञो हिरण्यकवचो हरिः।
विमोचवः सुरगणो विद्येशो बिन्दुसंश्रयः॥४९॥

बालरूपो बलोन्मत्तो विकर्ता गहनो गुहः।
करणं कारणं कर्ता सर्वबन्धविमोचनः॥५०॥

व्यवसायो व्यवस्थानः स्थानदो जगदादिजः।
गुरुदो ललितो भेदो निवासात्मनि संस्थितः॥५१॥

वीरेश्वरो वीरभद्रो विश्वरूपो विधिर्विराट्।
वीरचन्द्रो मणिर्द्धर्ता तीव्रानन्दो नदीश्वरः॥५२॥

अग्न्याधारस्त्रिशूली च शिपिविष्टः शिवालयः।
बालखिल्यो महावीर्यस्तिग्मांशुर्बधिरः खगः॥५३॥

अभिरामः सुशरणः सुब्रह्मण्यः सुधानिधिः।
मघवा कौशिको गोमान् विरामः सर्वसाधनः॥५४॥

ललाटजो विश्वदेहः सारसंसारचक्रभृत्।
अमोघो दण्डिमध्यस्थो हरिणो ब्रह्मवर्चसः॥५५॥

परमार्थः परमयः शाम्बरो व्याघ्रकोऽनलः।
रुचिर्वररुचिर्वन्द्यो वाचस्पतिरहर्पतिः॥५६॥

रविर्विरोचनः स्कन्दः शास्ता वैवस्वतोऽमरः।
युक्तिकृन्मत्तकीर्तिश्व सानुगश्च परञ्जयः॥५७॥

कैलासाधिपतिः कान्तः सविता रविलोचनः।
विश्वोत्तमो वीतभयो विश्वभर्ता निवारितः॥५८॥

नित्यो नित्यकल्याणः पुण्यश्रवणकीर्तनः।
दूरश्रवा विश्वसहो ध्येयो दुःख प्रणाशनः॥५९॥

उत्तारणो दुष्कृतिहा विज्ञेयो दुःसहो भवः।
अनादिर्भूर्भुवो लक्ष्मीः किरीटी त्रिदशाधिपः॥६०॥

विश्वगोप्ता विश्वकर्ता सुवीरो रुचिराङ्गदः।
जननो जनजन्मादिः प्रीतिमान्नीतिमान्धवः॥६१॥

वसिष्ठः कश्यपो भानुर्भीमो भीमपराक्रमः।
प्रणवः सत्पथाचारो महाकाशो महाधनः॥६२॥

जन्माधिपो महादेवः सकलागमपारगः।
तत्त्वं तत्त्वविदेकात्मा विभुर्विष्णुविभूषणः॥६३॥

ऋषिर्ब्राह्मण ऐश्वर्यो जन्ममृत्युजरातिगः।
पञ्चयज्ञसमुत्पत्तिर्विश्वशो विमलोदयः॥६४॥

अनाद्यन्त आत्मयोनिर्वत्सलो भक्तलोकधृक्।
गायत्रीवल्लभः प्रांशुर्विश्वासः प्रभाकरः॥६५॥

शिशुर्गिरिरतः सम्राट् सुषेणः सुरशत्रुहा।
अनेमिरिष्टनेमिश्च मुक्तिदो विगतज्वरः॥६६॥

स्वयंज्योतिस्तपज्ज्योतिरतिज्योतिरचञ्चलः।
पिङ्गलः कपिलः श्मश्रुर्भालनेत्रस्त्रयीतनुः॥६७॥

ज्ञानस्कन्दो महानीतिर्विश्वोत्पत्तिरुपप्लवः।
भोगी विवस्वतस्तत्वो योगपारो दिवस्पतिः॥६८॥

कल्याण गुणनामाच पापहा पुण्यदर्शनः।
उदारकोर्तिरुद्योगी महन्मान्यश्च सत्त्वपः॥६९॥

रुक्षो मलिनकेशश्च स्वाधिष्ठानपदाश्रयः।
पवित्रः पापनाशश्च मणिपूरो नभोगति॥७०॥

हृत्पुण्डरीकमासीनः शक्रः शान्तो वृषाकपिः।
कृष्णो ग्रहपतिः कृष्णः समर्थोऽनर्थनाशनः॥७२॥

जगद्धितैषी सुगतः कुमारः कुशलागमः।
हिरण्यवर्णो ज्योतिष्मान्नानाभूतरतो ध्वनि!::॥७३॥

आरोग्यो नयनाध्यक्षो विश्वामित्रो धनेश्वरः।
ब्रह्मज्योतिर्वसुर्धामा महाज्योतिरनुत्तमः॥७४॥

मातामहो मातरिश्वा नभस्वान्नागहारधृक्।
पुलस्त्यः पुलहोगस्त्यो जातूकर्ण्यं पराशरः॥७५॥

निरावरणनिर्वारो वैरंच्यो विष्टारश्रवाः
आत्मभूरनिरु-द्धोत्रिज्ञानमूर्तिमहायशाः॥७६॥

लोकवीराग्रणीर्वीरश्चन्द्रः सत्यपराक्रमः।
व्यालकल्पो महाकल्पः कल्पवृक्षः कलाधरः॥७७॥

अलङ्करिष्णुरचलो रोचिष्णुर्विक्रमोम्बरः।
आशुः शब्दपतिर्वङ्गी पवनः शिखिसारथिः॥७८॥

असंसृतिपतिः शक्रप्रमादः पादपासनः।
वसुश्रवाः कव्यवाहः प्रतप्तो विश्वभोजनः॥७९॥

जप्यो जरारिः शमनो लोहिताश्श्वस्तनूनपात्।
नभोयोनिः सुनिष्पन्नः सुरभिः शिशिरात्मकः॥८०॥

वसन्तो माधवो ग्रीष्मो नभःस्यो बीजवाहनः।
अङ्गिरा गुरुरात्रेयो विमलो विश्ववाहनः॥८१॥

पावनः पुरुजिच्छक्रस्त्रैविद्यो नरवारणः।
मनोबुद्धिरहङ्कारः क्षेत्रज्ञः क्षेत्रपालकः॥८२॥

जमदग्निर्जलनिधिर्विगोली विश्वगोलकः।
अघोरानुत्तरो यज्ञः श्रेष्टो निःश्रेयसालयः॥८३॥

शैलो गगनकुन्दाभो दानवारिररिन्दमः।
चामुण्डाजीवकश्चारुनिःशल्यो लोककल्पधृक्॥८४॥

चतुर्वेदश्चतुर्भावश्चतुरश्चतुरप्रियः।
आम्नायोथ समाम्नायस्तीर्यवेदशिवालयः॥८५॥

बहुरूपो महारूपः सर्वरूपश्चराचरः।
नयनिर्मापको न्यायो न्यायगम्यो निरञ्जनः॥८६॥

सहस्रमूर्द्धा देवेन्द्रः सर्वशस्त्रप्रभञ्जनः।
मुण्डो विरूपो विक्रान्तो दण्डीताण्डगुणोत्तमः॥८७॥

पिङ्गलाक्षो हयग्रीवो नीलग्रीवो निरामयः।
सहस्रबाहुः सर्वेशः शरण्यः सर्वलोकधृक्॥८८॥

पद्मासनः परंज्योतिः परंपारं परंफलम्।
पद्मगर्भो महागर्भो विश्श्वगर्भो विचक्षणः॥८९॥

चराचरज्ञो वरदो वरेशस्तु महास्वनः।
देवासुरगुरुर्देवो देवासुरनमस्कृतः॥९०॥

देवासुरमहामित्रो देवासुरमहाश्रमः।
देवादिदेवो देवाग्निर्देवासुरवरप्रदः॥९१॥

देवासुरेश्वरो दिव्यो देवासुरमहेश्वरः।
देवदेवो महाचिन्त्यो देवतात्मात्मसम्भवः॥९२॥

सद्योनष्टासुरव्याघ्रो देवसिंहो दिवाकरः।
विबुधाग्रचरः श्रेष्ठः सर्वदेवोत्तमोत्तमः॥९३॥

शिवज्ञानप्रदः क्षीमान् शिखी श्रीपर्वतप्रियः।
वज्रहस्तः सिद्धखड्गी नरसिंहनिपातनः॥९४॥

ब्रह्मचारी लोकचारी धर्मचारी धनादिपः।
नन्दी नन्दीश्वरो नन्दो लग्नवृत्तिधरः शुचिः॥९५॥

लिङ्गाध्यक्षः सुराध्यक्षो योगाध्यक्षो युगावहः।
स्वर्धामा स्वर्गतः स्वामी स्वरः स्वरतमस्वनः॥९६॥

बोधाध्यक्षो बीजकर्ता धर्मकृद्धर्मसम्भवः।
दम्भो लोभोथ वै शम्भुसर्वभूतमहेश्वरः॥९७॥

श्मशाननिलयस्त्र्यक्षः सेतुरप्रतिमाकृतिः।
लोकोत्तरः स्फुटालोकस्त्र्यम्बको नागभूषणः॥९८॥

अन्धकारिर्मयद्वेषी विष्णोः स्कन्धरतात्मकः।
हितदश्च क्षयगुणो दक्षारिः पूषदन्तभित्॥९९॥

पूर्जनिः खण्डपरशुः सकलो निष्कलो मुनिः।
अकालः सकलाधारः पाणडुरोगो मृगोनगः॥१००॥

पूर्णः पूरयिता पुण्यः सुकुमारः सुलोचनः।
सङ्गे गोपप्रियाक्रूरः पुण्यकीर्तिरनामयः॥१०१॥

मनोजवस्तीर्थकरो जटिलोजीवितेश्वरः
जीवितान्तकरो नित्यो वसुरेता वसुप्रदः॥१०२॥

सुजातिः सत्कृतिः सिद्धिः सजातिः कालकण्टकः।
कलाधरो महाकालभूतः सत्यपरायणः॥१०३॥

लोकलावण्यकर्ता च लोकोत्तरसुखालयः।
तेजोमयो द्युतिधरोलोकमानाग्रणीरणुः॥१०४॥

शुचिस्मितः प्रसन्नात्मा अजेयो दुरतिक्रमः।
ज्योतिर्मयोनीरुजाङ्गेगङ्गप्रेष्ठोजलेश्वरः॥१०५॥

तुम्बवीणोमहाकायोविशोकः शोकनाशनः।
त्रिलोकपात्रिालोकेशः सर्वशुद्धिरधाद्वक्षजः॥१०६॥

अव्यक्तलक्षणो देवो व्यक्तोऽव्यक्तोविशांपतिः
परः शिवोवसुर्नासा सारोमानन्दनोमयः॥१०७॥

ब्रह्मविष्णु प्रजापालोहंसोहंसगतिर्वयः।
वेधाविधातास्त्रष्टा च संहर्ता च चतुर्मुखः॥१०८॥

कैलासशिखरावासीसर्वावासीसदागतिः।
हिरण्यगर्भोद्रुहिणोभूतनाथोऽथभूपतिः॥१०९॥

सद्योगीयोगविद्योगी वरदो ब्राह्मणप्रियः।
देवप्रियो देवनाथो देवको देवचिन्तकः॥११०॥

विषमाक्षो विरूपाक्षो वृषभो वृषवर्धनः।
निर्ममो निरहङ्करो निर्मोहो निरुपद्रवः॥१११॥

दर्पह दर्पदो हाप्तः सर्वार्थपर्वरिवर्तकः।
सहस्त्रजित्सहस्त्रार्चिः स्निग्धप्रकृतिदक्षिणः॥११२॥

भूतभव्यभवोनार्थ प्रभवोऽभूतिनाशनः।
अर्थोनर्थो महाकोशः परकार्येकपण्डितः॥११३॥

निष्कण्टकः कृतानन्दो निर्व्याजो व्याजमर्दनः।
सत्त्ववान् सात्यकिः सत्यः कीर्तिस्नेहः कृतागतः॥११४॥

अकम्पितो गुणग्राही नैकात्मा नैककर्मकृत्।
सुप्रीतः सुमुखः सूक्ष्मः सुकरो दक्षिणानिलः॥११५॥

नन्दिस्कन्धरो धुर्यः प्रकटः प्रीतिवर्द्धनः।
अपरजितः सर्वसत्त्वो गोविन्दः सत्त्ववाहनः॥११६॥

अधृतः स्वधृतः सिद्धः पूतमूर्तिर्यशोधनः।
वाराहभृङ्गधृक् शूरो बलवानेकनायकः॥११७॥

श्रुतिप्रकाशः श्रुतिमानेकबन्धुरनेककृत्।
श्रीवत्सलः शिवारम्भः शान्ताभद्रः समो यशः॥११८॥

भूषयो भूषणो भूतिर्भूतकृद्भूतिभावनः।
अकम्पो भक्तिकायस्तु कालहा निष्कलेश्श्वरः॥११९॥

सत्यव्रतो महात्यगी नित्यशान्तिः परायणः।
परार्थवृत्तिर्वरदो विक्षुस्तुव विशारदः॥१२०॥

शुभदः शुभकर्ता च शुभनामा शुभः स्वयम्।
अनर्थितो गुणग्राही ह्यकर्ता कनकप्रभः॥१२१॥

स्वभावभद्रो मध्यस्थः शत्रुघ्नो वीध्ननाशनः।
शिखण्डी कवची शूली जटी मुण्डी च कुण्डली॥१२२॥

अमृत्युः सर्वदृक् सिंहस्तेजोराशिर्महामणिः।
असंयेयोप्रमेयात्मा वीर्यवान् वीर्यकोविदः॥१२३॥

वैद्यश्वैव वियोगी च सप्तवीरो मुनीश्श्वरः।
अनुक्रमे दुराधर्षो मधुरः प्रियदर्शनः॥१२४॥

सुरेशस्तारणः शर्वश्शब्दः प्रतपताङ्गतिः।
कालक्षयः कालकारी सुकृतिः कृतवासुकिः॥१२५॥

महेष्वासो महीभर्ता निष्कलङ्को विश्रृङ्खलः।
द्युमणिस्तरणिर्द्धन्यः सिद्धिदः सिद्धिसाधनः॥१२६॥

विवृत्तः संवृतस्तुल्यो व्यूढोरस्को महाभुजः।
सर्वयोनिर्निरातङ्को नरनारायणप्रियः॥१२७॥

निर्लेपो निप्रसङ्गत्मा निर्व्यङ्गो व्यङ्गनाशनः।
स्तव्यः स्तवप्रियः स्तोता व्याप्तमूर्तिर्निराकुलः॥१२८॥

निरवद्यपदोपायो विद्यराशिरसत्कृतः।
प्रशान्तबुद्धिरक्षुण्णः सम्प्रहा नित्यसुन्दरः॥१२९॥

पापहा धर्मधात्रीशाः साकल्यः शर्वरीपतिः।
परमार्यगुरुर्द्दष्टिः सुरैराश्रितवत्सलः॥१३०॥

सोमो रसज्ञो रसदः सर्वसत्त्वावलम्बनः।
एवं नाम्नां सहस्त्रेण तुष्टाव वृषभध्वजम्॥१३१॥

प्रार्थयामास शम्भुर्वै पूजयामास शङ्करम्।
परीक्षार्थं हरेरीशः कमलेषु महेश्वरः॥१३२॥

गोपयामास कमलं तदेकं भुवनेश्वरः।
हृदि विचारितं तेन कुतो वै कमलं गतम्॥१३३॥

यातुया तु सुखेनैव नेत्रं किं कमलन्न हि।
तदेवकमलं कृत्वा यजामि चन्द्रशेखरम्॥१३४॥

इत्येवं हृदयं ज्ञात्वा विष्णोरमिततेजसः।
मामेति व्याहरन्नेव प्रादुरासीज्जगद्गुरुः॥१३५॥

यत्रैव च कृता पूजा कृष्णेन परमात्मना।
तस्मादवताराशु मण्डलात्पार्थिवस्य सः॥१३६॥

यथोक्तरूपिणं शम्भुं तेजोराशिसमुत्थितम्।
नमस्कृत्य पुरः स्थित्वा स्तुतिं कृत्वा विशेषतः॥१३७॥

प्रसन्नवदनो भूत्वा शम्भोश्च सम्मुखे स्थितः।
इत्थं भूतं हरिर्दृष्ट्वा कोटिभास्कर भूषितम्॥१३८॥

प्रणमामीश्श्वरं शम्भुं देवदेव जनार्द्दनः।
तदा प्राह महादेवः प्रहसन्निव शङ्करः॥१३९॥

संप्रेक्षमाणो विष्णुन्तु कृताञ्जलिपुटस्थितम्॥१४०॥

शङ्कर उवाच।

ज्ञातं मयेदं सकलं देवकार्य जनार्द्दन।
सुदर्शनाख्यं चक्रं च ददामि तव शोभनम्॥१४१॥

यद्रूपं भवता हष्टं सर्वलोकसुखावहम्।
हिताय सर्वदेवेश कृतं भावय सुव्रत॥१४२॥

रणादावपि संस्मृत्य देवानां दुःखनाशनम्।
इदं रूपमिदं चक्रमिदं नामसहस्त्रकम्॥१४३॥

ये श्रृण्वन्ति सदाभक्त्यासिद्धिः स्यादनपायिनी।
एवमुक्त्वाददौचक्रंसूर्यायुतसमप्रभम्॥१४४॥

विष्णुरपि च संस्त्राय जग्राहोदङ्मुखस्तदा।
नमस्कृत्यतदा देवं पुनर्वचनमब्रवीत्॥१४५॥

श्रृणु देव मया ध्येयं पठनीयं च किं प्रभो।
लोकानां दु:खनाशार्थं वदत्वं लोकशङ्कर॥१४६॥

इति पृष्टस्तदा तेन सन्तुष्टस्तु शिवोऽब्रवीत्।
रूपं ध्येयं मदीयं वै सर्वानार्थविनाशनम्॥१४७॥

अनेकदु:खनाशार्थं पाठ्यं नामसहस्त्रकम्।
धार्यं चक्रं सदामेद्य सर्वानर्थप्रशान्तये॥१४८॥

अन्ये च ये पठिष्यन्ति पठिष्यन्ति नित्यश:।
तेषां दु:खं न स्वन्पेपि जायते नात्र संशय:॥१४९॥

राज्ञां च सङ्कटे प्राप्ते शतवारं पठेद्यदि।
साङ्गं च विधियुक्तं च कल्याणं लभते नर:॥१५०॥

रोगनाशकरं चैतद्विद्यानायकमुत्तमम्।
यमुद्दिश्य फलं श्रेष्ठं पठिष्यन्ति नरास्त्विह॥१५१॥

लप्स्यन्ते नात्र संदेह: फल सत्यमनुत्तमम्।
मम प्रात: समुत्थाय पूजां कृत्वा मदीयकम्॥१५२॥

पठते मत्समक्षं वै नित्यं सिद्धिर्न दूरत:।
ऐहिकां सिद्धिमासाद्य परलोकसमुद्भवाम्॥१५३॥

प्रान्योति पाठको नित्यं मत्प्रसादात्सुरेश्वर।
सायुज्यां मुक्तिमायाति नात्र कार्या विचारणा॥१५४॥

एवमुक्त्वा तदा विष्णु शङ्कर: प्रीतमानस:।
उपस्पृश्य कराभ्यां हि उवाच शङ्कर: पुन:॥१५५॥

वरदोस्मि सुरश्रेष्ठ वरान् वृणुयथेप्सितान्।
भक्त्या वशोकृतो नूनं स्तवेनानेन ते तदा॥१५६॥

इत्युक्तो देवदेवेन देवदेवं प्रणम्यतम्।
यथेदानीं कृपा देव क्रियते चाप्यत: परम्॥१५७॥

कार्या चैव विशेषेण कृपालुत्वात्त्वया प्रभो।
त्वयि भक्तिर्महादेव प्रसीदवरमुत्तमम्॥१५८॥

नान्यदिच्छामिभक्तानामार्तिर्नैव भवेत्प्रभो।
तच्छ्रुत्वावचनं तस्यदयावान् सुतसंभवः॥१५९॥

स्पर्शं च तदातस्मै श्रद्धां शीतांशुलक्षणः।
प्राहत्वैनंमहादेवः परमानन्दमच्युत्म्॥१६०॥

मयिभक्तिश्चवन्द्यश्च पूज्यश्चैव सुरैरपि।
विश्वम्भरस्त्वदीयं वै नाम पापहरं परम्॥१६१॥

भविष्यति न संदेहोमत्प्रसादात्सुरोत्तम।
इत्युक्त्वान्तर्दधे रुद्रो भगवान्नीललोहितः॥१६२॥

जनार्द्दनोपि भगवान् वचनाच्छङ्करस्य च।
प्राप्य चक्रं शुभं ध्यानं स्तोत्रमेतन्निरन्तरम्॥१६३॥

पपाठाध्यापयामास भक्तैस्तदुपपादितम्।
अन्येऽपि ये पठिष्यन्ति ते विन्दन्तु तथा फलम्॥१६४॥

इति पृष्ठं समायातं श्रृण्वतां पापहारकम्।
अतः परं च किं श्रेष्ठाः कथयामि वचः पुनः॥१६५॥

इति श्रीशिवसहस्त्रनामस्तोत्रं सम्पूर्णम्।

अथ मृत्युञ्जयकवच प्रारम्भः।

भैरव उवाच। श्रृणुष्वपरमेशानि कवचं मन्मुखोदितम्।
महामृत्युञ्जयस्यास्य न देयं परमाद्भुतम्॥१॥

यं धृत्वा यं पठित्वा च यं श्रुत्वा कवचोत्तमम्।
त्रैलोक्याधिपतिर्भूत्वा सुखितोऽस्मि महेश्श्वरि॥२॥

तदेव वर्णयिष्यामि तव प्रीत्यावरानने।
तथापि परमं तत्त्वं न दातव्यं दुरात्मने॥३॥

विनियोगः ॐ अस्य श्री महामृत्युञ्जयकवचस्य श्रोभैरवऋषिः। गायत्रीछन्दः।

श्रीमृत्युञ्जय रुद्रो देवता।

ऊँ बीजम्। जूं शक्तिः। सः कीलकम्।

हौं इति तत्त्वम्।

चतुर्वर्गफलसाधने पाठे विनियोगः।

ऊँ चन्द्रमण्डल मध्यस्थे रुद्रमाले विचित्रिते।
तत्रस्थं चिन्तयेत्साध्यं मृत्युं प्राप्तोपि जीवति।।४।।

ऊँ जूं सः हौं शिरः पातु देवो मृत्युञ्जयो मम।
श्रीशिवो वै ललाटं च ऊँ हौं भ्रुवौ सदाशिवः।।५।।

नीलकण्ठोऽवतान्नेत्रे कपर्द्दी मेऽवताच्छ्रुती।
त्रिलोचनोऽवतां गण्डौ नासां मे त्रिपुरान्तकः।।६।।

मुखं पीयुषघटभृदोष्टौ मे कृत्तिकाम्बरः।
हनुं मे हाटकेशानो मुखं वटुकभैरवः।।७।।

कन्धरां कालमथनो गलं गणप्रियोऽवतु।
स्कन्धौ स्कन्दपिता पातु हस्तौ मे गिरिशोऽवतु।।८।।

नखान्मे गिरिजानाथः पायादंगुलिसंयुतान्।
स्तनौ तारापतिः पातु वक्षः पशुपतिर्मम।।९।।

कुक्षिं कुबेरवदनं पार्श्वौ मे मारशासनः।
शर्वः पातु तथा नाभिं शूलीं पृष्ठं ममाऽवतु।।१०।।

शिश्नं मे शङ्करः पातु गुह्यं गुह्यकवल्लभः।
कटिं कालान्तकः पायादूरू मेंधकघातकः।।११।।

जागरूको:वताज्जानू जंघे मे कालभैरवः।
गुल्फौ पायाज्जटाधारी पादौ मृत्युञ्जयोऽवतु।।१२।।

पादादिमूर्द्धपर्यन्तं सद्योजातो ममावतु।
रक्षाहीनं नामहीनं वपुः पात्वमृतेश्वरः।।१३।।

पूर्वे बलविकरणो दक्षिणे कालशासनः।
पश्चिमे पार्वतीनाथ उत्तरे मां मनोन्मनः।।१४।।

ऐशान्यामीश्वरः पायादाग्नेयामग्निलोचनः।
नैर्ऋत्यां शंम्भुरव्यान्मां वायव्यां वायुवाहनः॥१५॥

ऊर्ध्वं बलप्रमथनः पाताले परमेश्वरः।
दशदिक्षु दास पातु महामृत्युञ्जयश्च माम्॥१६॥

रणे राजकुले द्यूते विषमे प्राणसंशये।
पायादोजूं महारुदो देवदेवो दशाक्षरः॥१७॥

प्रभाते पातु मां ब्रह्मा मध्याह्ने भैरवोऽवतु।
सायं सर्वेश्वरः पातु निशायां नित्यचेतनः॥१८॥

अर्धरात्रे महादेवो निशान्ते मां महोदयः।
सर्वदा सर्वतः पातु ॐ जूं सः हौं मृत्युञ्जयः॥१९॥

इतीदं कवचं पुण्यं त्रिषु लोकेषु दुर्लभम्।
सर्वमन्त्रमयं गुह्यं सर्वतन्त्रेषु गोपितम्॥२०॥

पुण्यं पुण्यप्रदं दिव्यं देवदेवादिदैवतम्।
य इदं च पठेन्मन्त्रं कवचं वाचयतेत्रतः॥२१॥

तस्य हस्ते महादेवि त्र्यम्बकस्याष्टसिद्धयः।
रणे धृत्वा चरेद्युद्धं हत्वा शत्रुञ्जयं लभेत्॥२२॥

जपं कृत्वा गृहे देवि संप्राप्स्यति सुखं पुनः।
महाभये महारोगे महामारीभये तथा।
दुर्भिक्षे शत्रुसंहारे पठेत्कवचमादरत्॥२३॥

इति श्रीमहामृत्युञ्जयकवचं समाप्तम्।

इति श्रीमन्त्रमहार्णवे देवताखण्डे शिवतन्त्रे षष्ठस्तरङ्गः॥६॥

Appendix VII

शिवमन्त्र पुरश्चरण प्रकरणम्॥

कैलासाद्रिनिभं शशाङ्कशकलस्फूर्जज्जटामण्डितं नासालोकनतत्परं त्रिनयनं वीरासनाध्यासितम्॥

मुद्राटङ्ककुरङ्गजानुविलसत्पाणिं प्रसन्नाननं कक्षाबद्धभुजङ्गमं मुनिवृतं वन्दे महेशं परम्॥१॥

अथ वक्ष्ये महेशस्य मन्त्रान्सर्वार्थ सिद्धिदान्।
यैः पूर्वमृषयः प्राप्ताः शिवसायुज्यमञ्जसा॥२॥

तत्रादौ शिवस्य सर्वमन्त्रारम्भप्रयोगः॥

शिवालयादिषु यथावज्जपस्थानं प्रकल्प्य पूर्वदिनं प्राश्श्वित्तादि कृत्वा आरम्भदिने प्रातर्नित्यावश्यकं समाप्य स्वासने प्राङ्मुख उदङ्मुखो वा शिवसन्निधौ उपविश्य भस्मत्रिपुण्ड्र रुद्राक्षधारणं च कुर्यात्॥

ततः आचम्य प्राणानायम्य देशकालौ संकीर्त्य मम सर्वपापनिवृत्तिपूर्वकम-मुककमनासिद्धये श्रीसदाशिवप्रीतये शिवस्यामुकमन्त्रजपपुरश्चरणं करिष्ये तदङ्गत्वे भूतशुद्धिं प्राणप्रतिष्ठां मातृकान्यासं श्रीकंठादिकलान्यासं च करिष्ये इति च संकल्प्य पूवोक्तपद्धतिमार्गेण बहिर्मातृकान्यासान्तं कृत्वा श्रीकण्ठा-दिकलामातृकान्यासंकुर्यात्। तद्यथा-अस्य श्रीकण्ठादिकलान्यासस्य दक्षिणामूर्ति-र्कषिः। गायत्रीछदः।

अर्धनारीश्वरो देवता। हलो बीजानि।

स्वराःशक्तश्यचतुर्विधपुरुषार्थसिद्ध्यर्थे न्यासे विनियोगः।

ॐ दक्षिणामूर्तिऋषये नमः शिरसि॥१॥

ॐ गायत्रीछन्दसे नमः मुखे॥२॥

ॐ अर्धनारीश्वरदेवतायै नमः हृदये॥३॥

ॐ हलबीजाय नमः गुह्ये॥४॥

ॐ स्वरश क्तये नमः पादयोः।।५।।

ॐ हूमूं मध्यमाभ्यां नमः पादयोः।।६।।

इति ऋष्यादि न्यासः।

ॐ ह्रां अङ्गुष्ठाभ्यां नमः।।१।।

ॐ ह्री तर्जनीभ्यां नमः।।२।।

ॐ हूसूं मध्यमाभ्यां नमः।।३।।

ॐ ह्रैं अनामिकाभ्यां नमः।।४।।

ॐ ह्रौं कनिष्ठिकाभ्यां नमः।।१।।

ॐ ह्रीं तर्जनीभ्यां नमः।।२।।

ॐ हूसूं मध्यमाभ्यां नमः।।३।।

ॐ ह्रैं अनामिकाभ्यां नमः।।४।।

ॐ ह्रौं कनिष्ठिकाभ्यां नमः।।५।।

ॐ ह्रः करतलकरपृष्ठाभ्यां नमः।।६।।

इति करन्यासः।। ॐ ह्रां हृदयाय नमः।।१।।

ॐ ह्रौं शिरसे स्वाहा।।२।।

ॐ हूसूं शिखायै वषट्।।३।।

ॐ ह्रें कवचाय हुं।।४।।

ॐ ह्रौं नेत्रत्रयाय वौषट्।।५।।

ॐ ह्रः अस्त्रायः फट्।।६।।

इति षडङ्गन्यासः।।

अथ ध्यानम् ''पाशाङ्कुशवाराक्षस्त्रक्पाणिशीतांशुशेखरम्।।
त्र्यक्षं रक्तसुवर्णाभमर्धनारीश्वरं भजे।।१।।

बन्धूककाञ्चननिभं रुचिराक्षमालां पाशाङ्कुशौ च वरदं निज बाहुदण्डैः।।

बिभ्राणमिन्दुशकलाभरणं त्रिनेत्रमर्धाम्बिकेशमनिशं वपुराश्रयाम्॥१॥''

इति ध्यात्वा श्रीकण्ठाद्यान् न्यसेत्॥

ॐ ह्रौं अं श्रीकण्ठेशापूर्णेदरीभ्यां नमो मस्तके॥१॥

'प्रणवमादौ सर्वत्र'॥

ॐ ह्रौं आं अनन्तेशविरजाभ्यां नमः आननवृत्ते॥२॥

ॐ ह्रौं इं सूक्ष्मेश शल्मलीभ्यां नमः दक्षिणनेत्रे॥३॥

ॐ ह्रों ई त्रिमूर्तिलोलाक्षिभ्यां नमो वामनेत्रे॥४॥

ॐ ह्रौ उं अमरेश वर्तुलाक्षीभ्यां नमो दक्षकर्णे॥५॥

ॐ ह्रौ ऊ अर्धीशदीर्घघौ णाभ्यां नमो वामकर्णे॥६॥

ॐ ह्रौ ऋं भारमूतीशादीर्घमुखीभ्यां नमो दक्षनासापुटे॥७॥

ॐ ह्रौं ॠं तिथीशगोमुखीभ्यां नमो वामनासापुदे॥८॥

ॐ ह्रौं ऌं स्थाण्वीशदीर्घजिह्वाभ्यां नमो दक्षगण्डे॥९॥

ॐ ॡं हरेशकुण्डोदरीभ्यां नमः वामगण्डे॥१०॥

ॐ ह्रौं एं झिण्टीशोर्ध्वकेशीभ्यां नमः ऊर्ध्वोष्ठे॥११॥

ॐ ह्रौं ऐं भौतिकेशविकृतमुखीभ्यां नमः अधरोष्ठे॥१२॥

ॐ ह्रौं ओं सद्योजातेशज्वालामुखीभ्यां नम ऊर्ध्वदन्तापङ्कौ॥१३॥

ॐ ह्रौं औं अनुग्राहेशोल्कामुखीम्यां नमः अधोदन्तपङ्क्तौ॥१४॥

ॐ ह्रौं आं अक्रूरेशश्रीमुखीभ्यां नमः शिरसि॥१५॥

ॐ ह्रौं अः महासेनेशविद्यामुखीभ्यां नमः मुखमध्ये॥१६॥

ॐ ह्रौं कं क्रोधीशमहाकालीभ्यां नमः दक्षस्कन्धे॥१७॥

ॐ ह्रौं खं चण्डेशसरस्वतीभ्यां नमः दक्षकूर्परे॥१८॥

ॐ ह्रौं गं पञ्चान्तकेशसर्वसिद्धिगौरीभ्यां नमः दक्षमणिबन्धे॥१९॥

ॐ ह्रौं घं शिवोत्तमेशात्रैलोक्यविध्याभ्यां नमः दक्षाङ्गुलिमूले॥२०॥

ॐ ह्रौं ङं एकरुद्रेशामन्त्रशक्तिभ्यां नमः दक्षाङ्गुल्यग्रे॥२१॥

ॐ ह्रौं च कूर्मेशात्मशक्तिभ्यां नमः वामस्कन्धे॥२२॥

ॐ ह्रौं छं एकनेत्रेशमूलमातृकाभ्यां नमः वामकूपरे॥२३॥

ॐ ह्रौं जं चतुराननेशलम्बोदरीभ्यां नमः वामस्कत्धे॥२४॥

ॐ ह्रौं झं अजेश द्रविणाभ्यं नमः वामाङ्गुलिमूले॥२५॥

ॐ ह्रौं त्रं सर्वेशानागरीभ्यां नमः वामाङ्गुल्यग्रेषु॥२६॥

ॐ टं सामेशखेचरीभ्मां नमः दक्षापादमूले॥२७॥

ॐ ह्रौं ठं लाङ्गलीश मञ्जरीभ्यां नमः दक्षजानुनि॥२८॥

ॐ ह्रौं डं दारुकेशारूपिणीभ्यां नमः दक्षंगुल्फे॥२९॥

ॐ ह्रौं ढं अर्धनारीशवीरिणीभ्यां नमः दक्षपादाङ्गुलिमूले॥३०॥

ॐ ह्रौं णं उमाकांतेशकाकोदरीभ्यां नमः दक्षाङ्गुल्यग्रे॥३१॥

ॐ ह्रौं तं आषाढीशापूतनाभ्यां नमः वामोरुमूले॥३२॥

ॐ ह्रौं थं दण्डीशभद्रकालीभ्यां नमः वामजानुनि॥३३॥

ॐ ह्रौ दं अत्रीशयोगिनीभ्या नमः वामगुल्फे॥३४॥

ॐ ह्रौं धं मीनेशाशङ्खनीभ्यां नमः वामापादाङ्गुलिमूले॥३५॥

ॐ ह्रौं नं मेषेशतर्जनीभ्यां नमः वामपादाङ्गुल्यग्रे॥३६॥

ॐ ह्रौं पं लोहितेशकालरात्रिभ्यां नमः दक्षकुक्षौ॥३७॥

ॐ ह्रौं फं शिखीशकुब्जिनीभ्यां नमः वामकुक्षौ॥३८॥

ॐ ह्रौं बं छगलाण्डेशकपर्दिनीभ्यां नमः पृष्ठे॥३९॥

ॐ ह्रौं भं द्विरण्डेशवज्रभ्यां नमः नाभौ॥४०॥

ॐ ह्रौं मं मंहाकालेशजयाभ्यां नमः उदरे॥४१॥

ॐ ह्रौं यं त्वगात्मभ्यां वालीशसुमुखेश्वरीभ्यां नमः हृदये॥४२॥

ॐ हों रं असृगात्मभ्यां भुजंगेशरेवतीभ्यां नमः दक्षांसे॥४३॥

ॐ हौं लं मांसात्मभ्यां पिनाकीशमाधवीभ्यां नमः ककुदि॥४४॥

ॐ हौं वं मेदसात्मभ्यां खड्गीशवारुणीभ्यां नमः हदयादिवामांसे॥४५॥

ॐ शं अस्थ्यात्मभ्यां केशवायवीभ्यां नमः हृदयादिदक्षकराग्रान्तम्॥४६॥

ॐ हौं पं मज्जात्मभ्यां श्वेतेशरक्षोविदारिणीभ्यां नमः हृदयादिकराग्रन्तम्॥४७॥

ॐ हौं सं शुक्रात्मभ्यांभृग्वीशसहजाभ्यां नमः हृदयादियामपादाग्रान्तम्॥४८॥

ॐ हौं ळं प्राणात्मभ्यांभृग्वीशसहजाभ्यां नमः हृदयादिक्षपादन्तम्॥४९॥

ॐ हौं ळं भक्त्यात्मभ्यां शिवेश व्यापिनीभ्यां हृदयादिनाभ्यन्तम्॥५०॥

ॐ हौं क्षं परमात्मभ्यां संवर्तकेशमायाभ्यां नमः॥
हृदयादिशिरोऽन्तम्॥५१॥

एवं श्रीकण्ठादिकलान्यासं कृत्वा ध्यायेत्।
"अत्र रुद्राः स्मृता रक्ता धृतशूलकपालकाः॥
शक्त्ये रुद्रपीठस्थाः सिन्दूरारुणविग्रहाः॥

रक्तोत्पलकपालाभ्यामलंकृतकराम्बुजाः" इत ध्यात्वा मृलमन्त्रेण प्राणायामं कुर्यात्॥ इति श्रीकण्ठादिन्यासः॥

अयं न्यासः सर्वशिवमन्त्रेषु ज्ञेयः॥

अथ शिवपञ्चाक्षरमन्त्रपुरश्चरणप्रयोगः॥

तत्र मन्त्रन्यासं कुर्यात्॥

इति श्रीकण्ठादिन्यासः॥

अयं न्यासः सर्वशिवमन्त्रेषु ज्ञेयः॥

अथ शिवपञ्चाक्षरमन्त्रपुरञ्चारणप्रयोगः॥

तत्र मन्त्रन्यासः अस्य श्रीशिवपञ्चक्षरमन्त्रस्य वामदेव ऋपिः। पङ्क्तिश्छन्दः॥ सदाशिवो देवता॥

ॐ बीजम्। नमः शक्तिः। शिवायेति कीलकम्।

चतुर्विधपुरुषार्थसिध्यर्थे न्यासे विनियोगः।

ॐ वामदेवऋषये नमः शिरसि॥१॥

ॐ पङ्क्तिच्छन्दसे नमः मुखे॥२॥

ॐ श्रीसदाशिवदेवतायै नमः हृदये॥३॥

ॐ बीजाय नमः गुह्ये॥४॥

ॐ शक्त्ये नमः पादयो॥५॥

ॐ शिवाय कीलकाय नमः सर्वाङ्गे॥६॥

इति ऋष्यादिन्यासः॥

अथ करन्यशसः ॐ ॐ अङ्गुष्ठाभ्यां नमः॥१॥

ॐ नं तर्जनीभ्यां नमः॥२॥

ॐ मं मध्यमाभ्यां नमः॥३॥

ॐ शिं अनामिकाभ्यां नमः॥४॥

ॐ वा कनिष्ठिकाभ्यां नमः॥५॥

ॐ यं करतलकरपृष्टाभ्यां नमः॥६॥

अथ हृदयादिन्यासः॥

ॐ ॐ हृदयाय नमः॥१॥

ॐ नं शिरसे स्वाहा॥२॥

ॐ मं शिखायै वषट्॥३॥

ॐ शिं कवचाय हुम्॥४॥

ॐ वां नेत्रत्रयाय वौषट्॥५॥

ॐ यं अस्त्राय फट्॥६॥

अथ पञ्चमूर्तिन्यासः।

ॐ नं तत्पुरूषाय नमः इति तर्जन्याम्॥१॥

ॐ मं अघोराय नमः मध्यमायाम्॥२॥

ॐ शिं सद्योजाताय नमः कनिष्टि कायाम्॥३॥

ॐ वां वामदेवाय नमः गुह्ये॥४॥

ॐ यं ईशानाय नमः मूर्न्धि॥५॥

ॐ नं तत्पुरुषाय नमः पूर्ववक्त्रे॥१॥

ॐ मं अघोराय नमः दक्षिणवक्त्रे॥२॥

ॐ शिं सद्योजाताय नमः पश्चिमवक्त्रे॥३॥

ॐ वां वामदेवाय नमः उत्तरवक्त्रे॥४॥

ऊ यं ईशनाय नमः इत्यूर्ध्ववक्त्रे॥५॥

अथ वक्त्रमयासः॥ ॐ ॐ नमः हृदये॥१॥

अथ गोलकन्यासः॥

ॐ ॐ नमः हृदये॥१॥

ॐ नं नमः वक्त्रे॥२॥

ॐ मं नमः दक्षांसे॥३॥

ॐ शिं नमः वामांसे॥४॥

ॐ वां नमः दक्षिणोरौ॥५॥

ॐ यं नमः वामोरौ॥६॥

इति प्रथम न्यासः॥१॥

ॐ ॐ नमः कण्ठे॥१॥

ॐ नं नमः नाभौ॥२॥

ॐ मं नमः दक्षिणपा र्श्वे॥३॥

ॐ शिं नमः वामपार्श्वे॥४॥

ॐ वां नमः पृष्ठे॥५॥

ॐ शिं नमः हृदये॥६॥

ॐ द्वितीयो न्यास॥

ॐ ऊँ नमः मूर्ध्नि॥१॥

ॐ ऊँ नमः मुखे॥२॥

ॐ ऊँ नमः दाक्षिण नेत्रे॥३॥

ॐ शिं नमः वामनेत्रे॥४॥

ॐ वां नमः दक्षिणनासा पुदे॥५॥

ॐ यं नमः वामनासापुटे॥६॥

इति तृतीयो न्यासः॥३॥

ॐ नं नमः हस्ताङ्गुल्यग्रेषु॥१॥

ॐ मं नमः हस्ताङ्गुलीमूलेषु॥२॥

ॐ शिं नमः मणिबन्धयोः॥३॥

ॐ वां नमः कूर्परयोः॥४॥

ॐ यं नमः बाहुमूलयोः॥५॥

इति चतुर्थो न्यासः॥४॥

ॐ नं नमः पादाङ्गुल्यग्रेषु॥१॥

ॐ मं नमः पादाङ्गुलीमूलेषु॥२॥

ॐ शिं नमः गुल्फयोः॥३॥

ॐ वां नमः जानुनोः॥४॥

ॐ यं नमः जङ्घयोः॥५॥

इति पञ्चमो न्यासः॥५॥

ॐ ऊँ नमः शिरसि॥१॥

ॐ नं नमः गुह्यो॥२॥

ॐ मं नमः हृदये॥३॥

ॐ शिं नमः कुक्षिद्वये॥४॥

ॐ वां नमः ऊरुद्वये॥५॥

ॐ यं नमः पादद्वये॥६॥

इति षष्टो न्यासः।

ॐ ॐ नमः हृदये॥१॥

ॐ नं नमो वक्त्राम्बुजे॥२॥

ॐ मं नमः टङ्के॥३॥

शिं नमः मृगे॥४॥

ॐ वां नमः अभये॥५॥

ॐ यं नमः करे॥६॥

इति सप्तमन्यासः॥७॥

ॐ ॐ नमः वक्त्रे॥१॥

ॐ नं नमः अंसयोः॥२॥

ॐ मं नमः हृदये॥३॥

ॐ शिं नमः पादद्वये॥४॥

ॐ वां नमः ऊरुद्वये॥५॥

ॐ यं नमः जठरे॥६॥

इत्यष्टमन्यासः॥८॥

ॐ नं तत्पुरुषाय नमः मूर्ध्नि॥१॥

ॐ मं अघोराय नमः भाले॥२॥

ॐ शिं सद्योजाताय नमः उदरे॥३॥

ॐ वां वामदेवाय नमः अंसयोः॥४॥

ॐ यं ईशानाय नमः हृदये॥५॥

इति नवमन्यासः॥९॥

''ॐ नमोऽस्तु स्थाणुभूताय ज्योतिर्लिङ्गमृतात्मने॥

चतुर्मूर्तिवपुःस्थायाभाषिताङ्गाय शम्भवे॥१॥

इति व्यापकं न्यसेत्॥१०॥

एवं दश न्यासान् कृत्वा पार्वतीपतिं ध्याथेत्॥

अथ ध्यानम् - ''ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रवतंसं।

रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहसतं प्रसन्नम्॥

पद्मासीनं समंतात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं।
विश्वाद्यं विश्वन्द्यं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम्॥१॥

''इति ध्यात्वा मानसोपचारैः संपूज्य शङ्खं विना अर्घ्येस्थापनादि पूर्ववत्कृत्वा पीठपूजां कुर्य्यात्॥

तद्यथा॥ शैवे पीठे-ॐ मण्डूकादिपरतत्वान्त देवताभ्यो नमः॥

इति पूवोक्तपीठदेवताः सम्पूज्य स्वा भ्यादिप्रादक्षिण्येन

ॐ वामा यै नमः

ॐ ज्येष्ठायै नमः॥२॥

ॐ रौद्रयै नमः॥३॥

ॐ काल्यै नमः॥४॥

ॐ कलविकरिण्यै नमः॥५॥

ॐ बलविकरिण्यै॥६॥

ॐ बलप्रमथिन्यै नमः॥७॥

ॐ सर्वभूतदमन्यै नमः॥८॥

(मध्ये) ॐ मनोन्मन्यै नमः॥९॥

इति पीठशक्तीः पृजयेत्॥ततः॥

ॐ नमो भगवते सकलगुणात्मशक्तियुक्तयाऽ नन्ताय योगपीठात्मने नमः॥

'इति मन्त्रेणासनं दत्त्वा तत्र ''ऊँ नमः शिवाय'' इति मूलमन्त्रेण मूर्तिं प्रकल्प्य 'अथवा स्वर्णमयीं संस्थाप्य' आवाहनादिपुष्पान्तैरुपचारैः (पूवोक्तमन्त्रैः) संपूज्य पुष्पाञ्जलिं दत्त्वा आवरणपूजां कुर्यात्॥ तद्यथा॥

कर्णिकायाम् ईशान्याम्-ऊँ ईशानाय नमः॥१॥

पूर्वे-ऊँ तत्पुरुषाय नमः॥२॥

दक्षिणे-ऊँ अघोराय नमः॥३॥

पश्चिमे-ऊँ वामदेवाय नमः॥४॥

उत्तरे-ऊँ सद्योजाताय नमः॥५॥

इति पञ्चमूर्त्तीः पूजयेत्॥

इति प्रथमावरणम्॥१॥

पुनः ईशानादिषु। ऊँ निवृत्यै नमः॥१॥

ऊँ प्रतिष्ठायै नमः॥२॥

ऊँ विद्यायै नमः॥३॥

ऊँ शान्त्यै नमः॥४॥

ऊँ शान्त्यतीतायै नमः॥५॥

इति कलाः पूजयेत्॥ इति द्वितीयावरणम्॥२॥

ततः पूर्वादिदिक्षु। ऊँ सूर्याय नमः॥१॥

ऊँ इन्दवे नमः॥२॥

ऊँ क्षित्यै नमः॥३॥

ऊँ तोयाय नमः॥४॥

ऊँ अग्नेय नमः॥५॥

ऊँ पवनाय नमः॥६॥

ऊँ आकाशाय नमः॥७॥

ऊँ यज्वने नमः॥८॥

इत्यष्टमूर्तीः पूजयेत्।। इति तृतीयावरणम्।।३।।

ततः पूर्वादिपत्रेषु। ॐ अनन्ताय नमः।।१।।

ॐ सूक्ष्माय नमः।।२।।

ॐ शिवोत्तमाय नमः।।३।।

ॐ एकनेत्राय नमः।।४।।

ॐ एकरुद्राय नमः।।५।।

ॐ त्रिमूर्त्तये नमः।।६।।

ॐ श्रीकण्ठाय नमः।।७।।

ॐ शिखण्डिने नमः।।८।।

इति विघ्नेशान् पूजयेत्।।

इति चतुर्थावरणम्।।४।।

तद्बाह्ये उत्तरादि क्रमेण। ॐ उमायै नमः।।१।।

ॐ चण्डेश्वराय नमः।।२।।

ॐ नन्दिने नमः।।३।।

ॐ महाकालाय नमः।।४।।

ॐ गणेशाय नमः।।५।।

ॐ वृषभाय नमः।।६।।

ॐ भृङ्गिरिटये नमः।।७।।

ॐ स्कन्दाय नमः।।८।।

इति गणान्पूजयेत्।।

इति पञ्चमावरणम्।।५।।

तद्बाह्ये भूपुरे पूर्वादिक्रमेण ॐ इन्द्राय नमः।।१।।

ॐ अग्नये नमः।।२।।

यमाय नमः॥३॥

ॐ निर्ऋतये नमः॥४॥

ॐ वरुणाय नमः॥५॥

ॐ वायवे नमः॥६॥

ॐ कुबेराय नमः॥७॥

ॐ ईशानाय नमः॥८॥

ईशानपूर्वयोर्मध्ये ॐ ब्रह्मणे नमः॥९॥

निर्ऋतिपश्चिमयोर्मध्ये ॐ अनन्ताय नमः॥१०॥

इति दिक्पालान् पूजयेत्॥

इति षष्ठावरणम्॥६॥

तद्बाह्ये पूर्वादिषु तत्तत्समीपे ॐ व्रजाय नमः॥१॥

ॐ शक्तयै नमः॥२॥

ॐ दण्डाय नमः॥३॥

ॐ खड्गाय नमः॥४॥

ॐ पाशाय नमः॥५॥

ॐ अङ्कुशाय नमः॥६॥

ॐ गदायै नमः॥७॥

ॐ त्रिशूलाय नमः॥८॥

ॐ पद्माय नमः॥९॥

ॐ चक्राय नमः॥१०॥

इत्यायुधानि संपूजयेत्॥

इति सप्तमावरणम्॥७॥

एवमावरणपूजां कृत्वा धूपदीपादिप्रार्थनान्तं तत्तन्मंत्रेण संपूजयेत्॥

ततस्तन्मनाश्चतुर्विंशतिलक्षात्मकं जपपुरश्वरणं कृत्वा जपान्ते तद्दशांशेन वा चतुर्विंशतिसहस्त्रमन्त्रैः पायसं त्रिमधुप्लुतं हुत्वा तद्दशांशोन दुग्धमिश्रजलेन तर्पणं कृत्वा तद्दशांशतो मार्ज्जनं तद्दशांशेन शुद्धान्विप्रांश्च पायसादिना भोजयेत्।

एवंकृते सिद्धो मन्त्रो भवति।

तत्सिद्धन्त्रेण सर्वार्थान्साधयेत्।

तथा च (शारदातिलके अष्टादशेपटले) ''ततः सिद्धो भवेन्मन्त्रः
साधकाभीष्टसिद्धिदः॥

इत्थं संपूजयेद्देवं सहस्त्रं नित्यशो जपेत्॥१॥

सर्वपापविनिर्मुक्तः प्राप्नुयाद्वञ्छितां श्रियम्॥
द्विसहस्त्रं जपेद्रोगन्मुच्यते नात्र संशयः॥२॥

त्रिसहस्त्रं जपेन्मन्त्रं दीर्घमायुरवाप्नुयात्॥
सहस्त्रवृध्या प्रजपेत्सर्वान्कामानवाप्नुयात्॥३॥

आज्यान्वितैस्तिलैः शुद्धैर्जुहुयाल्लक्षमादरात्॥
उत्पातजनितान्क्लेशान्नाशायेन्नात्र संशयः॥४॥

शत लक्षं जपेत्साक्षाच्छवो भवति मानवः।
''इति शिवपञ्चक्षरमन्त्रप्रयोगः॥

अथ अष्टाक्षरीशिवमन्त्रप्रयोगः॥

(शारदातिलके) तत्र मन्त्रस्वरूपम्

''ह्रीं ॐ नमः शिवाय ह्रीं'' इत्यष्टाक्षरो मन्त्रः॥

अस्याष्टाक्षरमन्त्रस्य वामदेव ऋषिः।

पङ्क्तिश्छिन्दः। उमापतिर्देवता।

सर्वेष्टसिद्धये जपे विनियोगः।

आथ ऋष्यादिन्यासः।

ॐ वामदेवऋषये नमः शिरसि॥१॥

ॐ पङ्क्तिच्छन्दसे नमः मुखे॥

ॐ उमाकान्तदेवतायै नमः हृदये॥३॥

अथ करन्यासः।

ॐ ॐ अङ्गुष्ठाभ्यां नमः॥१॥

ॐ नं तर्जनीभ्यां नमः॥२॥

ॐ मं मध्यमाभ्यां नमः॥३॥

ॐ शिं अनामिकाभ्यां नमः॥४॥

ॐ वां कनिष्ठिकाभ्यां नमः॥५॥

ॐ यं करतलकरपृष्टाभ्यां नमः॥६॥

अथ हृदयादिन्साय:॥

ॐ ॐ हृदयाय नमः॥१॥

ॐ नं शिरसे स्वाहा॥२॥

ॐ मं शिखयै वषट्॥३॥

ॐ शिं कवचाय हुम्॥४॥

ॐ वां नेत्रत्रयाय वौषट्॥५॥

ॐ यं अस्त्राय फट्॥६॥

ततो ध्यानम्-बन्धूकाभं त्रिनेत्रं शशि शकलधरं स्मेरवक्त्रं वहंतं हस्तैः शूलं कपालं वरदमभयदं चारुहारं नमामि॥ वामोरुस्तम्भगायाः करतलविलसच्चा-रुरक्तोत्पलं या हस्तेनाश्लिष्टदेहं मणिमयविलसद्भूषणायाः प्रियायाः॥१॥

ततः प्राक् प्रोक्ते शैवे पीठे पूर्ववत् वामादिनवशक्तीः संपूज्य ॐ सकल-गुणात्मशक्तियुक्तायानन्ताय योगापीठात्मने नमः॥ इत्यासनं दत्त्वा तत्र उमापति पुष्पान्तैरुपचारैः संपूज्य आवरणपूजां कुर्यात्॥

तद्यथा। केसरेषु अग्न्यादिकोणेषु मध्ये दिक्षु च॥

आग्नेय्यां ॐ ॐ हृदयाय नमः॥१॥

नैर्ऋत्यां ॐ नं शिरसे स्वाहा॥२॥

वायव्यां ऊँ मं शिखायै वषट्॥३॥

ईशान्यां ऊँ शिं कवचाय हुं॥४॥

मध्ये ऊँ वां नेत्रत्रयाय बौषट्॥५॥

दिक्षु ऊँ यं अस्त्राय फट्। इति पूजयेत्।

इति प्रथमावरणम्॥१॥

तद्बाह्ये मध्ये पूर्वादिदिक्षु च ऊँ हृल्लेखायै नमः॥१॥

ऊँ गगनायै नमः॥२॥

ऊँ रक्तायै नमः॥३॥

ऊँ करालिकायै नमः॥४॥

ऊँ महोच्छुष्मायै नमः॥५॥

इति द्वितीयावरणम्॥२॥

तद्बाह्ये पूर्वादिपत्रेषु॥ ऊँ वृषभाय नमः॥१॥

ऊँ क्षेत्रपालाय नमः॥२॥

ऊँ दुर्गायै नमः॥३॥

ऊँ कार्तिकेयाय नमः॥४॥

ऊँ नन्दिने नमः॥५॥

ऊँ विघ्नाय नमः॥६॥

ऊँ श्यामाय नमः॥७॥

ऊँ सेनापतये नमः॥८॥

इति पूजयेत्। इति तृतीयावरणम्॥३॥

ततः पत्राग्रोषु पूर्वादिक्रमेण ऊँ ब्राह्मै नमः॥१॥

ऊँ माहेश्वर्य्यै नमः॥२॥

ऊँ कौमार्यै नमः॥३॥

ॐ बैष्णव्यै नमः।।४।।

ॐ वाराह्यै नमः।।५।।

ॐ इन्द्राण्यै नमः।।६।।

ॐ चामुण्डायै नमः।।७।।

ॐ महालक्ष्मयै नमः।।८।।

इति चतुर्थावरणम्।।४।।

तदूाह्ये भूपुरे इन्द्रादीन् तद्बाह्ये वज्राद्यायुधानि च पूजयेत्। इत्यावरण पूजां कृत्वा धूपदीपादिनमस्कारान्तं कर्म्मं समाप्य चतुर्दशलक्षं मन्त्रं जपेत्।।

जपान्ते चतुर्दशसहस्त्रं यथाविधि मधुरासिक्तैरारग्वधैः समिद्भिः हौमं कुर्य्यात्।

ततः तद्दशांशोन तर्पणं तद्दशांशतो मार्च्चनं तद्दशांशोन ब्राह्मणभोजनं च कुर्यात् तथा च (शारदातिलके) ''मनुलक्षं जपेन्मन्त्रं तत्सहस्त्रं यथाविधि।।
जुहुयान्मधुरासिक्तैरारग्वधसमिद्धरैः।।१।।

एवं यो भजते मन्त्री देवेशं तमुमापतिम्।।'

स भवेत्सर्वलोकानां प्रियः सौभाग्यसंपदाम्।।२।।

इत्यष्टाक्षरीशिवमन्त्रप्रयोगः।।

अथ त्र्यक्षरीमृत्युंजयमंत्रप्रयोगः।।

अस्य श्रीत्र्यक्षरात्मकमृत्युंजयमंत्रस्य

कहोलऋषिर्गायत्रीछंदः।।

मृत्युंजयो महादेवो देवता।

जूँ बीजम्। सः शक्तिः।

सर्वेष्टसिध्यर्थेजपे विनियोगः।।

ॐ कहोलऋषये नमः शिरसि।।१।।

ॐ गायत्रीछन्दसे नमः मुखे।।२।।

ॐ मृत्युंजयदेवतायै नमः हृदये।।३।।

ऊँ जूं बीजाय नमः गुह्ये॥४॥

ऊँ सः शक्त्ये नमः पादयोः॥५॥

इति ऋष्यादिन्सायः।

अथ करन्यासः।

ऊँ सां अङ्गुष्ठाभ्यां नमः॥१॥

ऊँ सीं तर्जनीभ्यां नमः॥२॥

ऊँ सूं मध्यमाभ्यां नमः॥३॥

ऊँ सैं अनामिकाभ्यां नमः॥४॥

ऊँ सौं कनिष्ठिकाभ्यां नमः॥५॥

ऊँ सः करतलकरपृष्ठाभ्यां नमः॥६॥

एवं हृदयादिन्सायं कुर्यात्।

अथ ध्यानम् ''चन्द्रार्काग्निविलोचनं स्मितमुखं पद्मद्वयान्तः स्थितं मुद्रापाश-मृगाक्षसूत्रविलसत्पाणिं हिमांशुप्रभम्॥ कोटीरेन्दुगलत्सुधाप्लुततनुं हारादिभूषोज्ज्वलं कांत्या विश्वविमोहनं पशुपतिं मृत्युंजयं भावयेत्॥१॥

पूर्वोक्ते शैवे पीठे मूलेन मूर्ति प्रकल्प्य तत्र मृत्युंजयं महादेवं पुष्पानतैरुपचारैः संपूज्य आवरणपूजां कुर्यात्। तद्यथा। केशरेषु आग्नेयादिकोणेषु मध्ये दिक्षु च।

ऊँ सां हृदयाय नमः॥१॥

ऊँ सीं शिरसे स्वाहा॥२॥

ऊँ सं् शिखायै वषट्॥३॥

ऊँ सैं कवचाय हुम्॥४॥

ऊँ सौं नेत्रत्रयाय वौषट्॥५॥

ऊँ सः अस्त्राय फट्॥६॥

ऊँ इत्यङ्गानि जपेत्॥७॥

इति प्रथमावरणम्॥

तद्बाह्ये इन्द्रादीन् वज्रादींश्च संपूजयेत्।

ततो धूपादिनमस्कारान्तं समाप्य लक्षत्रयं जपं कुर्यात्।

ततस्तद्दशांशेन दुग्धाज्यलोलितैरमृताखण्डैर्होमं कृत्वा तद्दशाशतस्तर्पणमार्ज्जन-
ब्राह्मणभोजनानि पूर्ववत् कृत्वा सिद्धे मन्त्रे प्रयोगान् कुर्यात्।

तद्यथा - ''दुग्धयुक्तैः सुधाखण्डैर्मन्त्री मासं सहस्त्रकम्॥
आराधितेऽग्नौ जुहुयाद्विधिवद्विजितेन्द्रियः॥१॥

संतुष्टः शंकरस्तेन सुधाप्लावितविग्रहः॥
आयुरारोग्यसंपत्तियशः पुत्रान्विवर्द्धयेत्॥२॥

सुधावटौ तिला दूर्वा पयः सर्पिः पयो हविः॥
इत्युक्तैः सप्तभिर्द्रव्यैर्जुहुयात्सप्तवासरम्॥३॥

क्रमाद्दशांशतो नित्यमष्टोत्तरमतन्द्रितः॥
सप्ताधिकान् द्विजान्नित्यं भोजयेन्मधुरान्वितम्॥४॥

विकारानुगुणं मन्त्री वर्द्धयेद्धोमवासरान्॥
होतृभ्यो दक्षिणां दद्यादरुणा गां पयस्विनीः॥५॥

गुरुं संप्रीणयेत्पश्चाद्धनाद्यैर्देवताधिया॥
अनेन विधिना साध्यः कृत्याद्रोगज्वरादिभिः॥६॥

विमुक्तः सुचिरं जीवेच्छरदां शतमञ्जसा॥
अभिचारे ज्वरे तीव्रे घोरोन्मादे शिरोगदे॥७॥

असाध्यरोगक्ष्वडादौ महादाहे महाभये॥
होमोऽयं शान्तिदः प्रोक्तः सर्वसंपत्प्रदायकः॥८॥

द्रव्यैरेतैः प्रजुहुयात् त्रिजन्मसु यथाविधि॥
भोजयेन्मधुरैभोज्यैर्ब्राह्मणान्वेदपारगान्॥९॥

दीर्घमायुरवान्पोति वांछितां विन्दति श्रियम्॥
एकादशाहुतीर्नित्यं द्रवाभिर्जुहुयाद्बुधः॥१०॥

अपमृत्यु जिदेष स्यादायुरारोग्यवर्द्धनः।
त्रिजन्मसु सुधवल्लीकाश्मरीबकुलोद्भवैः॥११॥

समिद्वरैः कृतो होमः सर्वमृत्युगदापहः॥
सिद्धान्नैर्विहितो होमो महाज्वरविनाशनः॥१२॥

अपामार्गसमिद्धोमः सर्वामयविषूदनः॥१३॥

प्रणवरचितनालं मन्त्रमध्यार्णपत्रं भृगुविलसितमध्यं पद्मयुग्मं तदन्तः॥
कृतवसतिमुमेशं वर्णनिर्यत्सुधाद्रे कलयतु हृदि नित्यं सर्वदुःखप्रशान्त्यै॥१४॥

यन्त्राढ्ये कमले सौम्ये कलश प्रोक्तवर्त्मना॥
नवरत्नसमायुक्तं दुकूलाभ्यामलंकृतम्॥१५॥

आपूर्य सलिलैः शुद्धैस्तस्मिन्देवं प्रपूजयेत्॥
उपचारैः षोडशभिर्विधानेन विधानवित्॥१६॥

अभिषिञ्चेत्प्रियं साध्यं विनीतं दत्तदक्षिणम्॥

आधिव्याधिमहारोगकृत्या द्रोहनिवारणः॥
अबिषेकोऽयमाख्यातः कीर्तिलक्ष्मीजयप्रदः॥१७॥

मध्ये साध्याक्षराढ्यं ध्रुवमभिविलिखेन्मध्यमं दिग्दलस्थं कोणेष्वन्त्यं मनोस्तत्
क्षितिभुवनमथो दिक्षु चन्द्रान् विधिक्षु॥

टान्तं यन्त्रं तदुक्तं सकलभयहरं क्ष्वेडभूतापमृत्युव्याधिव्यामोहदुःख प्रशमनमुदिते
शीप्रदं कीर्तिदायि॥१८॥

इति त्र्यक्षरीमृत्युंजयमन्त्रप्रयोगः समाप्तः॥

अथ त्र्यम्बकमन्त्रप्रयोगः॥

(शारदातिलके) अथ त्र्यम्बकं मन्त्रमभिधास्यम्यनुष्टुभम्॥

यं भजन्तं नरं कालः स्वयं वीक्षितुमक्षमः॥१॥

तत्रादौ पूर्वोक्तशिवपञ्चाक्षरमन्त्रवत् श्रीकण्ठादिन्यासान्तं कृत्वा अस्य त्र्यम्बकमन्त्र-
स्य वसिष्ठऋषिनुष्टुप् छन्दस्त्र्यम्बकः पार्वतीपतिर्देवताख्यं बीजं बं शक्तिः कं
कीलकं सर्वेष्टसिद्ध्यर्थे जपे विनियोगः॥

अथ ऋष्यादिन्यासः॥

ॐ वसिष्ठऋषये नमः शिरसि॥१॥

ॐ अनष्टद्युपछन्दसे नमः मुखे॥२॥

ॐ त्र्यम्बकदेवतायै नमः हृदये॥३॥

ॐ त्र्यं बीजाय नमः गुह्ये॥४॥

ॐ वं शक्तये नमः पादयोः॥

ॐ कं कीलकाय नमः सर्वांगे॥६॥

अथ करन्यासः॥

ॐ त्र्यम्बकं अङ्गुष्ठाभ्यां नमः॥१॥

ॐ यजामहे तर्जनीभ्यां नमः॥२॥

ॐ सुगन्धिम्पुष्टिवर्धनं मध्यमाभ्यां नमः॥३॥

ॐ उर्वारुकमिवबन्धनात् अनामिकाभ्यां नमः॥४॥

ॐ मृतयोर्मुक्षीय कनिष्ठिकाभ्यां नमः॥५॥

ॐ मामृतात् करतलकरपृष्ठाभ्यां नमः॥६॥

अथ हृदयादिषडङ्गन्यासः॥

ॐ त्र्यम्भकं हृदयाय नमः॥१॥

ॐ यजामहे शिरसेस्वाहा॥२॥

ॐ सुगन्धिम्पुटिवर्धनं शिखायै वषट्॥३॥

ॐ उर्वारुकमिवबन्धनात् कवचाय हुँ॥४॥

ॐ मृत्योर्मुक्षीय नेत्रत्रयाय वौषट्॥५॥

ॐ मामृतात् अस्त्राय फट्॥६॥

अथाङ्गन्यासः॥

ॐ त्र्यं नमः पूर्वमुखे॥१॥

ॐ बं नमः पश्चिममुखे॥२॥

ॐ कं नमः दक्षिणमुखे॥३॥

ॐ यं नमः उत्तरमुखे॥४॥

ॐ जां नमः उरसि॥५॥

ॐ मं नमः कण्ठे॥६॥

ॐ हें नमः मुखे॥७॥

ॐ सुं नमः नाभौ॥८॥

ॐ गं नमः हृदि॥९॥

ॐ धिं नमः पृष्ठे॥१०॥

ॐ पुं नमः कुक्षौ॥११॥

ॐ ष्टिं नमः लिङ्गे॥१२॥

ॐ वं नमः गुदे॥१३॥

ॐ धं नमः दक्षिणोरुमूले॥१४॥

ॐ नं नमः वामेरुमूले॥१५॥

ॐ उं नमः दक्षिणोरुमध्ये॥१६॥

ॐ वां नमः वामोरुमध्ये॥१७॥

ॐ रुं नमः दक्षिणजानुनि॥१८॥

ॐ कं नमः वामजानुनि॥१९॥

ॐ मिं नमः दक्षिणाजानुवृत्ते॥२०॥

ॐ वं नमः वामजानुवृते॥२१॥

ॐ बं नमः दक्षिणस्तने॥२२॥

ॐ धं नमः वामस्तने॥२३॥

ॐ नां नमः दक्षिणपार्श्वे॥२४॥

ॐ मृं नमः वामपार्श्वे॥२५॥

ॐ त्यों नमः दक्षिणपादे॥२६॥

ॐ सु नमः वामपादे॥२७॥

ॐ क्षीं नमः दक्षिणकरे॥२८॥

ॐ यं नमः वामकरे॥२९॥

ॐ मां नमः दक्षिणनासायाम्॥३०॥

ॐ मृं नमो वामनासायाम्॥३१॥

ॐ तां नमः मूर्ध्नि॥३२॥

इत्यक्षरन्यासः॥

अथ पदन्यासः॥

ॐ त्र्यम्बकं शिरसि॥१॥

ॐ यजामहे भ्रुवोः॥२॥

ॐ सुगंधिं नेत्रयोः॥३॥

ॐ पुष्टिवर्द्धनं मुखे॥४॥

ॐ उर्वारुकं गण्डयोः॥५॥

ॐ इव हृदये॥६॥

ॐ बन्धनात् जठरे॥७॥

ॐ मृत्योः लिङ्गे॥८॥

ॐ मुक्षीय हृदये॥९॥

ॐ मा जान्वोः॥१०॥

ॐ अमृतात् पादयोः॥११॥

इति पदन्यासं कृत्वा ध्यायेत् - ''हस्ताभ्यां कलशद्वयामृतरसैराप्लावयन्तं शिरो द्वाभ्यां तौ दधतं मृगाक्षवलये द्वाभ्यां वहन्तं परम्॥

अङ्कन्यस्तकरद्वयामृतघटं कैलासकान्तं शिवं स्वच्छाम्भोजगतं नवेन्दुमुकुटं देवं त्रिनेत्रं भजे''॥१॥

एवं ध्यात्वा पञ्चाक्षरोदिते पूर्वेक्ते पीठे मूलमन्त्रेण मूर्तिं प्रकल्प्य तत्र वृषभध्वजं त्र्यम्बकं देवं पाद्यादिपुष्पान्तैरुपचारैः संपूज्य आवरणपूजां कुर्यात्॥ तत्र प्रथमावरणे आग्नेयादिषट्कोणेषु हृदयादिषडङ्गानि पूजयेत्॥१॥

द्वितीयावरणे ऊँ अर्कमूर्तये नमः॥१॥

ऊँ इन्दुमूर्तये नमः॥२॥

ऊँ वसुधामूर्तये नमः॥३॥

ऊँ तोयमूर्तये नमः॥४॥

ऊँ वह्निमूर्तये नमः॥५॥

ऊँ वायुमूर्तये नमः॥६॥

ऊँ आकाशमूर्तये नमः॥७॥

ऊँ यजमानमूर्तये नमः॥८॥

इति मूर्तिरष्टौ पूंजयेत्॥२॥

तृतीयावरणे तद्बाह्ये पूर्वादिषु ऊँ रमायै नमः॥१॥

ऊँ राकायै नमः॥२॥

ऊँ प्रभायै नमः॥३॥

ऊँ ज्यो त्स्नायै नमः॥४॥

ऊँ पूर्णायै नमः॥५॥

ऊँ उषायै नमः॥६॥

ऊँ पूरण्यै नमः॥७॥

ऊँ सुधायै नमः॥८॥

इत्यष्टौ शक्तयः पूज्याः॥३॥

चतुर्थावरणे तद्बाह्ये ऊँ विश्वायै नमः॥१॥

ऊँ विद्यायै नमः॥२॥

ऊँ सितायै नमः॥३॥

ॐ प्रह्वायै नमः॥४॥

ॐ सारायै नमः॥५॥

ॐ संध्यायै नमः॥६॥

ॐ शिवायै नमः॥७॥

ॐ निशायै नमः॥८॥

ॐ शक्तीः पूजयेत्॥

तद्वाह्ये पञ्चमावरणे ॐ आर्यायै नमः॥१॥

ॐ प्रज्ञायै नमः॥२॥

ॐ प्रभायै नमः॥३॥

ॐ मेधायै नमः॥४॥

ॐ शान्त्यै नमः॥५॥

ॐ कान्त्यै नमः॥६॥

ॐ धृत्यै नमः॥७॥

ॐ सत्यै नमः॥८॥

इत्यष्टो पूज्याः॥

तद्वाह्ये षष्ठावरणे ॐ धरायै नमः॥१॥

ॐ मायायै नमः॥२॥

ॐ अविन्यै नमः॥३॥

ॐ पद्मायै नमः॥४॥

ॐ शान्तायै नमः॥५॥

ॐ मेघायै नमः॥६॥

ॐ जयायै नमः॥७॥

ॐ अमलायै नमः॥८॥

इत्यष्टौ शक्तयः पूज्याः॥६॥

तद्बाह्ये भूपुरे सप्तमावरणे इन्द्रादीन्॥७॥

अष्टमावरणे वज्रद्यायुधानि च पूजयेत्॥८॥

ततो धूपधीपादि विसर्जनान्तं कर्म कृत्वा लक्षमन्त्रात्मकं पुरश्चरणं कुर्यात्॥

मन्त्रो यथा-ऊँ त्र्यम्बकंयजामहेसुगुन्धिम्पुष्टिवर्द्धनम्॥

उर्व्वारुकमिवबन्धनान्मृत्योर्म्मुक्षीयमामृतात्॥
ततो जपान्ते दशांशेन बिल्वं॥१॥

पलाशं॥२॥

खदिरं॥३॥

वटं॥४॥

तिलान्॥५॥

सर्षपान्॥६॥

पायसं॥७॥

दुग्धं॥८॥

दधि॥९॥

दूर्वां च॥१०।

एतैर्दशद्रव्यैघृतसंप्लुतैर्हुत्वा तद्दशांशेन मूलमन्त्रान्ते ऊँ त्रयम्बक देवं तर्पयामि इति तर्पणं कृत्वा तद्दशांशोन आत्मानमभिषिञ्चमीत्यभिषिंच्य तद्दशांशेन ब्राह्मणान् भोजयेत्॥

(शारदातिलके) ''एवं कृते प्रयोगार्हो जायतेऽयं महामनुः॥
अयुतं जुहुर्याद्बिल्वसमिद्धिः संपदे सुधीः॥१॥

जुहुयाद्ब्रह्मवृक्षस्य समिद्भिर्ब्रह्मतेजसे॥
खादिरैरयुतं हुत्वा कान्तिपुष्टिमवाप्नुयात्॥२॥

वटवृक्षस्य समिधो जुहुयादयुतावधि॥
धनधान्यसमृद्धः स्यादचिरेणैव साधकः॥३॥

तिलैस्तत्संख्यया हुत्वा सर्वपापैः प्रमुच्यते॥
सिद्धार्थैरयुतं हुत्वा शत्रून्विजयते नृपः॥४॥

अनेनैव विधानेन नश्येन्मृत्युरकालजः॥५॥

पायसेन कृतो होमो रक्षाश्रीकीर्तिकान्तिदः॥
गोदुग्धेन च शुद्धान्नं हुत्वा कृत्यां विनाशयेत्॥६॥

अयमेव मतो होमः शान्ति श्रीसंपदावहः॥
दधिहोमेन संवादं कुर्याद्विद्वेषिणोर्मिथः॥७॥

प्रत्यहं जुहुयान्मत्री दूर्वामष्टोत्तरं शतम्।
आमान्निखिलान्जित्वा दीर्घमायुरवाप्नुयात्॥८॥

जुहुयाज्जन्मदिवसे पायसान्नैर्घृतान्वितैः॥
इच्छन्ननिन्दितां लक्ष्मीमारोग्यमतुलं यशः॥९॥

गव्यदुग्धघृताक्तभिर्दूर्वाभिर्जुहुयाद्वशी॥
सविंशतिशतं सम्यक् स्वजन्मदिवसे सुधीः॥१०॥

आमयैः सकलैर्मुक्तो जीवेद्वर्षशतं सुधीः॥
काश्मरीसमिधस्तिस्त्रः पयोऽन्नं त्रिशतं पृथक्॥११॥

जुहुयाद्ब्राह्मणानन्ते भोजयेन्मधुरान्वितम्॥
प्रीणयेद्धनधान्याद्यैरात्मनो गुरुमादरात्॥१२॥

अनामयमवान्पोति दीर्घमायुःश्रिया सह॥
सघृतेन पयोन्नेन हुत्वा पर्वणिपर्वणि॥१३॥

राज्यश्रियमवान्पोति षणमासावात्र संशयः॥
लाजैर्विशुद्धैर्जुहुयात्कन्याप्त्यै सा वराप्तये॥१४॥

क्षीरद्रुमसमिद्धोमाद्ब्राह्मणादीन्वशं नयेत्॥
स्नात्वा सहस्त्रं प्रजपेदादित्याभिमुखो मनुम्॥१५॥

आधिव्याधिविनिर्मुक्तो दीर्घमायुरवाप्नुयात्॥
अनेन मनुना सर्वे साधयेदिष्टमात्मनः॥१६॥

इति शारदातिलकोक्तत्र्यम्बकमन्त्रपुरश्चरणप्रयोगः॥

अथ महामृत्युञ्जयपुरश्चरणप्रयोगः।।

तत्र तावच्छुभेऽह्नि चन्द्रतारादिबलान्विते सुमुहूर्त्ते शिवालयादिषु जपस्थानं प्रकल्प्य तत्र गोमयोपलेपनादिभिः शुद्धिं कृत्वा आसनभूमौ कूर्मसंशोधनं दीपस्थानशोधनं च कुर्य्यात्।।

पूर्वदिने प्रायश्चित्तम् अयुतगायत्रीजपं च कृत्वा तद्रात्रौ पूर्वक्तपद्धतिमार्गेण स्वप्नं विचार्य आरंभदिने प्रातर्नित्यावश्यकं समाप्य स्वासने प्राङ्मुख उपविश्य आचम्य प्राणानायम्य शान्तिपाठं पठित्वा लक्ष्मीनारायणादिदेवान् प्रणमेत्।

ततो देशकालौ संकीर्त्य अमुकगोत्रो ऽ मुकशर्म्मा ममात्मनः श्रुतिस्मृतिपुराणतन्त्रोक्तफलावाप्तये अस्मिन् पुण्याहे मम जन्मराशेः सकाशान्नामराशेसकाशाद्वा जन्मलग्नाद्वर्षलग्नाद्गोचराद्वा चतुर्थाष्टमद्वादशा द्यनिष्टस्थानस्थिताऽमुकग्रहसूचितं सूचयिष्यमाणं च यत्सर्वारिष्टं तद्विनाशार्थं सर्वदा तृतीयैकादशशुभस्थानस्थितवदुत्तमफलप्राप्त्यर्थं (अथवा) अमुकमारकग्रहदशान्तर्दशा तत्संबन्धिदशा चोपदशा दिनदशा वा षष्ठाष्टमद्वादशादिनिषिद्धभावाधिपतिदशा तज्जनितपीडाऽल्पायुराधिदैवाधिभौतिकाध्यात्मिकजनितक्लेश निवृत्तिपूर्वकायुरारोग्यार्थं परमैश्वर्य्यादिप्राप्तयर्थं श्रीमहामृत्युञ्जयदेवताप्रीत्यर्थं अमुकसंख्यया श्रीमहामृत्युञ्जयमन्त्रजप विप्रद्वारा कारयिष्ये इति (अथवा)

मम जीवच्छरीराऽविरोधेनामुकरोगस्य समूलनाशने नावमृत्युनिवारणद्वारा क्षिप्रारोग्यार्थं (वा) विषूचिकादिजनमारोपसर्गशान्त्यर्थं (वा) वृष्टिकामार्थम् ''अमुकाभियोगनिवृत्त्यर्थं वा'' अमुकदुःस्वन्पानिरासार्थं अमुकदिग्यात्रानिर्विघ्नपूर्वकसिद्ध्यर्थं (वा) प्रतिसम्मुखशुक्रदोषनिवारणार्थं (व) काकमैथुनदर्शनादिसूचितसर्वारिष्टनिवृत्त्यर्थं (वा) पल्लीपतनसरठारोहणामुकदुष्टाङ्गस्फुरणजनिताऽ शुभ फलविनाशार्थम् (अथवा) अमुकदुष्टनक्षत्रामुकमृत्युयोगादिदुयोगदुष्टतिथिपपवारदुष्टचन्द्रो त्पन्नज्वरामुकव्याधेर्ज्जीवच्छरीराविरोधेन समूलनाशार्थम् अमुकसंख्यापरिमितश्रीमहामृत्युञ्जयमन्त्रजपं विप्रद्वाराहं करिष्ये।। इति।।

(एवं कामनाभेदेन स कल्पो ज्ञेयः) तदङ्गत्त्वेन गणपतिपूजनं पुण्याहवाचनं मातृकापूजनं नान्दीश्राद्धमाचार्यजापकवरणं च करिष्ये।।

इति च संकल्प्य पूर्वोक्तपद्धतिमार्गेण जापकवरणान्तं कर्म कुर्यात्॥

इति विप्रद्वारा कारिते पुरश्चरणे प्रकारः।

ततो जापकर्ता स्वासने प्राङ्मुख उदङ्मुखो वा उपविश्य धृतरुद्राक्षभस्मत्रिपुंड्र आचम्य प्राणानायम्य, देशकालौ स्मृत्वा मम यजमानस्य वा शरीरे ज्वराद्यमुकरोगनिरासद्वारा सद्य आरोग्यार्थं (वा) अमुककामनासिद्ध्यर्थं श्रीमहामृत्युञ्जयदेवताप्रीत्यर्थम् अमुकसंख्यपरिमित श्रीमहामृत्युञ्जयजपं करिष्ये॥

इति प्रत्याहिकं संकल्प्य।

ॐ गुरवे। नमः।

ॐ गणपतये नमः।

ॐ इष्टदेवतायै नमः।

इति नत्वा पूर्वोक्तभूतशुद्ध्यादिश्रीकण्ठादिकलामातृकान्यासान्तं कुर्यात्॥

अथ जपप्रयोगः (मन्त्रमहोदधौ) ''महामृत्युञ्जयं वक्ष्ये दुरितापान्निवारणम्॥
यं प्राप्य भार्गवः शम्भोर्मृतान् दैत्यानजीवयत्॥१॥''

अस्य श्रीमहामृत्युञ्जयमन्त्रस्य वामदेवकहोलवसिष्ठा ऋषयः।

पङ्क्तिगात्र्यनुष्टुभछन्दांसि।

सदाशिवमहामृत्युञ्जयरुद्रो देवता।

ह्रीं शाक्तिः। श्रीं बीजम्।

महामृत्युञ्जयप्रीतये ममाभीष्टसिद्ध्यर्थे जपे विनियोगः।

अथ ऋष्यादिन्यासः।

ॐ वामदेवकहोलवसिष्ठऋषिभ्यो नमः मूर्न्धि॥१॥

ॐ पङ्क्तिगायत्र्यनुष्टुप्छन्दोभ्यो नमः वक्रे॥२॥

ॐ सदाशिवमहामृत्युञ्जयरुद्रदेवतायै नमः हृदि॥३॥

ह्रीं शक्तयै नमः लिङ्गे॥४॥

ॐ श्री बीजाय नमः पादयोः॥५॥

इति ऋष्यादिन्यासः॥

अथ करन्यासः।

ॐ हौं ॐ जूं सः भूर्भुवःस्वःत्रयम्बकं ॐ नमो भगवते रुद्राय शूलपाणये स्वाहा अङ्गुष्ठाभयां नमः॥१॥

ॐ हौं ॐ जूं सः भूर्भुवः स्वः यजामहे ॐ नमो भगवते रुद्राय अमृतमूर्तये मां जीवय तर्जनीभ्यां नमः॥२॥

ॐ हौं ॐ जूं सः भूर्भुवःस्वः सुगन्धि पुष्टिवर्धन ॐ नमो भगवते रुद्राय चन्द्रशिरसे जटिने स्वाहा मध्यमाभ्यां नमः॥३॥

ॐ होॐजूं सः भूर्भुवः स्वः उर्वारुकमिवबन्धनातः ॐ नमो भगवते रुद्राय त्रिपुरान्तकाय हाँ हाँ अनामिकाभ्यां नमः॥४॥

ॐ हाँ ॐ जू सः भूर्भुवः स्वः मृत्योर्मुक्षीय ॐ नमो भगवते रुद्राय त्रिलोचनाय ऋगयजुःसाममन्त्राय कनिष्ठिकाभ्यां नमः॥५॥

ॐ हौ ॐ जूं सः भूर्भुवः स्वः मामृतात् ॐ नमो भगवते रुद्राय ॐ अग्नित्रयाय ज्वलज्वल मां रक्षरक्ष अघोरास्त्राय करतलकरपृष्ठाभ्यां नमः॥६॥

इति करन्यासः।

एवं हृदयादिन्यासं कुर्यात्।

अथ वर्णन्यासः।

ॐ हौ ॐ जूं सः भूर्भुवः स्वः त्र्यं नमः पूर्व मुखे॥१॥

ॐ हो ॐ जू सः भूर्भुवः स्वः बं नमः पश्चिममुखे॥२॥

ॐ हौं ॐ जूं सः भूर्भुवः स्वः त्र्यं नमः पूर्व मुखे॥१॥

ॐ हौ ॐ जू सः भूर्भुवः स्वः बं नमः पश्चिममुखे॥२॥

ॐ हौं ॐ जू सः भूर्भुवः स्वः कं नमः दक्षिणमुखे॥३॥

ॐ हौ ॐ जूं सः भूर्भुवः स्वः यं नमः उत्तरमुखे॥

ॐ हौ ॐ जूं सः भूर्भुवः स्वःजां नमः उरसि॥५॥

ॐ हौ ॐ जूं सः भूर्भुवः स्वः मं नमः कण्ठे॥६॥

ॐ हौ ॐ जूं सः भूर्भुवः स्वः है नमः मुखे॥७॥

ॐ हौ ॐ जूं सः भूर्भुवः स्वः सु नमः नाभौ॥८॥

ॐ हौ ॐ जूंसः भूर्भुवः स्वः गं नमः हृदि॥९॥

ॐ हौ ॐ जूं सः भूर्भुवः स्वः धिं नमः पृष्ठे॥१०॥

ॐ हौ ॐ जूं सः भूर्भुवः स्वः पुं नमः कुक्षो॥११॥

ॐ हौ ॐ जूं भूर्भुवः स्वः ष्टिं नमः लिङ्गे॥१२॥

ॐ हौ ॐ जूं सः भूर्भुवः स्वः वं नमः गुदे॥१३॥

ॐ हौ ॐ जूं सः भूर्भुवः स्वः नमः दक्षिणोरुमले॥१४॥

ॐ हौ ॐ जूं सः भूर्भुवः स्वः नं नमः वामेरुमले॥१५॥

ॐ हौ ॐ जूं सः भूर्भुवः स्वः उँ नमः दक्षिणोरुमध्ये॥१६॥

ॐ हौ ॐ जूं सः भूर्भुवः स्वः वां नमः वामोरुमध्ये॥१७॥

ॐ हौ ॐ जूं सः भूर्भुवः स्वः रुं नमः दक्षिणजानुनि॥१८॥

ॐ हौ ॐ जूं सः भूर्भुवः स्वः कं नमः वामजानुनि॥१९॥

ॐ हौ ॐ जूं सः भूर्भुवः स्वः मिं नमः दक्षिणजानुवृत्ते॥२०॥

ॐ हौ ॐ जूं सः भूर्भुवः स्वः वं नमः वामजानुवृत्ते॥२१॥

ॐ हौ ॐ जूं सः भूर्भुवः स्वः बं नमः दक्षिणस्तने॥२२॥

ॐ हों ॐ जूं सः बूर्भुवःस्वः धं नमः वामस्तने॥२३॥

ॐ हों ॐ जूं सः भूर्भुवः स्वः नां नमः दक्षिणपाश्वे॥२४॥

ॐ हौ ॐ जूं सः भूर्भुवः स्वःमृं नमः वाम पाश्वे॥२५॥

ॐ हों ॐ जूं सः भूर्भुवः स्वः त्यों नमः दक्षिणपादे॥२६॥

ॐ हौं ॐ जूं सः भूर्भुवः स्वः मुं नमः वामपादे॥२७॥

ॐ हौं ॐ जूं सः भूर्भुवः स्वः क्षीं नमः दंक्षिणकरे॥२८॥

ॐ हौं ॐ जूं सः भूर्भुवः स्वः स्वः यं नमः वामकरे॥२९॥

ॐ हौं ॐ जूं सः भूर्भुवः स्वः मां नमः दक्षिणानासायाम्॥३०॥

ॐ हौं ॐ जूं सः भूर्भुवः स्वः मृं नमः वामनासायाम्॥

ॐ हौं ॐ जूं सः भूर्भुवः स्वः तां नमः मून्धि॥३२॥

इत्यक्षरन्यासः॥ ॐ त्र्यम्बकं शिरसि॥१॥

ॐ यजामहे भ्रुवोः॥२॥

ॐ सुगन्धिं नेत्रयोः॥३॥

ॐ पुष्टिवर्धनं मुखे॥४॥

ॐ उर्वारुकं गण्डयोः॥५॥

ॐ इव हृदये॥६॥

ॐ बन्धनात् जठरे॥७॥

ॐ मृत्योः लिङ्गे॥८॥

ॐ मुक्षीय ऊर्वोः॥९॥

ॐ मा जान्वोः॥१०॥

ॐ अमृतात् पादयोः॥११।

इति पदन्यासः।

ततो मूलेन व्यापकं कृत्वा ध्यायेत॥

अथ ध्यानम् - ''हस्ताम्भोजयुगस्थकुम्भयुगलादुद्धृत्य तोयं शिरः सिञ्चन्तं करयोर्युगेन दधतं स्वाङ्के सकुम्भौ करौ।

अक्षस्त्रङ्मृगहस्तमम्बुजगतं मूर्द्धस्थचन्द्रस्त्रवत्पीयूषोन्नतनुं भजे सगिरिजं मृत्युञ्जयं त्र्यम्बकम्॥१॥

इति ध्यात्वा मुष्टिमुद्रां मृगमुद्रां शक्तिमुद्रां लिङ्गमुद्रां पञ्चमुखां मुद्रां च प्रदर्श्य पीठपूजां कुर्यात्।

तद्यथा ॐ मण्डकादिपरतत्त्वान्तपीठदेवताभ्यो नमः।

इति पीठं संपूज्य।

ॐ वामायै नमः॥१॥

ॐ ज्येष्ठायै नमः॥२॥

ॐ रौद्र्यै नमः॥३॥

ॐ काल्यै नमः॥४॥

ॐ कलविकरिण्यै नमः॥५॥

ॐ बलविकरिण्यै नमः॥६॥

ॐ बलप्रमथन्यै नमः॥७॥

ॐ सर्वभूतदमन्यै नमः॥८॥

मध्ये ॐ मनोन्मन्यै नमः॥९॥

इति पीठशक्तीः पूजयेत्॥

ततः ॐ नमो भगवते सकलगुणात्मशक्तियुक्ताया नन्ताय योगीपीठात्मने नमः॥ इति मन्त्रेण आसनं दत्त्वा तत्र ॐ महीद्यौरित्यादि पूवोक्तपद्धतिमार्गेण यथाविधि पूर्णपात्रान्तं ताम्रकलशं संस्थाप्य तत्वायामीति वरुणामावाह्य संपूज्य कलशस्य मुखे विष्णुरित्याद्यभिमन्त्र्य ''देवदानवसंवादे'' इत्यादि प्रार्थयेत्।

ततः कलशोपरि कौशेयवस्त्रं प्रसार्य तत्र अद्य गन्धेन मृत्युञ्जययन्त्रं विलिख्य अथवा ताम्रमयं यन्त्रं संस्थाप्य तन्मध्ये प्रधानदेवत्र्यम्बकप्रतिमां पलसुवर्णरचितां अग्न्युत्तारणपूर्वकं मूलेन संस्थाप्य प्राणप्रतिष्ठां कृत्वा आवाहनादि-पुष्पान्तैरुपचारैर्मूलमन्त्रेण संपूज्य आवरणपूजां कुर्यात्। तद्यथा मध्ये ॐ ईशानः सर्वविद्यानामीश्वरःसर्वभूतानाम्ब्रह्मणोधिपतिब्रह्माशिवोमेअस्तुसदाशिवोम्॥

इतिमन्त्रेणेशानम्॥१॥

पूर्वे ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि।

तन्नोरुद्रः प्रचोदयात्॥
इति तत्पुरुषम्॥२॥

दक्षिणे ॐ अघोरेभ्यो ऽ थघोरेभ्योघोरघोरतरेभ्यः।

सर्वेभ्यः सर्वरूशर्व्वेभ्योनमस्तेअस्तुरुद्रपेभ्यः॥

इति अघोरम्॥३॥

पश्चिमे ॐ वामदेवायनमोज्येष्ठानमः श्रेष्ठायनमोरुद्रायनमः कालाय नमः कलविकरणायनमोबलविकरणायनमः॥ इति॥

वामदेवम्॥४॥

उत्तरे ॐ सद्योजातंप्रपद्यामिसद्योजातायवैनमो नमः भवेभवेनातिभवेभवस्वमां भवोद्भवाय नमः॥

इति सद्योजातं च पूजयेत्॥५॥

इति प्रथमावरणम्॥१॥

ततः ईशानादि समीपेषु निवृत्त्याद्याः कलाः क्रमात् संस्थाप्य ॐ निवृत्त्यै नमः॥१॥

ॐ प्रतिष्ठायै नमः॥२॥

ॐ विद्यायै नमः॥३॥

ॐ शान्त्यै नमः॥४॥

ॐ शान्त्यतीतायै नमः॥५॥

इति संपूज्य ततः षट्कोणे आग्नेयादिकोणकेसरेषु मध्ये दिक्षु च पूर्वोक्तन्यासक्रमेण हृदयादिषडङ्गानि संपूजयेत्॥

इति द्वितीयावरणम्॥२॥

तद्बहिः पूर्वादिक्रमेण ॐ सूर्यमूर्तये नमः॥१॥

ॐ इन्दुमूर्तये नमः॥२॥

ॐ क्षितिमूर्तये नमः॥३॥

ॐ तोयमूर्तये नमः॥४॥

ॐ अग्निमूर्तये नमः॥५॥

ॐ पवनमूर्तये नमः॥६॥

ॐ आकाशमूर्तये नमः॥७॥

ॐ यज्ञमूर्तये नमः॥८॥

इति तृतीयावरणम्॥३॥

तद्बहिः ॐ रमायै नमः॥१॥

ॐ राकायै नमः॥२॥

ॐ प्रभायै नमः॥३॥

ॐ ज्योत्स्नायै नमः॥४॥

ॐ पूर्णायै नमः॥५॥

ॐ उषायै नमः॥६॥

ॐ पूरण्यै नमः॥७॥

ॐ सुधायै नमः॥८॥

इति चतुर्थावरणम्॥४॥

ॐ विश्वायै नमः॥१॥

ॐ वन्द्यायै नमः॥२॥

ॐ सितायै नमः॥३॥

ॐ प्रह्वायै नमः॥४॥

ॐ सारायै नमः॥५॥

ॐ संध्यायै नमः॥६॥

ॐ शिवायै नमः॥७॥

ॐ निशायै नमः॥८॥

इति पञ्चमावरणम्॥५॥

तद्बहिः ॐ आर्यायै नमः॥१॥

ॐ प्रज्ञायै नमः॥२॥

ॐ प्रभायै नमः॥३॥

ॐ मेधायै नमः॥४॥

ॐ शान्त्यै नमः॥५॥

ॐ कान्त्यै नमः॥६॥

ॐ धृत्यै नमः॥७॥

ॐ मत्यै नमः॥८॥

इति षष्ठावरणम्॥६॥

तद्बहिः ॐ धारायै नमः॥१॥

ॐ उमायै नमः॥२॥

ॐ पावन्यै नमः॥३॥

ॐ पद्मायै नमः॥४॥

ॐ शान्तायै नमः॥५॥

ॐ अमोघायै नमः॥६॥

ॐ जयायै नमः॥७॥

ॐ अमलायै नमः॥८॥

इति सप्तमावरणम्॥७॥

तद्बहिः ॐ अनन्ताय नमः॥१॥

ॐ सूक्ष्मायनमः॥२॥

ॐ शिवोत्तमाय नमः॥३॥

ॐ एकनेत्राय नमः॥४॥

ॐ एकरुद्राय नमः॥५॥

ॐ त्रिमूर्तये नमः॥६॥

ॐ श्रीकण्टाय नमः॥७॥

ॐ शिखण्डिने नमः॥८॥

इति अष्टमावरणम्॥८॥

तत उत्तरदिशमारभ्य ॐ उमायै नमः॥

ॐ चण्डेश्वराय नमः॥२॥

ॐ नन्दिने नमः॥३॥

ॐ महाकालाय नमः॥४॥

ॐ गणेशाय नमः॥५॥

ॐ वृषभाय नमः॥६॥

ॐ भृङ्गिरिटये नमः॥७॥

ॐ स्कन्दाय नमः॥८॥

इति नवमावरणम्॥९॥

तद्बहिः ॐ ब्राह्मयै नमः॥१॥

ॐ माहेश्वर्यै नमः॥२॥

ॐ कौमार्यै नमः॥३॥

ॐ वैष्णव्यै नमः॥४॥

ॐ वाराह्यै नमः॥५॥

ॐ इन्द्राण्यै नमः॥६॥

ॐ चामुण्डायै नमः॥७॥

ॐ महालक्ष्म्यै नमः॥८॥

इति दशमावरणम्॥१०॥

तद्बाह्ये चतुरस्त्रे भ्वतुरस्त्रे भूपुरे पूर्वादिक्रमेण इन्द्रादिदशदिक्पालान् तद्बाह्ये तत्तत्समीपे वज्राद्यायुधानि च पूजयेत्॥१२॥

इत्यावरणपूजां कृत्वा धूपदीपनैवेद्यताम्बूलदक्षिणानीराजनप्रदक्षिणानमस्कारर्मूर्तिं पूजयेत्॥

ततः कृताञ्जलिः॥

ॐ मृत्युंजय महारुद्र त्राहि मां शरणागतम्।।
जन्ममृत्युजरारोगैः पीडितं कर्मबन्धनैः।।१।।

तावकस्त्वद्गतप्राणास्त्वच्चित्तोऽहं सदा मृड।।
इति विज्ञाप्य देवेशं जपेन्मृत्युंजयं परम्।।२।।

इति प्रार्थ्य मध्यंदिनावधि जपं कुर्यात्।। मन्त्रस्वरूपम्।

''ॐ हौ ॐ जुं सः भूर्भुवः स्वः त्र्यंम्बकं य्याजामहे सुगन्धिंम्पुष्टिवर्धनम्।।
उर्वारुकमिवबन्धनान्मृत्योर्मुक्षीयमामृतात् भूर्भुवः स्वरों जुं सः हौॐ।।५०।।

ततो जपान्ते मालां शिरसि निधाय प्राणानायम्य पुनः षडङ्गन्यासं कुर्यात्।।
तद्यथा-ॐ हौं ॐ जूं सः भूर्भुवः स्वः त्र्यम्बकं ॐ नमो भगवते रुद्राय शूलपाणये स्वाहा हृदयाय नमः।।१।।

ॐ हौ ॐ जूं सः भूर्भुवः स्वः यजामहे ॐ नमो भगवते रुद्राय अमृतमूर्तये मां जीवय शिरसे स्वाहा।।२।।

ॐ हौं ॐ जूं सः भूर्भुवः स्वः सुगन्धिम्पुष्टिर्द्धनम् ॐ नमो भगवते रुद्राय चन्द्रशिरसे जटिने स्वाहा शिखायै वषट्।।३।।

ॐ हौं जूं सः भूर्भुवः स्वः उर्वारुकमिवबन्ध्नात् ॐ नमो भगवते रुद्राय त्रिपुरान्तकाय ह्रां ह्री कवचाय हुम्।।४।।

ॐ हौ ॐ जूं सः भूर्भुवः स्वः मृत्योमुक्षीय ॐ नमो भगवते रुद्राय त्रिलोचनाय ऋग्यजुः साममंत्राय नेत्रत्रयाय वौषट्।।५।।

ॐ हौं ॐ जूं सः भूर्भुवः स्वः मामृतात् ॐ नमो भगवते रुद्राय ज्वलज्वल मां रक्षरक्ष अघोरास्त्राय अस्त्राय फट्।।६।।

इति षडङ्गन्यासं कृत्वा महामृत्युंजयकवचं पठित्वा ''गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम्।।
सिद्धिर्भवतु मे देव त्वत्प्रसादान्महेश्वर।।१।।

इति प्रार्थ्य ॐ अनेन महामृत्युंजयजपाख्येन कर्मणा श्रीमहामृत्युंजयः प्रीयतामिति जपमीश्वरार्पणं कुर्यात्।।

एवं लक्षमन्त्रजपात्मकं पुरश्चरणं कृत्वा जपान्ते दशांशतो दशद्रव्यैर्होमं कुर्यात्।
अथ दश द्रव्याणि - ''दशद्रव्यैः प्रजुहुयात्तानि बिल्वफलं तिलाः।। पायसं

सर्पिषा दुग्धं दधि दूर्वा च सप्तमी॥ वटात् पलाशात्खदिरात्समिधो मधुराप्लुता:॥''

ततो होमान्ते जले देवं मृत्युंजयं संपूज्य होमदशांशेन मन्त्रान्ते ॐ मृत्युंजयं तर्पयामीत्युक्त्वा दुग्धमिश्रजलेन तर्पणं कुर्यात्॥

ततस्तर्पणदशांशेन मन्त्रान्ते आत्मानमभिषिञ्चामि नम:॥

इति यजमानमूर्ध्न्यभिषेक:॥

''होमतर्पणाभिषेकाणां मध्ये यदेव न संभवति तत्स्थाने तत्तद्द्विगुणो जप: कार्य्य:'' ततोभिषेकदशांशतो वाऽष्टोत्तर शतब्राह्मणभोजनम्॥

एवं कृते सिद्धो मन्त्रो भवेत्॥

(मन्त्रमहोदधौ) ''जन्मभेदशमे तस्मात्पुनश्चैकोनविंशके॥
जुहुयाद्य: सुधावल्ल्या: समिधश्चतुरङ्गुला:॥१॥

स रोगान्सकलाञ्शत्रून्पराभूय शिया युत:॥
मोदते पुत्रपौत्राद्यै: शतवर्षाणि साधक:॥२॥

समिद्भि: श्रीफलोत्थाभिर्होम: संपत्तिसिद्धये।
पलाशतरुजाभिस्तु ब्रह्मवर्चससिद्धये॥३॥

वटोत्थाभिर्धनप्रात्यै खादिरीभिस्तु कान्तये॥
तिलैरधर्म्मनाशाय सर्षपै: शत्रुनष्टये॥४॥

पायसेन कृतो होम: कान्तिश्रीकीर्त्तिदायक:॥
कृत्यामृत्युक्षयकरो दध्ना संवादसिद्धिद:॥५॥

होमसंख्या तु सर्वत्रायुतमानेन कीर्तिता॥
अष्टोत्तरशतं दूर्वात्रिकहोमाद्रुजां क्षय:॥६॥

स्वजन्मदिवसे यस्तु पायसैर्मधुरान्वितै:॥
जुहोति तस्य वर्द्धते कमलारोग्यकीर्तय:॥७॥

गुडूचीबकुलोत्थाभि: समिद्भिर्हवनं नृणाम्॥
जन्मतारात्रये रोगान्मृत्युं चापि विनाशयेत्॥८॥

प्रत्यहं जुहुयाद्दूर्वा अपमृत्युविनष्टये॥
किंबहूक्तेन सवेष्टं प्रयच्छति शिवो नृणाम्॥९॥

अपामार्गसमिद्भिश्व सिद्धान्नैर्ज्वरन ष्टये।।
दुग्धाक्तैरमृताखण्डैर्मासं होमोऽखिलाप्तयै।।१।।

''इति मन्त्रमहोदधिप्रोक्तो महामृत्युंजयमनत्रपुरश्वरणप्रयोगः समाप्तः।।

अथ वसिष्ठकल्पोक्ते महामृत्युंजयादिविधानं शान्तिरत्रे।।

''त्र्यम्बकस्य विधानं तु कीर्तयिष्ये मुनीश्वराः।।
यथोक्तविधिना युक्तं संस्मृतं ब्रह्मणा पुरा।।१।।

मृत्युंजयस्त्रिधा प्रोक्त आद्यो मृत्युंजयः स्मृतः।।
मृतसंजीवनी चैव महामृत्युंजयस्तथा।।२।।

मृत्युंजयः केवलः स्यात्पुटितो व्याहृतित्रयैः।।
तारं त्रिबीजं व्याहृत्य पुटितो मृतजीवनी।।३।।

तारं त्रिबीजं व्याहृत्य पुटितैस्तैस्त्रियम्बकः।
महामृत्युंजयः प्रोक्तः सर्वमन्त्रविशारदैः।।४।।

(तत्रैव विशेषः) प्रणवांते प्रसादश्व मतिहारकमेव च।।
भूरादिव्याहृतयश्चत्र्यंम्बकेति च ऋक् ततः।।५।।

विपर्ययेण त्रिबीजं दद्वच्च व्याहृतित्रयः।।
स्वाहान्तो मनुरेषोऽयं शुक्रेणाश्राधितः पुराः पुराः।।६।।

महामृत्युं जय इति विश्रुतो भुवनत्रये।।

ऊँ कारैः सहितः षड्भिश्चतुर्दशभिरेव च।।
मृत्युञ्जयं तं विधिवदुपास्येप्सितमाप्नुयात्।।७।।

आदौ प्रसादबीजं तदनु मृतिहरं तारकं व्याहृतीश्व प्रोच्चार्य्य त्र्यम्बकं यो जपति मृतिहरं भूय एवेतदाद्यम्।।
कृत्वा न्यासं षडङ्गं स्त्रवदमृतकरं मण्डलान्तःप्रविष्टं ध्यात्वा योगीशरुद्रं स जयति मरणं शुक्रविद्याप्रसादात्।।८।।

अथ मन्त्रस्वरूपम्।।

ऊँ भूः ऊँ भुवः ऊँ स्वः ऊँ त्र्यम्बकं यजामहे इति ऋक्।
ऊँ स्वः ऊँ भुवः ऊँ भूः ऊँ इत्यष्टचत्वारिंशद्वर्णात्मकः केवलमृत्युंजयः।।१।।

ऊँ हौं जूं सः ऊँ भूर्भुवः स्वः ऊँ त्र्यम्बकं यजामहे इति ऋक्।
ऊँ स्वः भुवः भूः ऊँ सः जूं हौं ऊँ इति द्विपञ्चाशद्वर्णात्मको मृतसंजीवनी मन्त्रः॥

अथ महामृत्युंजयमन्त्रः ऊँ हौं ऊँ जूँ ऊँ सः ऊँ भूः ऊँभुवः ऊँस्वः ऊँ त्र्यम्बकं यजामहे सुगन्धिपुष्टिवर्द्धनम्॥

ऊर्वारुकमिवबन्धनान्मृत्योर्मुक्षीयमामृतात् ऊँ स्वः ऊँ ऊँ भूःवः ऊँ भुः ऊँ सः ऊँ जूं ऊँ हौं ऊँ स्वाहा॥६२॥

इति द्विषष्टिवर्णात्मको महमृत्युञ्जयः शुक्राराधितो मन्त्रः॥

एतन्मन्त्रत्रयाणां न्यासध्यानादिपुरश्चरणं च पूवोक्तमन्त्रवत् ज्ञेयम्॥

प्रयोगविशेषो (विधानमालायाम्।) "ग्रहपीडासु सर्वासु महागदनिपीडने॥
वियोगे बान्ध्वानां च जनमार उपस्थिते॥१॥

राज्यभङ्गे धनग्लानौ क्षिप्रमृत्यु विनाशने। अभियोगो समुत्पन्ने मनोधर्मविपर्यये॥२॥

मृत्युंजयस्थ देवस्य विधानं क्रियते बुधैः। राष्ट्रभङ्गे जनक्लेशे महप्ऐगनिपीहने॥३॥

कोटिसंख्यो जपः प्रोक्तो मुनिभिस्तत्त्वदार्शिभिः॥
सामान्यगदपीडायां दुद्यस्वन्पस्य दर्शने॥४॥

मृत्युंजयस्य देवस्य जपो लक्षमितः शुभः॥
अपमृत्युविनाशाय जपोऽयुतमितः स्मृतः॥५॥

दुर्वार्ताश्रवणे जाप्यं सुहृदामनृते श्रुते॥
यात्रा यामयुतं कार्य्यं सहस्त्रं वा समाहितैः॥६॥

पूर्णस्य स्वस्य जाप्यस्य दशांशहवनं मतम्॥
पायसेन च साज्येन समिद्भिस्तिल सर्पिषा॥७॥

श्रीवृक्षस्य फलैः पत्रैः कमलैः शतपत्रकैः॥
खर्जूरीभिश्च साज्याभिरन्यैर्यज्ञफलैस्तथा॥८॥

हवनं कारयेद्विद्वान् कृत्वाचार्यार्चनक्रियाम्॥
ब्राह्मणान् भोजयेत् सम्यग् दशांशोन यजेत्तथा॥९॥

एवं कृते विधाने च सर्वकर्म्मफलं लभेत।
चिंतितार्थस्य सिद्धिः स्यान्नात्र कार्य्या विचारणा॥१०॥"

(शान्तिरत्ले विशेषः) आयुः कामो घृतेनाग्नौ जुहुयाल्लक्षसंख्यया॥
अयुतं वा सहस्त्रं वा शतमष्टोत्तरं तु वा॥१॥

आरोग्यकामो जुहुयादर्ककाष्ठैर्घृतप्लुतैः॥
पयसा वापि जुहुयाद्गव्येनाज्येन वा पुनः॥२॥

पलाशसमिधा वापि सर्वरोगप्रशान्तये॥
अच्छिद्रैराम्रपर्णैस्तु यथोक्तैर्जुहुयाज्जवरे॥३॥

गुडूचीखण्डकैर्वापि खादिरैर्वा घृत प्लुतैः॥
प्रमेहे मधुना होमः पयसा वा घृतेन वा॥४॥

औदुम्बरसमिद्भिर्वा होम आमलकेन वा॥
गुल्मे शाल्मलिहोमः स्यात्तिलैः कृष्णैर्घृतेन वा॥५॥

वर्धमानसमिद्धामः सद्यः शूलहरो भवेत्।
करञ्जसमिधो वापि निर्गुण्डीसमिधोऽपि वा॥६॥

तैलेनाभ्यज्य जुहुयाद्वातरोगप्रशान्तये॥
शमीसमिद्भिर्जुहुयादतिसारप्रशान्तये॥७॥

शान्त्यर्थमक्षिरोगस्य पलाशसमिधः स्मृताः॥
उन्मत्तंसमिधो हुत्वा अपस्मारात्प्रमुच्यते॥८॥

कुबेराक्षेन्द्रवल्लीभ्यां नेत्रशूलेषु होमयेत्॥
तैलेनाभ्यज्य जुहयाद्वज्रखण्डैस्तथैव च॥९॥

मातुलुङ्गगुडूचीनां होमः कामलनाशानः॥
मधुरत्रहोमेन शान्तिः स्याद्राजयमणाम्॥१०॥

होमाच्च फलं मूलानां गर्भरोगः प्रशाम्यति॥
कुष्टे मसूरिकैर्होमो मधुरत्रयसंयुतैः॥११॥

अथवा तैलसंयुक्तैर्जुहुयाद्गौरसर्षपैः॥
ये चान्ये मुखरोगाः स्युः शिरोरोगास्तथैव च॥१२॥

ते सर्वे प्रशमं यान्ति तिलैर्होमाद्घृतप्लुतैः॥
औदराणां तु रोगाणां सर्वेषां शांतिमिच्छता॥१३॥

बिल्ववृक्षसमिद्धोमः कर्त्तव्यो द्विजसत्तम॥
अधःस्त्रावे तु जुहुयात्पद्मपत्रैर्घृतप्लुतैः॥१४॥

दूर्वाभिर्वा पयोक्ताभिर्जुहुयाच्चन्दनेन वा॥
अश्वत्थस्य समिद्भिश्व रक्तस्त्रावे तु होमयेत्॥१५॥

अथवा गोघृतेनैव रक्तातीसारशान्तये॥
अन्यरोगेषु सर्बेषु कण्ठरोगमहोदरे॥१६॥

त्रिभिः फलैस्तुजुहुयान्मधुक्षीरघृतप्लुतैः॥
मधुरत्रयहोमस्तु सर्वरोगोपशान्तये॥१७॥

आयुर्वेदेषु यत्प्रोक्तं यस्य रोगस्य भेषजम्॥
तस्य रोगस्य शान्त्यर्थं तेन तेन च होमयेत्॥१८॥

श्रीकामो बिल्ववृक्षस्य समिद्भिरथवा फलैः॥
पत्रैर्वाप्यस्य जुहुयान्महती श्रियमाप्नुयात्॥१९॥

विद्यार्थी जुहुयाद्यस्तु रुद्राक्षैर्गोघृतप्लुतैः॥
विद्यां चायुस्ततो वित्तं लभते नात्र संशयः॥२०॥

वृष्टिकामस्तु संपूज्य देवदेवं त्रियम्बकम्॥
अर्घ्यपाद्यादिभिर्देवमब्लिङ्गैरभिषेचयेत्॥२१॥

आपोहिष्ठेति तिसृंभिर्हिरण्यवर्णादिभिस्तथा॥
पावमानानुवाकेन त्र्यम्बकेत्यनया ऋचा॥२२॥

वैतसीभिः समिद्भिश्र जुहुयात्पयसाप्लुतैः॥
अयुतं वा सहस्त्रं वा जुहुयात्पयसापि वा॥२३॥

पुण्याहं वाचयेद्विप्रैर्ब्राह्मणान्भोजयेत्ततः॥
दशाहाभ्यन्तरे वृष्टिर्भवत्येव न संशायः॥२४॥

वृष्टिकामश्चार्द्रवासा वटवृक्षसमुद्भवैः॥
समिद्भिर्जुहुयान्मन्त्रान्सद्यो वृष्टिमवाप्नुयात्॥२५॥

नाभिमात्रे जले स्थित्वा ध्यायन् वै पुष्टिवर्धनम्॥
जपेत्रियम्वकं मन्त्रं महती वृष्टिमाप्नुयात्॥२६॥

अग्निहोत्रात्समादाय सितं भसितमुत्तमम्॥
अनया तु ऋचा हुत्वा जले वृष्टिं निवारयेत्॥२७॥

पत्रुकामस्तु जुहुयात्पायसं घृतसंयुतम्।
चरुशेषं स्वयं भुक्तवा पुत्रमाप्नोति मानवः॥२८॥

इति वसिष्ठकल्पोक्तं मृत्युंजयसंजीवनीमहामृत्युंजयविधानं समाप्तम्॥

अथ मृत्युंजयकवचम्॥

भैरव ऊवाच॥ श्रृणुष्व परमेशानि कवचं मन्मुखोदितम्॥

महामृत्यंजयस्यास्य न देयं परमाद्भुतम्॥१॥

यद्धृत्वा यत्पठित्वा च यच्छत्वा कवचोत्तमम्॥
त्रैलोक्याधिपतिर्भूत्वा सुखितोऽस्मि महेश्वरि॥२॥

तदेव वर्णयिष्यामि तव प्रीत्या वरानने॥
तथापि परमं तत्त्वं न दातव्यं दुरात्मने॥३॥

ॐ अस्य श्रीमहामृत्युंजयकवचस्य श्रीभैरव ऋषिः।
गायत्रीछन्दः। श्रीमृत्युंजय रुद्रो देवता।

ॐ बीजम्। जूं शक्तिः। सः कीलकम्। हौमिति तत्त्वम्॥

श्रीचतुर्वर्गफलसाधनाय पाठे विनियोगः॥
चन्द्रमण्डलमध्यस्थे रुद्रमाले विचित्रिते॥
तत्रस्थं चिन्तयेत्साध्यं मृत्युं प्राप्तोऽपि जीवति॥१॥

ॐ जूं सः हौ शिरः पातु देवो मृत्युंजयो मम॥
श्री शिवो वै ललाटं च ॐ हौं भुवौ सदाशिवः॥२॥

नीलकण्ठोऽवतान्नेत्रे कपर्द्दी मेऽवताच्छ्रुती॥
त्रिलोचनोऽवताद्गण्डौ नासां मे त्रिपुरान्तकः॥३॥

मुखं पीयूषघटभृदोष्ठौ मे कृत्तिकाम्बरः॥
हनुं मे तहाटकेशानो मुखं बटुकभैरवः॥४॥

कन्धरां कालमथनो गलं गणप्रियोऽवतु॥
स्कन्धो स्कन्दपिता पातु हस्तो मे गिरिशोऽवतु॥५॥

नखान्मे गिरिजानाथः पायादङ्गुलिसंयुतान्॥
स्तनौ तारापतिः पातु वक्षः पशुपतिर्मम॥६॥

कुक्षिं कुबेकवरदः पार्श्वौ मे मारशासनः॥
शर्वः पातु तथा नाभिं शूली पृष्ठं ममाऽवतु॥७॥

शिश्नं मे शंकरः पातुगुह्यं गुह्यकवल्लभः॥
कटिं कालान्तकः पायादूरू मेऽन्धकघातकः॥८॥

जागरूकोऽवताज्जानु जङ्घे मे कालभैरवः॥
गुल्फौ पायाज्जटाधारी पादौ मृत्युञ्जयोऽवतु॥९॥

पादादिमूर्द्धपर्यन्तं सद्योजातो ममाऽवतु॥
रक्षाहीनं नामहीनं वपुः पात्वमृतेश्वरः॥१०॥

पूर्वे बलविकरणो दक्षिणे कालशासनः॥
पश्चिमे पार्वतीनाथ उत्तरे मां मनोन्मनः॥११॥

ऐशान्यामीश्वरः पायादाग्नेय्यामग्निलोचनः॥
नैर्ऋत्यां शम्भुख्यान्मां वायव्यां वायुवाहनः॥१२॥

ऊर्ध्वे बलप्रमथनः पाताले परमेश्वरः॥
दश दिक्षुसदा पातु महामृत्युञ्जयश्व माम्॥१३॥

रणे राजकुले द्यूते विषमे प्राणसंश्रये॥
पायादों जूं महारुद्रो देवदेवो दशाक्षरः॥१४॥

प्रभाते पातु मां ब्रह्मा मध्याह्ने भैरवेऽवतु॥
सायं सर्वेश्वरः पातु निशायां नित्यचेतनः॥१५॥

अर्द्धरात्रे महादेवो निशान्ते मां महोदयः॥
सर्वदा सर्वतः पातु ऊँ जूं सः हौं मृत्युञ्जयः॥१६॥

इतीदं कवचं पुण्यं त्रिषु लोकेषु दुर्लभम्॥
सर्वमन्त्रमयं गुह्यं सर्व तन्त्रेषु गोपितम्॥१७॥

पुण्यं पुण्यप्रदं दिव्यं देवदेवाधिदैवतम्॥
य इदं च पठेन्मन्त्रं कवचं वाचयेत्ततः॥१८॥

तस्य हस्ते महादेवि त्र्यम्बकस्याष्टसिद्धयः॥
रणे धृत्वाचरद्युद्धं हत्वा शत्रूञ्जयं लभेत्॥१९॥

जयं कृत्वा गृहं देवि सं प्राप्स्यति सुखं पुनः॥
महाभये महारोगे महामारीभये तथा॥२०॥

दुर्भिक्षे शत्रुसंहारे पठेत्कवचमादरात्॥

इति श्रीमहामृत्युञ्जयकवचम्॥

अथ रुद्रविधानानि॥ तत्र तावत्
रुद्रजपाङ्गभूतदशक्षरीरुद्रमन्त्रपुरश्चरणप्रयोगः॥

सूमुहूर्ते शिवालयादिषु जपयोग्यभूमिंप्रकल्प्य।

पूर्वदिने प्रायश्चित्तं गायत्र्यायुतजपं च कृत्वा।

प्रारम्भदिने प्रातर्नित्यकर्म्म समाप्य।
जपस्थाने कूर्मसंशोधनं दीपस्थानशोधनं च कुर्य्यात्।

ततः स्वासने प्राङ्मुरव उदङ्मुरवो वा उपविश्य।

भस्मत्रिपुण्ड्रं रुद्राक्षधारणं कृत्वा, आचम्य, प्रणानायम्य, देशकालौ संकीर्त्य-अमुकगोत्रोमुकशर्मा श्रुतिस्मृतिपुराणागमोक्तफलावाप्तये अस्मिन् पुण्याहे मम सर्वविधपातकनिवृत्त्यर्थं वाऽमुक कामनासिद्धये श्रीरुद्रप्रीत्यर्थं रुद्रदशार्णमन्त्र-पुरश्वरणं स्वयं ब्राह्मणद्वारा वा करिष्ये।

इति संकल्प्य गणपतिपूजनं पुण्याहवाचनं मातृकापूजनं
नान्दीश्राद्धमाचार्यजापकवरणं च पूर्ववत्कुर्य्यात्॥

ततो भ्रद्रंकर्णेभिरिति जपस्थानसमीपमागत्य पूर्वोक्तद्वारपूजां कृत्वा प्रविश्य, स्वासने उपविश्य, आचम्य, प्राणानायम्य, आसनद्धिं भूतशुद्धिं स्वप्राणप्रतिष्ठामन्तर्मातृकाबहिर्मातृकान्यासं च पूर्ववत् कृत्वा पंचाक्षरोदितं श्रीकंठादिकलान्यासं कुर्य्यात्॥

अथ रुद्रविधानमंत्रन्यासः॥

"ऊँ नमो भगवते रुद्राय" इति दशाक्षरो मंत्रः॥

अस्य श्रीरुद्रमंत्रस्य बौधायन ऋषिः।

पंक्तिश्छन्दः। रुद्रो देवता।
ममाभीष्टसिद्ध्यर्थे जपे विनियोगः॥

ॐ यातेरुद्रशिवातनुरघोरापापकाशिनी॥
तयानस्तन्वाशंतमयागिरिशंताभिचाकशीहि॥१॥

इति शिखायाम्॥

ॐ अस्मिन्महत्यणवेंतरिक्षेभवाऽअधि॥
तेषाग्ंसहस्त्रयोजनेवधन्वानितन्मसि॥२॥

इति शिरसि॥

ॐ सहस्त्राणिसहस्त्रशोबाह्वोस्तवहेतयः॥
तासामीशानोभगव पराचीनामुखाकृधिः॥३॥

इति ललाटे॥

ॐ हग्ंसःशुचिषद्वसुरंतरिक्षसद्धोताव्वेदिषदतिथिर्दुरोणसत्॥
नृषद्वरसदृतसद्व्योमसदब्जागोजाऋतजाअद्रिजाऋतंबृहतः॥४॥

इति भ्रुवोर्मध्ये॥

ॐ त्र्यंबकंयजामहेसुगंधिंपुष्टिवर्द्धनम्।
उर्व्वारुकमिवबंधनान्मृत्योर्मुक्षीयमामृतात्॥५॥

इति नेत्रयोः॥ ॐ नमस्त्रृत्त्यायचपथ्यायचनमःकाट्यायचनीप्यायच॥
नमःकुल्ल्यायचसरस्यायचनमोनाद्यायचवैशंतायच॥६॥

इति कर्णयोः ॐ मानस्तोकेतनयेमान आयुषिमानोगोषुमानोअश्वेषुरीरिषः॥
मानोवीरान् रुद्रभामिनो वधीर्हविष्मन्तः सदमित्त्वाहवामहे॥७॥

इति नासिकायाम्॥

ॐ अवतत्यधनुष्टराṁसहस्त्राक्षशतेषुधे॥
निशीर्यशल्यानांमुखाशिवोनः सुमनाभव॥८॥

इति मुखे ॐ नीलग्रीवाःशितिकंठा शर्वाअधः क्षमाचरा॥
तेषाग्ंसहस्त्रयोजनेवधन्वानितन्मसि॥९॥

इति कंठे।। ॐ नीलग्रीवाःशितिकंठादिवगंरुद्राउपश्रिताःतेषागं
सहस्त्रयोजनेवधन्वानितन्मसि।।१०।।

इत्युपकंठे।। ॐ नमस्ते अस्त्वायुधायानातताययधृष्णवे।।
उभाभ्यामुततेनमोबाहुभ्यांतवधन्वने।।
इति स्कंधयोः।।११।।

ॐ योतेहेतिर्मीढुष्टमहस्तेबभूवतेधनुः।।

तयास्मान्विश्वतस्त्वमयक्ष्मयापरिभुज।।१२।।

इति बाह्वौः।। ॐ येतीर्थानिप्रचरंतिसृकाहस्तानिषंगिणः
तेषांसहस्त्रयोजनेवाधन्वनितन्मसि।।१३।।

इति हस्तयोः।। ॐ सद्योजातंप्रपद्यामिसद्योजातायवैनमोनमः।।
भवेभवेनातिभवेभवस्वमांभवोद्भवायनमः।।१४।।

इत्यङ्गुष्ठयोः।। ॐ वामदेवायनमोज्येष्ठायनमः श्रेष्ठायनमोरुद्रायनमः कालायनमः।।
कलविकरणायनमो बलविकरणायनमो बलायनमोबलंप्रमथनायनमोः सर्वभूत-
दमनायनमोमनोन्मनायनमः।।१५।।

इति तर्जन्योः।। ॐ अघोरेभ्योथघोरेभ्योघोरघोरतरेभ्यः।।
सर्वेभ्यः सशर्वेभ्योनमस्तेअस्तुरुद्ररूपेभ्यः।।१६।।

इति मध्यमयोः।। ॐ तत्पुरुषायविद्महेमहादेवायधीमहि।।
तन्नोरुद्रः प्रचोदयात्।।१७।।

इति अनामिकोः।। ॐ ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां
ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्माशिवोमेअस्तुसदाशिवोम्।।
इति कनिष्ठिकयोः।।१८।।

ॐ नमोवःकिरिकेभ्योदेवानांगृहृदयेभ्योनमोवि क्षीणत्केभ्योनम आनिर्हतेभ्यः इति
हृदि।।१९।।

ॐ नर्मोगणेभ्योगणपतिभ्यश्चवोनमोनमोव्राते
भ्योव्रातपतिभ्यश्चवोनमोनमोगृत्सेभ्योगृत्त्संपतिभ्यश्चवोनमोनमो
विरूप्रभ्योव्विश्चरूपेभ्यश्ववोनमः।।२०।।

इति पृष्ठे॥ ॐ नमोहिरण्यबाहवेसेनान्येदिशाञ्चपतयेनमो नमोवृक्षेभ्योहरिकेशेभ्यः पशूनाम्पतयेनमोनमः शष्पिञ्जरायत्विषीमतेपथीनाम्पतयेनमोनमोहरिके शायो-पवीतिनेपुष्टा नाम्पतयेनमोनमोबभ्लुशाय॥२१॥

इति पार्श्वद्वये॥ ॐ विज्ज्यन्धनुः कपर्दिनोविशल्योबाणवाग्ंउत्त॥

अनेशन्नस्येषवआभुरस्यनिषङ्गुतिः॥२॥

इति डठरे॥ ॐ हिरण्यगर्भः समवर्त्तताग्रेभूतस्यजातः पतिरेकआसीत्ः॥
सदाधारपृथिवींद्यामुतेमांकस्मैदेवायहविषाविधेम॥२३॥

इति नाभौ॥

ॐ मीढुष्टमशिवंतमशिवोनः सुमनांभव॥

परमेवृक्ष आयुधन्निधायकृत्तिंवसान आचरपिनाकम्बभ्रदागहि॥२४॥

इति कट्याम्॥ ॐ येभूतानामधिपतयोविशिखासः कपर्दिनंः॥
तेषाग्ं सहस्त्रयोजनेवधन्वानितन्मसि॥२५॥

इति गुह्ये॥ ॐ जातर्वेदसेसुनवा मसोममरातीयतोनिदहातिवेदः॥ सनः पर्षदतिदुर्गाणिविश्वानावेदवसिंधुंदुग्तिात्यग्निः॥२६॥

ॐ तामग्निवर्णांतपसाज्वलंतींर्वैरोचनींकंर्मफलेषुजुष्टाम्॥
दुर्गांदेवींशारणमहंप्रपद्येसुतरसितरसेनमः सुतरंसितरसे नमः॥१॥

अग्नेत्वंपारया॥२॥

विश्वानिनोदुर्गहा॥३॥

पृतनाजित॥४॥

इति मंत्रचतुष्टयरूपशिरसा सह॥

इति गुदे॥ ॐ मानोमहान्तमुतमानो अर्भकंमानउक्षंतमुतमानंउक्षितम्॥
मानोव्वधीःपितरंमोतमातरं प्रियामानस्तन्वोरुद्ररीरिषः॥

इति ऊर्वोः॥२७॥

ॐ एषर्तेरुद्रभागः सहस्वस्त्राम्बिकयातंजुषस्वस्वाहैषतेरुद्रभागआखुस्तेपशुः॥

इति जानुनोः॥२८॥

ॐ येपथांपथिरक्षयऐलबृदायव्युधः।।

तेषाग्ंसहस्त्रयोजनेवधन्वानितन्मसि।।

इति पादयोः।।२९।।

ॐ अद्धयंवोचदधिवक्ताप्रथमो दैव्योभिषक्।।

अहीश्चसर्व्वाञ्जम्भयन्त्सर्व्वाश्चयातुधान्योधराचीपरासुव।।

इति कवचे।।३०।।

ॐ नमोबिल्मिने च कवचिनेच मोव्वर्म्मिणेचवरूथिनेचनमः।।

श्रुतायच श्रुतसेनायचनमोदुन्दुभ्यायचाहनन्यायचनमोधृष्णवे।।
इत्युपकवचन्।।३१।।

कवचाद्विपरीतक्रममुपकवचम्) ॐ नमोऽस्तुनीलग्रीवायसहस्त्राक्षायमीढुषे।।

अथोये अस्यसत्त्वानोहंतेभ्योकरंनमः।।

इति तृतीय नेत्रे।।३२।।

ॐ प्रमुञ्चधन्वनस्त्वमुभयोरात्न्योर्ज्याम्।

याश्चतेहस्तइषवः पराताभगवोवप।।

इत्यस्त्रम्।।३३।।

इति प्रथमो न्यासः।। ॐ यएतावन्तश्चभूयाग्ंसश्चदिशोरुद्राव्वितस्थिरे।।

तेषाग्ंसहस्त्रयोजनेवधन्वानितन्मसि।।

इति दिग्बंधः।।१।।

अथाक्षरन्यासः ॐ नम शिरसिः।।१।।

ॐ नं नमः नासिकायाम्।।२।।

ॐ मों लमः ललाटे।।३।।

ॐ भं नमः मुखे।।४।।

ॐ गं नमः कण्ठे।।५।।

ॐ वं नमः हृदि॥६॥

ॐ तें नमः दक्षिणस्तने॥७॥

ॐ रु नमः वामस्तने॥८॥

ॐ द्रां नमः नाभौ॥९॥

ॐ यं नमः पादयोः॥१०॥

इति दशांगन्यासो द्वितीयः॥२॥

ॐ सद्योजातप्रपद्यामिसद्योजातायवैनमोनमः॥

भवेभवे नातिभवेभवस्वमांभवोद्धवायनमः इति पादयोर्न्यस्य

ॐ हंसोहंसेति ब्रूयात् ॐ वामदेवायनमोज्येष्ठायनमः श्रेष्ठायनमोरुद्रायनमः कालायनमः कलविकरणायनमोबलविकरणायनमोबलायनमोबलप्रमथायनमः सर्वभूतदमनायनमोमनोन्मनायनमः॥२॥

इति ऊर्वोर्न्यस्य हंसोहंसेति ब्रूयात्।

ॐ अघोरेभ्योथघोरेभ्योघोरघोरतरेभ्यः सर्वभूतदमनायनमोमनोन्मनोन्मनायनमः॥२॥

ॐ अघोरेभ्योथगोरेभ्यो घोर घोरतरेभ्यः सर्वेभ्यः सर्व्वशर्वेभ्यो नमस्ते अस्तुरुद्ररूपेभ्यः॥३॥

ह्यदिविन्यस्य हंसोहंसेति ब्रूयात् ॐ तत्पुरुषायविद्महैमहादेवायधीमहि॥

तन्नोंरुद्रःप्रचोदयात्॥४॥

मुखे विन्यस्य हंसोहंसेति ब्रूयात्।

ॐ ईशानः सर्वविद्यानामीश्वरः सर्वबूतानाम्॥

ब्रह्माधिपतिर्ब्रह्मणोधिपतिःब्रह्माशिवोमेअस्तुसदाशिवोम्॥
इति मूर्ध्नि विन्यस्य हंसोहंसेति ब्रूयात्॥५॥

इति तृतीयो न्यासः॥ एवंन्यासत्रयंकृत्वासम्पुटंकुर्यात्॥

तद्यथा कृतांजलिपुटः ॐ त्रातारमिन्द्रमवितारमिन्द्रगंहवेहवेसुहवगंशूरमिन्द्रम्॥

ह्वयामिशुक्रम्पुरुहूतमिन्द्रगं्स्वस्तिनोमघवाधात्विन्द्रः।।
इति मन्त्रेण प्राच्यामिन्द्रं नमस्कुर्यात्।।१।।

ॐ त्वन्नोअग्रेवरुणस्यविद्वान्देवस्यहेडोअवयासिसीष्ठा।।

यजिष्ठोवह्नितम शोशुचानोविश्वाद्वेषागं् सिप्रमुमुग्ध्यस्मत्।।
इत्याग्नेय्यामग्निंप्रणमेत्।।२।।

ॐ सुगन्नपंथाम्प्रदिशन्नएहिज्ज्योतिष्मध्येह्यजरन्नआयुः।
अपैतुमृत्युरमृतन्न आगाद्वैवस्वतोनोअभयंकृणोतु।।

इति दक्षिणस्यां यमं प्रणमेत्।।३।।

ॐ असुन्वंतमयजमानमिच्छस्तेनस्येत्यामन्विहितस्करस्य।।

अन्यमस्मदिच्छसातइत्यानमोदेविनिर्ऋतेतुभ्यमस्तु।।

इति नैर्ऋत्यां नैर्ऋतिं प्रणमेत्।।४।।

ॐ तत्वायामिब्रह्मणावन्दमानस्तदाशास्तेयजमानोहविर्भिः।।

अहेडमानोवरुणेहबोध्युरुशगं्समान अयुप्रमोंषीः।।

इति पश्चिमायां वरुणं प्रणमेत्।।५।।

ॐ आनेनियुद्भि शतिनीभिरध्वरगं्सहस्त्रिणीभिरुपयाहियज्ञम्।।

व्यायौअस्मिन्त्सवनेमादयस्वयूयंपात स्वस्तिभिः सदानः। सांबसदाशिवाय इति
वायव्यं वायुं प्रणमेत्।।६।।

ॐ वायगं्सोमव्रतेतवमनेस्तनुषुबिभ्रतः।।
प्रजावंतः सचेमहि।। इति उदीच्यां कुबेरं प्रणमेत्।।७।।

ॐ तमीशानंजगतस्तस्थुषस्पतिंधियंजिन्वमवसेहूमहेवयम्।।

पूषानोवेयथावेदसामसद्वृधेरक्षितापायुरदब्धस्वस्तथे।।

इति ईशान्याम् ईश्वरं प्रणमेत्।।८।।

ॐ अस्मेरुद्रामेहनापर्वतासोवृत्रहत्येभरंहूतौसजोषाः।।

यंशगं्संतेस्तुवतेधायिपज्रइन्द्रज्ज्येष्ठा अस्मान् अवंतु देवाः।।

इत्यूर्ध्वं ब्रह्माणं प्रणमेत्॥९॥

ॐ स्योनापृथिविनोभवानृक्षरानिवेशंनी।
यच्छानःशर्म्मसप्रथाः॥ इत्यधः पृथिवीं प्रणमेत्॥१०॥

एवं यः संपुटं कुर्थात् स स्यात् किल्बिषवर्जितः।
तं दीप्यमानमीक्ष्यन्ते प्रेतचोराद्युपद्रवाः॥

न पराभवितुं शक्ताः पलायन्ते विदूरतः।
''एवं संपुटं कृत्वा चतुर्थे रक्षान्यासं कुर्यात्॥

ॐ मनोजूतिर्जुषतामाज्ज्यस्यबृहस्पतिर्य्यज्ञमिमन्तंनोत्वरिष्टंय्यज्ञग्ं समिमंदंधातु॥
विश्वेदेवास इहमादयन्तामोम्प्रतिष्ठ॥१॥

इति गुह्ये॥ ॐ अबोध्यग्निः समिधाजनानाम्प्रतिधेनुमिवायतीमुषासम्॥
जिह्वाइंवप्रवयामु ज्जिहानुप्रभानव सिस्त्रतेनाकमच्छ॥ इति जठरानले॥२॥

ॐ मूर्द्धानंदिवोअरतिंपृथिव्यावैश्वानरमृत आजातमग्निङ्कविग्सम्प्राजमतिथि-
जनानामासन्नापात्रजनयंतदेवाः॥३॥

इति हृदये॥ ॐ मर्म्माणितेवर्म्मणााच्छादयामिसो मंस्त्वाराजामृतेनानुवस्ताम्॥
उरोर्वरीयोवरुणस्तेकृणोतुजयन्तन्त्वानुदेवामदन्तु॥
इति मुखे॥

ॐ जातवेदायदिवापावकोसि वैश्वानरोयदिवा
वैद्युतोसिसंप्रजाभ्योयजमानायलोकंऊर्जंपुष्टिंदंददभ्याववृत्स्व॥१॥

ॐ विश्वतंश्चक्षुरुतव्विश्वतोमुखोविश्वतो बाहुरुतविश्वतंस्पात्॥

सं बाहुभ्यांधमतिसंपतत्रैद्यावाभूमीजनयन्देव एकः इति शिरसि॥५॥

इति चतुर्थो न्यासः।

अथ षडंगन्यासः पञ्चमः॥ ॐ ग्रज्जाग्रत इत्यादि शिवसंकल्पांते ॐ हृदयाय नमः॥१॥

ॐ सहस्त्रशीर्षा पुरुष इत्यादि पुरुषसूक्तान्तेते ॐ शिरसे स्वाहा॥२॥

ॐ अद्भ्य संभूत इत्याद्युत्तरनारायणांते शिखायै वषट्॥३॥

ॐ आशुः शिशान इत्यप्रतिरथांते कचायहूम्॥४॥

ॐ विभ्राड्बृहदित्यादिसूक्तांते नेत्रत्रयाय वौषट्॥५॥

ॐ नमस्ते रुद्रमन्यव इत्यादिशतरुद्रियांते अस्त्राय फट्॥६॥

इति पंचमो न्यासः॥५॥

यज्जाग्रत इति षडर्चस्य शिवसंकल्प ऋषिस्त्रिष्टुप्छन्दः मनो हृदयन्यासे विनियोगः॥

ॐ यज्जाग्रतोदूरमुदैतिदैवंतत्सप्तस्यतथैवेतिदूरङ्गमंयोतिषाज्योतिरेकंतन्मेमनः। शिवसंकल्पमस्तु।१॥

येनकर्म्माण्यपसोमनीषिणोयज्ञेकृण्वन्तिविदथेषुधीराः॥

यदपूर्वंयक्षमन्तं प्रजानान्तन्मेमनः शिवसंकल्पमस्तु॥२॥

यत्प्रज्ञामुतचेतोधृतिंश्चयज्ज्योतिरन्तरमृतम्प्रजासु॥
यस्मान्नऋतेकिञ्चनकर्मक्रियतेतन्मेमनः शिवसंकल्पमस्तु॥३॥

येनेदम्भूतम्भुवनंभविष्यत्परिगृहीतममृतेनसर्वम्।
येनयज्ञस्त्रायतेसप्तहोतातन्मेमनःशिवसकल्पमस्तु॥४॥

यस्मिन्नृच समाजयूगुंषियस्मिन्प्रतिष्ठिारशनाभाविभाराः॥

यस्मिँश्चित्तगुंसर्वमोतम्प्रजानान्त न्मेमनः शिवसंकल्पमस्तु॥५॥

सुषारथिरश्वानिवयन्मनुष्यान्नेनियतैपशुंभिव्याजिनइव॥
हृत्प्रतिष्ठंयदचिरञ्जर्विष्ठन्तन्मेमनः शिवसंकल्पमस्तु॥६॥

इति हृदयाय नमः॥१॥

सहस्त्रशीर्षेति षोडशंर्चस्य पुरुषसूक्तस्य नारायण ऋषिः आद्यानां पंचदशानामनुष्टुप् छंदः यज्ञेनयज्ञमित्यस्य त्रिष्टुप् छंदः जगदीजं पुरुषो देवता शिरोन्यासे विनियोगः॥

ॐ सहस्त्रंशीर्षापुरुषः सहस्त्राक्षः सहसपात्।
सभूमिंसर्वतो वृत्वात्यतिप्टद्दशाङ्गुलम्॥१॥

पुरुंषएवेदगुंसर्वंयद्भूतंयच्च भव्यम्॥
उतामृंत त्वस्येशांनोयदन्नेनातिरोहति॥२॥

एतावांनस्यमहिमातोज्ज्यायाँश्चपुरुषः॥
पादोंस्याविश्वाभूतानित्रपादंस्यामृतंन्दिवि॥३॥

त्रिपादूर्ध्वउदैत्पुरुषः पादोस्येहांभवुत्पुनः॥
ततोविष्ष्वङ्व्यक्रामत्साशनानशनेअभि॥४॥

तस्मद्विराडंजायतविराजो आधिपुरुषः॥
सजातो अत्यरिच्यतपश्चश्चाद्भूमिमथोपुरः॥५॥

तस्माद्यज्ञात्सर्वहुत सम्भृतम्पृषदाज्यम्॥
पशूँस्ताँश्वक्रे वायव्यानारण्यान्ग्राम्याश्चये॥६॥

तस्म्माद्यज्ञात्सर्वहुतऋचस्सामानिजज्ञिरे॥
छन्दाँसि जज्ञिरे तस्माद्यजुस्तस्मादजायत॥७॥

तस्मादश्वा अजायन्तयेकेचौभयादतः॥
गावोहजज्ञिरेतम्स्मात्तस्माज्जाता अजावयः॥८॥

तंय्यज्ञम्बर्हिषिप्रौक्षन्पुरुषञ्जातमग्रतः॥
तेनदेवाअयजन्तसाद्ध्या ऋषयश्चये॥९॥

यत्त्पुरुषंव्यदधुःकतिधाव्यकल्प्यन्॥
मुखङ्किम्मंस्यकौबाहूकाऊमुरूपादाउच्च्येते॥१०॥

ब्राह्मणोस्यमुखंमासीद्बाहूराजन्य कृतः॥
ऊरूतदस्ययद्वैश्यः पद्भ्याँ शूद्रो अजायत॥११॥

चन्द्रमामनसोजातश्चक्षोःसूर्यो अजायत।
श्रोत्राद्वायुश्चप्राणश्चमुखादग्निरजायत॥१२॥

नाभ्या आसीदन्तरिद्क्षंशीर्ष्णौद्यौस्समवर्त्तत॥
पद्भ्यद्भ्याम्भूमिद्दिशश्रोत्रात्तथालोकाग्ं अकल्पयन्॥१३॥

यत्पुरुषेणहविषादेवयज्ञमतन्वत॥
वसन्तोस्यासीदाज्ज्यङ्ग्रीष्मइध्मः शरद्धविः॥१४॥

सप्तास्यांसन्परिधयत्रिसप्तसमिधकृताः॥
देवायद्यज्ञन्तन्वानाअबध्नन्पुरुषम्पशुम्॥१५॥

यज्ञेनयज्ञमयजन्तदेवास्तानिधर्माणिप्रथमान्यासन्॥
तेहनाकम्महिमानः सचन्तयत्रपूर्वे साद्ध्याः सन्ति देवाः॥१६॥

इति शिरसे स्वाहा॥२॥

अद्भ्यः संभूत इति षड्ऋचस्योत्तरनारायणस्य नारायण ऋषिः आद्यानां तिसृणां त्रिष्टुप् छंदश्वतुर्थपञ्चमयोरनुष्टुप् छदः आदित्यो देवता शिखान्यासे विनियोगः। अद्भ्यःसम्भूतपृथिव्यैरसाच्चविश्वकर्म्मणस्समवर्त्तताग्रे॥

तस्यत्वष्टाविदधद्रूपमेतितन्मर्त्यस्यदेवत्वमा जानमग्रे॥१७॥

वेदाहरमेतम्पुरुषम्महान्तमादित्यवर्णन्तमंसःपरस्तात्॥
तेवार्विदित्वातिमृत्युमेतिनान्यः पन्थाविद्यतेयंनाय॥१८॥

प्रजापतिश्चरतिगभै अन्तरजायमानो बहुधाविजायते॥
तययोनिम्परिपश्यन्तिधीरास्तस्मिन्हतस्थुर्भुवनानिविश्वा॥१९॥

योदेवेभ्य आतपतियोदेवानाम्पुरोहितः॥
पूर्व्वोयोदवेभ्योजातोनमोरुचायब्राह्मये॥२०॥

रुचम्ब्राह्मञ्जनयन्तोदेवाः अग्रेतदंब्रुवन्॥
यस्त्वेवम्ब्राह्मणोविद्यात्तस्यदेवा असन्वशे॥२१॥

श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपाश्र्वेनक्षत्राणिरूपम शिवनौव्यात्तम्॥
इष्टंमनिषाणामुम्मनिषाणसर्व्वलोकम्मइनिषाण॥२२॥

इति शिखायै वषट्॥३॥

आशुःशिशान इति सप्तदशानामप्रतिरथ ऋषिस्त्रिष्टुप् छन्दः इन्द्रो देवता कवचन्यासे विनियोगः॥

ॐ आशुः शिशानोबृषभोनभीमोघनाघनः क्षोभंणश्चर्षणीनाम्॥
सङ्क्रन्दनोनिमिषएकवीरशत सेनाअजयत्साकमिन्द्रः॥१॥

सङ्क्रन्दनेनानिमिषेणजिष्णुनायुत्कारेणदुश्चयवनेनधृष्णुनां॥
तदिन्द्रेणजयततत्संहद्धंय्युधोतरइषुहस्तेनर्वृष्णा॥२॥

सइषुंहस्तैसनिषङ्गिभर्वशीस स्त्रष्टासयुधइन्द्रौगणेन
सष्टजित्सोमपाबाहुशद्धर्यग्रधंन्वाप्रतिहिताभिरस्ता॥३॥

बृहस्पतेपरिदीयारथैनरक्षोहामित्रान् अपबाध मानः॥
प्रभञ्जन्त्सेना प्प्रमृणोयुधाजयन्नस्माकमेद्धयविता रथानाम्॥४॥

बलविज्ञायस्थविर प्रवीरसहस्वान्वाजीसहमा नउग्रः॥
अभिवीरोअभिसत्त्वासहोजाजैत्रमिन्द्ररथमातिष्ठगोवित्॥५॥

गोत्रभिदङ्गोविदंवज्रबाहुञ्जयन्तमज्म प्रमृणन्तमोजसा॥
इमँसंजाता अनुवीरयद्धमिन्द्रसखायो अनुसरं भद्धम्॥६॥

अभिगोत्राणिसहसागाहमानोदयो वीरशतमन्युरिन्द्रः॥
दुश्चयवम पृतनाषाडयुद्धयोस्माकँ सेना अवतुप्रयुत्सु॥७॥

इन्द्रआसान्नेताबृहस्पतिर्द्दक्षिणायज्ञपुरएतुसोमः॥
देवसेनानामभिभञ्जतीनाञ्जयंतीनाम्मरुतौयन्त्वग्रम्॥८॥

इन्द्रंस्यवृष्णोवरूणस्यराज्ञ आदित्यानाम्मरुता शर्द्ध उग्रम्॥
महाभनसाम्भुवनच्चयवानाङ्घोषो देवानाञ्चयतामुदस्त्थात्॥९॥

उद्धर्षयमधवन्नायुधान्नयुत्त्सत्त्व नाम्मामकानाम्मनाँसि॥
उद्वत्रहन्वाजिनांवार्जिनान्युदद्रथानाञ्जयतां य्यन्तुघोषाः॥१०॥

अस्म्माकमिन्द्रः समृंतेषुद्धजेष्वस्म्माकंया इषवस्ताजयन्तु॥
अस्माकंवीरा उत्तरेभवन्त्वस्म्मान् उदेवा अवताहनेषु॥११॥

अमीषाञ्चित्तम्प्रतिलोभयन्तीगृहाणाङ्गन्न्यप्वेपरेहि।
अभिप्रेहिनिर्द्दहत्हत्त्सुशोकैरन्धेनामित्रास्तमसासचन्ताम्॥१२॥

अवसृद्यापरापतशरव्येब्रह्मसँशितेगच्छामित्रान्प्रपद्यस्वमामीषाङ्कञ्चनोच्छिषः॥१३॥

प्रेताजयतानरइन्द्रोवः शर्म्मयच्छतु॥
उग्रावः सन्तुबाहवोनाधृष्य्यायथासथ॥१४॥

असौयासेनाम रुतपरेषामभ्यौतिनओजसा स्प्पद्धमाना॥
ताङ्गूहततमसापव्रतेनयथामी अन्योअन्नयन्नजानन्॥१५॥

यत्रबाणासम्पतन्तिकुमाराविशिखाइव॥
तन्नइन्द्रोबृहस्पतिरदितिशर्म्मयच्छतुविश्वाहाशर्म्मयच्छतु॥१६॥

मर्म्माणितेवर्मणाच्छादयामि सोमस्त्वाराजामृतेनानुवस्ताम्॥
उरोर्वरीयोवरूणस्तेकृणोतुजयन्तन्त्वानुदेवामदंतु॥१७॥

इति कवचायहुम्॥४॥

विभ्राडिति सप्तदशानां विभ्राट्ऋषिर्जगती छन्दः सूर्यो देवता नेत्रन्यासे विनियोगः॥

ॐ विभ्राडबृहत्पिबतुसोम्यम्मद्ध्वायुर्द्दधद्यज्ञपं तावविहृतम्॥
वातजूतोयो अभिरक्षतित्मनाप्रजा पुपोषपुरुधाविराजति॥१॥

उदुत्यञ्जातवेदसन्देवंवहन्तिकेतवं॥
दृशेविश्श्वायसूर्यम्॥२॥

येनाावकक्षसाभुरण्यन्तञ्जनां अनु॥
त्वंवरुणपश्यसि॥३॥

दैव्यावध्वर्य्यूआगतगंरथेनसूर्यत्वचा॥
मध्वायज्ञगंसमञ्जाथे॥
तम्प्रत्क्रथायंवेनश्चित्रन्देवानाम्॥४॥

तम्प्रत्क्रथापूर्व्वथाविश्वथेमथाज्जयेष्ठतातिम्बर्हिषद स्वार्दिम्॥
प्रतीचीनंवृजनन्दोहसेधुनिमाशुञ्जयन्तमनुयासुवर्द्धसे॥५॥

अयंवेनश्चोदयत्पृश्निगर्भाज्योतिर्जरायूरजसोविमाने॥
इममपा सगमेसूर्य्यस्यशिशुन्नविप्रामतिभीरिहन्ति॥६॥

चित्रन्देवानामुदगादनीकञ्चक्षुर्मित्रस्यवरुणस्याग्ने॥
आप्प्राद्यावापृथिवी अन्तरिक्षगंसूर्य्य आत्माजगत स्तस्थुषश्च॥७॥

आनइडाभिर्विदथेसुशस्तिविश्वानरः सवितादेव एतु॥

अपियथा युवानोमत्सथानोविश्वञ्जगदभिपित्वेमनीषा॥८॥

यदद्यकच्चवृत्रहन्नुदगा अभिसूर्य्य॥
सर्वन्तादिन्द्रतेवशे॥९॥

तरणिविरववदर्शतोज्ज्योतिष्कृदसिसूर्य्य॥
विश्वमाभासिरोचनम्॥१०॥

तत्सूर्य्यस्यदेवत्वन्तन्महित्वम्मद्ध्याकतोर्विततगंसञ्जभार॥
यदेदयुक्तहरित सधस्त्थादाद्रात्रीवासस्तनुतेसिमस्मै॥११॥

तन्मित्रस्यवरुणस्याभिचक्षेसूर्य्योरूपङ्कृणुतेद्यौरुपस्थै॥
अनन्तमन्यद्रुशदस्य पाजः कृष्णमन्यद्धरितःसम्भरन्तिः॥१२॥

बण्महान् असिसूर्य्यबडादित्यमहान् आसि॥
महस्तैसतोमहिमापनस्यतेद्धादेवमहान् असि॥१३॥

बट्सूर्य्यश्श्रवसामहान् असिसत्रादेवमहान् असि॥
मन्हादेवानामसुर्य्य पुरोहितोविभुज्योतिरदाभ्यम्॥१४॥

श्रायन्त इवस्र्येविश्वेदिन्द्रस्यभक्षत॥
वसृनिजातेजनमान औजस्प्रतिभागन्नदीधिम॥१५॥

अद्यादेव उदितासूर्य्यस्यनिरगुंहसः पिपृतानिरवद्यात्॥
तन्नोमित्रोवरुणोमामहन्तामदिति सिन्धुःपृथिवीउतद्यौ॥१६॥

आकृष्णेनरजसावर्त्तमानोनिवेशयन्नमृतंम्मर्त्यञ्च॥
हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन्॥१७॥

इति नेत्रत्रयाय वौषट्॥५॥

अस्य शतरुद्रियस्याघोर ऋषिः।

रुद्रो देवता नमस्तइति गायत्री छन्दो यात इति तिसृणामनुष्टुप् छन्दोअध्यवोचदितिति सृणांपङ्क्तिश्छन्दो नमोस्त्वित्यादि सप्तानामनुष्टुप्छन्दो मान इति द्वयोः कुत्स ऋषिर्जगतीच्छन्द एकररुद्रो देवता नमोहिरण्यबाहव इत्यादीनि यहूगुंषि एकरुद्रो देवता द्रापे अन्धस इत्युपरिष्टाद्बृहती छन्द इमारुद्रायेति जगतीछन्दो यात इत्यनुष्टुप् छन्दः परिणोमीदुष्टम इति त्रिष्टुप् छन्दो विकिरिदंविलोहितसहस्त्राणिसहस्त्रश इत्यनुष्टप् छन्दो असंख्यातेत्यादिदशानामनुष्टुप्छन्दो बहुरुद्रो देवता नमोस्त्वित्यादि त्रीणि यजुगुं षि बहुरुद्रदैवत्यानि वयगुंसोमेति गायत्रीछन्द एषते इति यजुरवरुद्रमिति पङ्क्तिश्छंन्दो भेपूजमिति ककुप् छन्दस्त्रयम्बकमिति द्वेअनुष्टुभावेतत्तइत्यास्तारपङ्क्तिश्छन्दस्त्रयायुषमित्युष्णिक्। छन्दः॥

शिवोनामेतियजुर्नतँर्विदेति द्वे त्रिष्टुभो अस्त्रान्यासे विनियोगः॥

ॐ नमस्तेरुद्रमन्यवउतोतइषावेनमः बाहुभ्यामुततेनम॥१॥

यातेरुद्रशिवातनूरघोरापापकाशिनी॥
तयानस्तन्वाशन्तमया गिरिशन्ताभिचाकशीहि॥२॥

यामिषुङ्गिरिशन्तहस्तैबिभर्ष्यस्तवे॥
शिवाङ्गिरित्रतांकुरुमांहिगुंसी पुरुषञ्जगत्॥३॥

शिवेन ववसात्वागिरिशाच्छावदामसि॥
यथा नः सर्वमिज्जगदयक्ष्मगं्सुमनाअसत्॥४॥

अद्ध्यवोचदधिक्ताप्प्रथमोदैव्योभिषक्॥
अहीग्श्च सर्व्वाञ्जम्भयन्त्सर्वाश्चयातुधान्योधराचीपरासुवः॥५॥

असौयस्ताम्रो अरुणउतबभ्रुःसुमङ्गलः॥
येचैमाग्ंरुद्रोअभितोदक्षिुश्रितासहस्त्रशो वैषाग्ंहैडईमहे॥६॥

असौयोवसर्पतिनीलग्रीवोविलोहितः॥
उतैनंगोपाअटृश्रन्नटृश्रन्नुदहार्य्यः सट्टष्टोमृडयातिनः॥७॥

नमोस्तुनीलग्रीवायसहस्त्राक्षायमीढुषे॥
अथोयेअस्यसत्त्वानोहन्तेभ्योकरन्नम॥८॥

प्रमुञ्चधन्वनस्त्वमुभयोरात्निर्योर्ज्ज्याम्॥
याश्चतेहस्तइषवःपराताभगवोवप॥९॥

विज्यन्धनुः कपर्दिनोविशल्योबाणवाग्ंउत॥
अनेशन्नस्येषवआभुरस्यनिषंगति॥१०॥

योतेहेतिर्मीढुष्टमहस्तेबभूवतेधनुः॥
तयास्यान्विश्वतस्त्वमयक्ष्म्मयापरिब्भुज॥११॥

परितेधन्वनोहेतिरस्म्मान्वृणक्तुविश्वतं॥
अथोयइषुधिस्तवारे अस्म्मन्निधेहितम्॥१२॥

अवतत्त्यधनुष्ट्वग्ंसहंस्त्राक्षशतेषुधे॥
निशीर्यशल्यानाम्मुखांशिवोनंः सुमनांभव॥१३॥

नमंस्तेअस्त्वायुंधायानांतताायधृष्णवें॥
उभाभ्यांमुततेनमोंबाहुभ्यान्तवधन्वने॥१४॥

मानोंमहान्तंमुतमानोंअर्भकम्मानउक्षंन्तमुतमानंउक्षितम्॥
मानोंवधीः पितरंमोतंमातरम्मानः प्रियास्तन्वोरुद्ररीरिषः॥१५॥

मानस्तोकेतनंयेमानआयुंषिमानोगोषुमानोअश्वेंषुरीरिषः॥
मानोंवीरान्रुंद्रभामिनोंवधीर्हविष्मंतसदमित्त्वाहवामहे॥१६॥

इत्यादि षट्षष्टि॥६६॥

मंत्रान् पठित्वा ॐ वयग्ंसोमं॥६७॥

एषते रुद्र॥६८॥

अवरुद्रमदी॥६९॥

भेषजमसि॥७०॥

त्र्यंबकं यजामहे॥७१॥

एतत्तेरुद्रावसन्तेन॥७२॥

त्र्यायुषंजमदग्नेः॥७३॥

शिवोनामासि॥७४॥

नमस्तेरुद्रमन्यव इत्यादि पुनःषोडश मंत्रान्॥९०॥

(पुनः) एषतेरुद्रभाग॥९१॥

अवरुद्द्रमदी॥९२॥

नमस्ते रुद्र॥९३॥

याते रुद्र॥९४॥

नमंविदाथयइमा॥९५॥

विश्वकर्माह्यनिष्ट॥९६॥

मीढुष्टमशिवतम॥९७॥

विकिरिदविलेहित॥९८॥

सहस्राणिसहस्रशो॥९९॥

असङ्ख्याता॥१००॥

इत्यस्त्राय फट्॥६॥

एतच्छतरुद्रियं वदंति ''अग्निदाहात्सुरापानादकृत्याचरणात्तथा॥
सुवर्णहरणाच्चैव वृषलीगमनात्तथा॥१॥

ब्रह्महत्यादिकात् पापाच्छतरुद्रियपाठतः।।
सुनिस्तीर्यैव गच्छंति ब्राह्मणः शिवसन्निधौ।।२।।

एवं पंचन्यासं कृत्त्वा साष्टाङ्गं प्रणम्यअष्टभिर्मन्त्रैर्नमस्कारं कुर्य्यात्।।

ॐ हिरण्यगर्भः समवर्तताग्रेभूतस्यजातः पतिरेक आसीत्।।
सदाधारपृथिवींद्यातुतेमांकस्मैदेवायहविषाविधेम।।१।

यः प्राणतोनिमिषतोमहित्वैकइद्राजाजगतोबभूव।
यईशेअस्यद्विपदश्चतुष्पदः कस्मैदेवायहविषाविधेम।।२।।

ॐ ब्रह्मजाज्ञानम्प्रथमम्पुरस्ताद्विसीमुतः सुरुचोवेन आवः।।
सबुध्न्याउपमा अस्यविष्ठासतश्चयोनिमसतश्चविवः।।३।।

महीद्यौपृथिवीचन इमंयज्ञम्मिमिक्षताम्।।
पिपृतान्नोभरीमभिः।।४।।

उपश्वासयपृथिवीमुतद्यापुरुत्रातेमरूतांविष्टितंजगत्।
सदुंदुभेसजूरिद्रेणदेवैर्दूराद्दवीयो अपसेधशत्रून्।।५।।

अग्नेनय सुपथारायेअस्मान्विश्वानिदेववयुनानिविद्वान्।।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठांतेनमउक्तिंविधेम।।६।।

यातं अग्नेयज्ञियातनूस्तयेह्यारोहात्मानम्।।
अच्छावसूनिकृण्वन्नस्मैनर्यापुरूणियज्ञोभूत्वायज्ञमासीदस्वांयोनिजातवेदोबभूव आजायमानः सक्षयएहि।।७।।

अथावः स्वाहाग्रयेदाशोमपरीलाभिर्घृतवद्भिश्चहव्यैः तेभिन्नोअग्रे अमृतैर्महोभिः श्रितंपूर्भिरायसीभिर्निपाहि।।८।।

इत्याष्टावृचो जपित्वा।।

अथात्मानं रुद्ररूपं ध्यायेत्।।

अथ ध्यानम्।। केलासाचलसन्निभं त्रिनयनं पञ्चास्यमंबायुतं नीलग्रीवमहीश-भूषणधरं व्याघ्रत्वचा प्रावृतम्।।

अक्षस्त्रग्वरकुण्डिकाभयकरं चांद्रीं कला विभ्रतं गाङ्गांभोविलसज्जटं दशभुजं वंदे महेशं परम्।।१।।

इति ध्यात्वा मानसोपचारैर्देवं संपूज्य यथाशक्तिमूलमंत्रं जपेत्।।

''जपान्ते पुनराचमनं प्राणायामं च विधाय जलं गृहित्वा स्ववामभागे देवदक्षिण-करे ऊँ गुह्यातिगुह्येति मन्त्रेण जप समर्पणं कुर्य्यात्।।

इत्यभेदोपासनम्'' यदि तु भेदेनोपासीत तदानीतनं पूजाविधि सांगं सोपचारं ब्रूते।।

तत्रैवं क्रमस्तावत् यंत्रोद्वारस्तत्पूजा च।।

प्रणम्य जगतामीशमुमादेहार्द्धधारिणम्।।
यन्त्रोद्धारमहं वक्ष्ये रुद्रकल्पानुसारतः।।१।।

मध्ये वृत्तं समालिख्य तन्मध्ये च दशाक्षरम्।।
बहिरष्टदलं पटन ततः षोडशपत्रकम्।।२।।

चतुर्विंशतिपत्राढ्यां द्वात्रिशत्पत्रकं तथा।।
चत्वारिंशत्पत्रकं तु वृतंसूर्यसमप्रभम्।।३।।

पंचपद्मात्मकं वृत्तं चतुरस्त्रं च भूगृहम्।।
सत्त्वं रजस्तमश्चेति त्रिगुणैः परितो वृतम्।।४।।

चतुर्द्वारं द्वारदेशो बहिर्नागसमावृतम्।।
रूद्रपीठमिति ख्यातं देवतास्तत्र विन्यसेत्।।५।।

चत्वारिंशच्छतं चैकं देवतानामुदाहृतम्।।
कर्णिकामध्यदेशे तु रुद्रं पंचास्यमालिखेत्।।

अथ पीठपूजा।। तत्रादौ स्वे स्वे स्थाने मण्डूकादिपरतत्त्वान्तपीठदेवताः पूर्ववदावाह्य मण्डूकादिपरतत्त्वान्तपीठदेवताभ्योनमः इति गन्ध्पुष्पैः संपूज्य पूर्वा दिषु ऊँ वामायै नमः।।१।।

ऊँ ज्यैष्ठायै नमः।।२।।

ऊँ रौद्रै नमः।।३।।

ऊँ काल्यै नमः।।४।।

ऊँ कलविकरिण्यै नमः।।५।।

ऊँ बलविकरिण्यै नमः।।६।।

ॐ बलप्रमथिन्यै नमः।।७।।

ॐ सर्वभूतदमन्यै नमः।।८।।

पीठमध्ये ॐ मनोन्मन्यै नमः।।९।।

इति पीठिशक्तीः पूजयेत्।।

ततः पुष्पाण्यञ्जलिना गृहीत्वा ''ॐ नमोभगवते सकलगुणात्मशक्तियुक्तायानंताय येगपीठात्मने नमः''

इति मन्त्रेण पीठोपरि पुष्पाञ्जलिनासनं दद्यात्।

ततः पीठमध्ये ॐ महीद्यौरित्यादिमन्त्रैः पूर्ववत्ताम्रकलशं संस्थाप्य ॐ तत्त्वायामीति वरुणमावाह्य, ॐ अपांपतिवरुणाय नमः इति षोडशोपचारः संपूज्य, कलशस्य मुखे विष्णुरित्यभि मन्त्र्य देवदानवसंवादे इत्यादि प्रार्थयेत्।।

ततः कलशोपरि पट्टवस्त्रं पसार्य तत्र गन्धेन रुद्रयन्त्रं विलिख्य तन्मध्ये पलस्वर्ण-निर्मितां रुद्रप्रतिमां अग्न्युत्तारणपूर्वकं मूलेन संस्थाप्य, प्राणप्रतिष्ठां कृत्वा, आवाहनादिपुष्पान्तैरुपचारैस्तत्तत्पूर्वोक्तैर्मन्त्रैः संपूज्य।।

आवरणपूजां कुर्यात्। तद्यथा। मध्ये-

''ॐ नमो भगवते रुद्राय'' इति संपूज्य।

तत्र पश्चिमादिचतुर्दिक्षु क्रमेण ॐ सध्योजाताय नमः।।१।।

ॐ वामदेवाय नमः।।२।।

ॐ अघोराय नमः।।३।।

ॐ तत्पुरुषाय नमः।।४।।

मध्ये-ॐ ईशानाय नमः।।५।।

इति पूजयेत्।।

ततः अष्टारेषु पश्चिमत आरभ्य प्रदक्षिणक्रमेण

ॐ नन्दिने नमः।।१।।

ॐ महाकालाययनमः।।२।।

ॐ गणेश्वराय नमः॥३॥

ॐ वृषभाय नमः॥४॥

ॐ भृङ्गिरिटये नमः॥५॥

ॐ स्कन्दाय नमः॥६॥

ॐ उमायै नमः॥७॥

ॐ चण्डीश्वराय नमः॥८॥

इति प्रथमावरणम्॥९॥

ततः षोडशदले तेनैव क्रमेण।

ॐ अनन्ताय नमः॥१॥

ॐ सूक्ष्मायनमः॥२॥

ॐ शिवाय नमः॥३॥

ॐ एकपदे नमः॥४॥

ॐ एकरुद्राय नमः॥५॥

ॐ त्रिमूर्तये नमः॥६॥

ॐ श्रीकण्ठायनमः॥७॥

ॐ वामदेवाय नमः॥८॥

ॐ ज्येष्ठाय नमः॥९॥

ॐ श्रेष्ठाय नमः॥१०॥

ॐ रुद्राय नमः॥११॥

ॐ कालाय नमः॥१२॥

ॐ कलविकरणाय नमः॥१३॥

ॐ बलाय नमः॥१४॥

ॐ बलविकरणाय नमः॥१५॥

इतिद्वितीयावरणेपूजयेत्॥

ततश्चतुर्विंशतिदले तेनैव क्रमेण।

ऊँ अणिमायै नमः॥१॥

ऊँ महिमायै नमः॥२॥

ऊँ लघिमायै नमः॥३॥

ऊँ गरिमायै नमः॥४॥

ऊँ प्रास्यै नमः॥५॥

ऊँ प्राकाम्यायै नमः॥६॥

ऊँ ईशितायै नमः॥७॥

ऊँ वशितायै नमः॥८॥

ऊँ ब्रामहै नमः॥९॥

ऊँ माहेश्वर्यै नमः॥१०॥

ऊँ कौमार्यै नमः॥११॥

ऊँ वैष्णव्यै नमः॥१२॥

ऊँ वाराह्यै नमः॥१३॥

ऊँ इन्द्राण्यै नमः॥१४॥

ऊँ चामुण्डायै नमः॥१५॥

ऊँ चण्डिकायै नमः॥१६॥

ऊँ असिताङ्गभैरवाय नमः॥१७॥

ऊँ रुरुभैरवाय नमः॥१८॥

ऊँ चण्डभैरवाय नमः॥१९॥

ऊँ क्रोधभैरवाय नमः॥२०॥

ऊँ उन्मत्तभैरवाय नमः॥२१॥

ॐ कालभैरवाय नमः॥२२॥

ॐ भीषणभैरवाय नमः॥२३॥

ॐ संहारभैरवाय नमः॥२४॥

इति तृतीयावरणे पूजयेत्॥३॥

ततो द्वात्रिशत्पत्रके तेनैव क्रमेण ॐ भवाय नमः॥१॥

ॐ शर्वाय नमः॥२॥

ॐ ईशानाय नमः॥३॥

ॐ पशुपतये नमः॥४॥

ॐ रुद्राय नमः॥५॥

ॐ उग्राय नमः॥६॥

ॐ भीमाय नमः॥७॥

ॐ महादेवाय नमः॥८॥

ॐ अनन्ताय नमः॥९॥

ॐ वासुकये नमः॥१०॥

ॐ तक्षकाय नमः॥११॥

ॐ कुलीरकाय नमः॥१२॥

ॐ कर्कोटकाय नमः॥१३॥

ॐ शंखपालाय नमः॥१४॥

ॐ कम्बलायनमः नमः॥१५॥

ॐ अश्वतरायनमः नमः॥१६॥

''इमे नागा अष्टौ''

ॐ वैन्यायनमः॥१७॥

ॐ पृथवे नमः॥१८॥

ॐ हैहयाय नमः॥१९॥

ॐ अर्जुनाय नमः॥२०॥

ॐ शाकुन्तलेयाय नमः॥२१॥

ॐ भरताय नमः॥२२॥

ॐ नलाय नमः॥२३॥

ॐ रामाय नमः॥२४॥

''इति नृपाष्टकम्'' ॐ हिमवते नमः॥२५॥

ॐ निषधाय नमः॥२६॥

ॐ विन्ध्याय नमः॥२७॥

ॐ माल्यवते नमः॥२८॥

ॐ पारियात्राय नमः॥२९॥

ॐ मलयाय नमः॥३०॥

ॐ हेमकूटाय नमः॥३१॥

ॐ गन्धमादनाय नमः॥३२॥

''इति गिर्य्यष्टकम्'' इति चतुर्थावरणम्॥४॥

ततश्चत्वारिंशद्दले तेनैव क्रमेण॥

ॐ इन्द्राय नमः॥१॥

ॐ अग्नये नमः॥२॥

ॐ ईशानाय नमः॥३॥

ॐ निर्ऋतये नमः॥४॥

ॐ वरुणाय नमः॥५॥

ॐ वायवे नमः॥६॥

ॐ कुबेराय नमः॥७॥

ॐ ईशानाय नमः॥८॥

ॐ शच्यै नमः॥९॥

ॐ स्वाहायै नमः॥१०॥

ॐ वाराह्यै नमः॥११॥

ॐ खड्गिण्यै नमः॥१२॥

ॐ वारुण्यै नमः॥१३॥

ॐ वायव्यै नमः॥१४॥

ॐ कौबेर्यै नमः॥१५॥

ॐ ईशान्यै नमः॥१६॥

ॐ वज्राय नमः॥१७॥

ॐ शक्तये नमः॥१८॥

ॐ दण्डाय नमः॥१९॥

ॐ खड्गाय नमः॥२०॥

ॐ पाशाय नमः॥२१॥

ॐ अङ्कुशाय नमः॥२२॥

ॐ गदायै नमः॥२३॥

ॐ त्रिशूलाय नमः॥२४॥

ॐ ऐरावताय नमः॥२५॥

ॐ मेषाय नमः॥२६॥

ॐ महिषाय नमः॥२७॥

ॐ प्रेताय नमः॥२८॥

ॐ मकराय नमः॥२९॥

ॐ हरिणाय नमः॥३०॥

ॐ नराय नः॥३१॥

ॐ वृषभाय नमः॥३२॥

ॐ पुण्डरीकाय नमः॥३४॥

ॐ वामनाय नमः॥३५॥

ॐ कुमुदाय नमः॥३६॥

ॐ अञ्जनाय नमः॥३७॥

ॐ पुष्पदन्ताय नमः॥३८॥

ॐ सार्वभौमाय नमः॥३९॥

ॐ सुप्रतीकाय नमः॥४०॥

इति पञ्चमावरणम्॥५॥

ततो भूपुरे पूर्वादिक्रमंण पुनः ॐ इन्द्राय नमः॥१॥

ॐ अग्नये नमः॥२॥

ॐ यमाय नमः॥३॥

ॐ निर्ऋतये नमः॥४॥

ॐ वरुणय नमः॥५॥

ॐ कुबेराय नमः॥६॥

ॐ ईशानाय नमः॥७॥

(इशानपूर्वयोर्मध्ये) ॐ ब्रह्मणे नमः॥९॥

(निर्ऋतिपश्चिमयोर्मध्ये) ॐ अनन्ताय नमः॥१०॥

इति षष्ठावरणे पूजयेत्॥

ततो भूपुरस्य बाह्ये आग्नेयादिषु "आग्नेय्याम्"

ॐ विरूपाक्षाय नमः॥१॥

"नैर्ऋत्याम्" ॐ विरूपाय नमः॥२॥

''वायव्याम्'' ॐ पशुपतये नमः।।३।।

''इशान्याम्'' ॐ ऊर्ध्वलिङ्गाय नमः।।४।।

पुनः भूपुराद्बहिः पूवाद्रिदिक्षु क्रमेण।।

''पूर्वे'' ॐ विप्रवर्णाय श्वेतरूपाय सहस्त्रफणमण्डिताय शेषाय नमः।।१।।

''नैर्ऋत्याम्'' ॐ विरूपाय नमः।।२।।

''वायव्याम्'' ॐ पशुपतये नमः।।३।।

''ईशान्याम्'' ॐ ऊर्ध्वलिङ्गाय नमः।।४।।

पुनः भूपुराद्बहिः पूर्वादिदिक्षु क्रमेणः।।

''पूर्वे'' ॐ विप्रवर्णाय श्वेतरूपाय सहस्त्रफणमण्डिताय शेषाय नमः।।१।।

''आग्नेय्याम्'' ॐ वैश्यवर्माय नीलरूपाय पञ्चाशत्फणाय उत्तुङ्गकायाय तक्षकाय नमः।।२।।

''दक्षिणस्याम्'' ॐ विप्रवर्णाय कुङ्कुमरूपाय सहस्त्रफणमण्डिताय अनन्ताय नमः।।३।।

''नैर्ऋत्याम्'' ॐ क्षत्रियवर्णाय पीतरूपाय सप्तशतफणमण्डिताय उत्तुङ्गकायाय वासुकये नमः।।४।।

''पश्चिमायाम्'' ॐ क्षत्रियवर्णाय पीतरूपाय सप्तशतफणाय शङ्खपालाय नमः।।५।।

''वायव्याम्'' ॐ वैश्यवर्णाय कृष्णरूपायपञ्चशत फणाय उत्तुङ्गाय महापद्माय नमः।।६।।

''उत्तरस्याम्'' ॐ शूद्रवर्णाय कृष्णरूपाय त्रिशत्फणमण्डिताय कम्बलाय नमः।।७।।

''इशान्याम्'' ॐ शूद्रवर्णाय श्वेतरूपाय त्रिंशत्फणयुत्ताय कर्कोटकाय नमः।।

इति पूजचेत्।। इति सप्तमावरणम्।।७।।

एवमावरणपूजां कृत्वा।। ॐ नमो भगवते रुद्राय इति मुलान्ते तत्तन्मन्त्रेणधूपदीप-नैवेद्याचमनीयता म्बूलदक्षिणानी राजनत्रिः प्रदक्षिणादिभिः श्रीरुद्रं संपूज्य दशाक्षरेण पुष्पाञ्जलिं दत्त्वा छत्रचामरपरिमलपुष्पमाला आदर्शदर्शनं समर्पयेत्।।

ततो रुद्रस्तवेन स्तुवीत ''ॐ नमो विरिञ्चिविष्णवीशभेदेन परमात्मने।।
सर्गसंस्थितिसंहारव्यावृतव्यक्तमूर्तये।।१।।

नमश्चतुर्धा प्रोद्धूतभूतभीतात्मन भुवः।।
भूरिभारार्तिसंहर्त्रे भूतनाथाय शूलिने।।२।।

विश्वग्रासाय विकसत्कालकूटविषाशिने।।
तत्कलसङ्काङ्कित्तग्रीवनीलकण्ठाय ते नमः।।३।।

नमो ललाटनयने प्रोल्लसत्कृष्णवर्त्मने।।
ध्वस्तस्मरनिरस्ताधियोगिध्याताव शम्भवे।।४।।

नमो देहार्द्धकान्ताय दग्धदक्षाध्वराय च।।
चतुर्वर्गेष्टदिष्टार्थदायिने मायिनेऽणवे।।५।।

स्थूलाय मूलभूताय शूलवारितविद्विषे।।
कालहन्त्रे नमश्चन्द्रखण्डमण्डितमौलये।।६।।

दिग्वासे कर्पदान्तर्भ्रान्ताहिशरदिन्दवे।।
देवदैत्योरगेन्द्रादिमौलिघृष्टाङ्घ्रये नमः।।७।।

भस्माभ्यक्ताय भक्ताय भुक्तिमुक्तिप्रदायिने।।
सकृद्व्यक्तस्वरूपाय शंकराय नमोनमः।।८।।

नमोन्ध्कान्तकरिपवेऽसुरद्विषे नमोस्तुते द्विरदवरावभेदिने।।
विषोल्लसत्फणिकुलबद्धमूर्त्तये नमः सदा वृषवरवाहनाय ते।।९।।

वियन्मरुद्धुतवहवायुकुम्भिनीमखेशरव्यमृत मयूखमूर्त्तये।।
नमः सदा नरकायावभेदिने भवेह नो भयभङ्गकृद्विभो।।१०।।

इति ष्टद्रस्तवेन स्तुत्वा देवं प्रदक्षिणीकृत्य तत्पद द्वंद्वे साष्टाङ्गं प्रणम्य तत्पीठा-दीशानदिग्देशे ततोयकृते मण्डले रुद्रनेवेद्यांशंकिंचिदल्पं गृहीत्वा चण्डेश्वराय शिवनैवेद्यभागं ददामि इत्युक्त्वाप्रक्षिपेत्।

तत आचम्य। ''लेह्यपेयान्नपानानि ताम्वूलं स्त्रग्विलेपनम्।।
नैर्माल्यं भोजनं तुभ्यं दत्तमस्तु शिवाज्ञया।।१।।

यत्किंचित्क्रियते देव मया चण्ड तवाज्ञया।।
न्यूनाधिकं कृतं मोहात्परिपूर्णं तदस्तु मे।।२।।

इति प्रार्थयेत्॥ एवं चण्डं सम्पूज्य॥

ततो जपं कुर्यात्॥ अस्य पुरश्चरणं दशलक्षमन्त्रात्मकम्॥

तती जपान्ते सघृतपायसान्नेन अयुतहोमं कृत्वा तेनैव द्रव्येण आवरणदेवताभ्य एकैकाहुतीर्हुत्वा होमदशांशेन तर्पणं तद्दशांशेन मार्जनं शक्त्या ब्राह्मणभोजनं च कुर्य्यात्॥

''एवमर्चन्महादेवं पञ्चाङ्गन्यासपूर्वकम्॥
दशाक्षरजपासक्तो न सीदेत्स्वेष्टसाधने॥१॥

मनोहराणि गेहानि सुन्दर्यो वामलोचनाः॥
धनमिच्छापूरणांतं लभते शिवसेवनात्॥२॥

प्रयोगान्पूर्वमन्त्रोक्तान्कुर्वीतात्र दशाक्षरे॥
दशाक्षरं भजन् विप्रो रुद्रजापी भवेत्सदा॥३॥

इति महार्णवमन्त्रमहोदधिशान्तिसारादिप्रोक्तं दशाक्षरीरुद्रामन्त्रविधानं समाप्तम्॥

अथ पञ्चरुद्रविधानानि हेमाद्रिमहार्णवशान्तिसारेषु॥

तत्र तावद्रुद्रमाहात्म्यम्॥

जाबालश्रुतिः-क्रि जाप्येनामृतत्वं नो ब्रूहि शातरुद्रियेण॥

इति॥ कैवल्योपनिषदि यः शतरुद्रियमधीते सोग्निमपूतो भवति।

स सुरापानात्पूतो भवति।

स गुरुतल्पगमनात्पूतो भवति। स स्वर्णस्तेयात्पूतो भवति।

स सुरापानात्पूतो भवति। स ब्रह्महत्यायाः पूतो भवति।

अकृत्यात्पूतो भवति।

अनेन ज्ञानमाप्नोति संसारार्णवनाशनम्॥

तस्मादेवं विदित्वोंवं कैवल्यफलमश्नुत इति॥

"पराशरोपि" मद्यं पीत्वा गुरुदाराश्च गत्वा स्तेयं कृत्वा ब्रह्महत्यां च कृत्वा॥

भस्मच्छन्नो भस्मशय्यां शयानो रुद्राध्यायी मुच्चते सर्वपापैः॥१॥

इदमहरहः कृते मासमात्रं ज्ञेयम्।।

तदुक्तं पाराशरेण रुद्राध्यायी भवेद्भक्त्वा मासमेकमतन्द्रितः।।

प्रायश्चित्तंभवेतद्रहस्यस्य न संशयः।।१।।

"पाद्मे शिवगीतायाम्" यस्तु रुद्रं जपेन्नित्यं ध्यायमानो ममाव्ष्टकृतिम्।।
षडक्षरं वा बाणं वा निष्कामो विजितेन्द्रियः।।

अथाथर्वशिरोमन्त्रं केवलं वा रघूत्तम।।

स तेनैव च देहेन शिवः संजायते ध्रुवम्।।

"वायुपुराणे" सर्वेषु ग्रहदोषेषु दुःस्वन्याद्भूतदर्शने।।

जपन्रुद्रान्सकृद्विप्रः सर्वदोषैः प्रमुच्यते।।

अनपत्यत्वादोषेषु शाकिन्यादिग्रहेषु च।।

सर्वज्वरविनाशाय रुद्रजाप्यो न संशयः।।

रोगवान् पापवांश्चैव रुद्रं जप्त्वा जितेन्द्रियः।।

रोगात्पापात्प्रमुक्तोसावतुलं सुखमश्नुते।।

"हेमाद्रौ कौशिकाबौधायनौ" रुद्रैकादशनी त्वेषा सर्वकामफलप्रदा।।

सर्वपापक्षयकरी सर्वशान्तिप्रदायिनी।।

"विष्णुधर्मोत्तरेऽपि" रुद्राणा च तथा जाप्यं सर्वाघविनिषूदनम्।।

सर्वकामकरो होमस्तथा सर्वत्र शान्तिदः।।

अजावविकानामश्वानां कुञ्जराणां तथा गवाम्।।

मनुष्याणां नरेन्द्राणां बालानां योषितामपि।।

ग्रामाणां नगराणां च देशानामपि भार्गव।।

उपद्रुतानां धर्मज्ञ व्याधितानां तथैव च।।

मारके समनुप्राप्ते रिपुजे च तथा भये।।

रुद्रहोमः परा शान्तिः पायसेन घृतेन वा।

(हेमाद्रौ कालिकापुराणे) यः पुनः सततं भक्त्या अभ्यर्च्य शशिशेखरम्।।

जपेद्ध्यायेत्सदा रुद्रात्सोपि याति परं पदम्।। अथैहते फलं किञ्चिदैहिकं पुष्कलं तथा।।

तानेव हि जपेद्रुदान् शुचिर्भूत्वा समाहितः।।

अथ वेदं जगत्सर्वे वसीकर्तुं समीहते।।

तदा रुद्रं जपेद्भूयो ध्यायमानो महेश्वरम्।।

इति रुद्रफलम्।। अथ रुद्रपकारः।।

रुद्रश्च त्रिविधः। जपरुदो होमरुद्रोऽभिषेकस्द्रश्च।

तत्र जपरूद्रः केवलजपात्मको होमाङ्गश्चेतिद्विधा।

होमरुद्रे तर्पणादि। आभिषेक रुद्रे च पूजा ब्राह्मणभोजनं सिद्धम्।।

तत्रापि जपादिरुद्रश्च पंचधा।

तद्‌भेदानाह "श्रृणुष्व भो महाप्राज्ञ रुद्रभेदान्वदामि ते।।

रुद्राः पंचाविधाः प्रोक्ता देशिकैरुत्तरोत्तरम्।।१।।

साङ्गस्त्वाद्यो रूपकाख्यः सशीर्षो रुद्र उच्यते।।१।।

एकादशगुर्णैस्तद्वद्रुद्रि संज्ञों द्वितीयकः।।२।।

एकादशभिरेताभिस्तृतीयो लघुरुद्रकः।।३।।

लघ्वेकादशभिः प्रोक्तो महारुद्रश्चतुर्थकः।।४।।

पञ्चमः स्यान्महारुद्र एकादशभिरन्तिमः।।

अतिरुद्रः समारव्यातः सर्वेभ्यो ह्युत्तमोत्तमः।।

इति।।५।।"

रुद्रपद्धतौ-साङ्गमाद्यं जपेद्रूपं केवलानि नवान्तरे।।

साङ्गं सशीर्षं चान्त्यं तु निरङ्गमिति केचन।।१।।

षडङ्गानि जपेत्पूर्वमध्यायं रुद्रियं ततः।।

तदन्ते जपतेऽष्टर्चं वयं सोममहच्छिरः॥२॥

अथ जपादिरुद्रप्रयोगः॥ तत्र तावत् कृच्छ्रचान्द्रायणं पराकं च कृत्वा।

अशक्तश्चेत्तत्प्रतिनिधरूपां धेनुं वा तन्मूल्यं च दत्त्वा।

अयुतगायतत्रीजपं च स्वयं ब्राह्मणद्वारा वा कुर्यात्॥

एवं प्रायश्चित्तं सम्पाद्य चन्द्रतारादिबलान्विते सुमुहूर्ते प्रातर्नित्यकर्म समाप्य सपत्नीको यजमानः स्वासने प्राङ् उदङ्मुखो वा उपविश्य।

भस्मत्रिपुण्ड्रं रूद्राक्षमालां च धृत्वा पवित्रपाणिः।

"ॐ नमो भगवते रुद्राय" इति मन्त्रेणाचमनं प्राणायामं च कुर्यात्॥

ततः ॐ आनो भद्रा इत्यादिशान्तिपाठं पठित्वा।

सुमुखश्चैकदन्तश्चेति गणपतिस्मरणपूर्वकं देशकालौ संकीर्त्य।

अमुकगोत्रोऽमुकशर्माहं श्रीतस्मृमिपुराणोक्तफलप्रा त्पयर्थं मम इह जन्मनि जन्मान्तरे चकृतकायिक वाचिकमानसिकसांसर्गिकज्ञाताज्ञातमहापातकोपपात कानां व्याधिरूपेण परिपच्यमानानां विनाशार्थं वाऽमुककामनासिद्ध्यर्थं श्रीपरमेश्वरप्रीत्यर्थम्॥

अमुकरुद्रहोमेन वा अमुकरुद्राभिषेकेण एतावन्तं कालं श्रीसदाशिवं स्वयं ब्राह्मणद्वारा वा यक्ष्ये॥

एवं तत्तत्कामनया संकल्प्य तदङ्गत्वेन गणपतिपूजनं पुण्याहवाचनं मातृकापूजनं नान्दीश्राद्धमाचार्यादिवरणं च करिष्ये। इति च सङ्कल्प्य॥

गणपतिपूजनाादिआचार्यवरणान्तं पूर्ववत्कुर्य्यात्॥

ततो जपरुद्रे शिवालयादिषु जपस्थानं प्रकल्प्य।
होमरुद्रे मण्डपकुण्डादि च कुर्यात्॥

ततो जापकः कृतनित्यक्रियः।

धृतभस्मत्रिपुण्ड्ररुद्राक्षः सपवित्रकरः।

आचम्य प्राणनायम्य देशकालौ संकीर्त्य मम यजमानस्य वा अमुककामनासिद्ध्यर्थममुकरुद्रजपं करिष्ये।

तदङ्गत्वेन भूतशुद्धिं प्राणप्रतिष्ठामन्तर्मातृकाबहिर्मा तृकान्यासं श्रीकण्ठादिकालान्यासं च करिष्ये।

इति सङ्कल्प्य। भूतशुद्ध्यादिबहिर्मातृकान्यासान्तं पद्धतिकाण्डोक्तमार्गेण कृत्वा शिवपंचाक्षरोदितं श्रीकण्डादिकलामातृकान्यासं च संपाद्य रुद्रन्यासान् कुर्यात्॥

"ते चानादेशे सर्वेयङ्गुष्ठानामिकाभ्यां कार्याः"॥

तत्र तावत्प्रथमं छन्दः पुरुषन्यासः॥

ॐ तिर्यक्‌विलाय चमसायेर्ध्वबुध्याय च्छन्दः पुरुषाय नमः शिरसि॥१॥

ॐ गौतमभरद्वाजाभ्यां नमः नेत्रयोः॥२॥

ॐ विश्वामित्रजतदग्निभ्यां नमः श्रोत्रयोः॥३॥

ॐ वसिष्ठकश्यपाभ्यां नमः नासापुटयोः॥४॥

ॐ अत्रये नमः वाचि॥५॥

ॐ गायत्र्यग्निभ्यां नमः शिरसि॥१॥

ॐ उष्णिक्‌सवितृभ्यां नमः ग्रीवायाम्॥२॥

ॐ बृहतीबृहस्पतिभ्यां नमः हनौ॥३॥

ॐ बृहद्रथन्तरद्यावापृथिवीभ्यां नमः बाह्वोः॥४॥

ॐ त्रिष्टुबिन्द्राभ्यां नमः नाभौ॥५।

ॐ जगत्यादित्याभ्यां नमः श्रोण्योः॥६॥

ॐ अतिच्छन्दाप्रजापातिभ्यां नमः लिङ्गे॥७॥

ॐ यज्ञायज्ञियवैश्वानराभ्यां नमः गुदे॥८॥

ॐ अनुष्तुब्विश्वेभ्यो देवेभ्यो नमः ऊर्वोः॥९॥

ॐ पंक्तिमरूद्भ्यो नमः जानुनोः॥१०॥

ॐ द्विपदाविष्णुभ्यां नमः पादयोः॥११॥

ॐ विच्छन्दावायुभ्यां नमः नासापुटस्थप्राणेषु॥१२॥

ॐ न्यूनाक्षरच्छंदोभ्यो नमः मस्तकादिपादान्तं सर्वाङ्गेषु॥१३॥

इति छन्दः पुरुषन्यासः॥

अथ पञ्चांङ्गरुद्राणां न्यासः॥ मनोजूतिरित्यस्याङ्गिरसबृहस्पतिऋषिर्यजुश्छन्दः विश्वेदेवा देवता हृदयन्यासे विनियोगः।

ॐ मनोजूतिर्जुषता हृदयाय नमः॥१॥

अबोध्यग्निरित्यस्य बुधोङ्गिरा ऋषी त्रिष्टुप्छंदः आग्निर्देवता शिरोन्यासे विनियोगः।

ॐ अबोध्यग्निः स शिरसे स्वाहा॥२॥

मूर्द्धानमित्यस्य भरद्वाज ऋषिस्त्रिष्टुप्छंदः वैस्वानरोग्निर्देवता शिखान्यासे विनियोगः।

ॐ मूर्द्धानन्दिवो शिखायै वषट्॥३॥

मर्माणित इत्यस्य विवस्वान् ऋषिः त्रिष्टुप्छन्दः लिङ्गोक्ता देवता, कवचन्यासे विनियोगः॥ ॐ मर्माणिते वर्म्मणा कवचाय हुम्॥४॥

विश्वतश्चक्षुरित्यस्य विश्वकर्माभौवनऋषिस्त्रिष्टुप्छन्दः विश्वकर्मादेवता नेत्रन्यासे विनियोगः।

ॐ विश्वतश्चक्षुरुत नेत्रत्रयाय वौषट्॥५॥

मानस्तोक इत्यस्य कुत्स ऋषिर्जगती छन्दः।

एको रुद्रो देवता। अस्त्रन्यासे विनियोगः।

ॐ मानस्तोके तनये अस्त्राय फट्॥६॥

इति लघुषडङ्गन्यासः प्रथमः॥१॥

अथ मन्त्रन्यासः॥ यातेद्र इति परमेष्ठी ऋषिः अनुष्टुप्छन्दः।

एको रुद्रो देवता। शिखान्यासे विनियोगः। ॐ यातेरुद्रशिवातनूघोरा शिखायाम्॥१॥

अस्मिन्ममहत्यर्णवे इत्यस्य परमेष्ठी ऋषिः।

अनुष्टुप्छन्दः बहुरुद्रोदेवता।

शिरोन्यासे विनियोगः। ॐ अस्मिन्महत्यर्णवे शिरसि॥२॥

असंख्यातेति परमेष्ठी ऋषिः।

अनुष्टुप्छन्दः। बहवो रुदा देवताः।

ललाटन्यासे विनियोगः।

ऊं असंख्याता ललाटे॥३॥

त्र्यम्बकमित्यनयोः क्रमेण वसिष्ठ प्रजापती।

अनुष्टुप्त्र्यंबको। नेत्रन्यासे। ऊँ त्र्यम्बकं यज नेत्रयोः॥४॥

मानस्तोक इति कुत्स ऋषिः।

जगती छन्दः। एको रुदो देवता। नासिकान्यासे।

ऊँ मानस्तोके नासिकायाम्॥५॥

अवतत्यस्य परमेष्ठी ऋषिः।

अनुष्टुप् छन्दः।

एको प्रजापती। अनुष्टुप्त्र्यंबको। नेत्रन्यासे।

ऊँ मानस्तोके नासिकायाम्॥५॥

अवतत्येत्यस्य परमेष्ठी ऋषिः।

अनुष्टुप् छन्दः। एको प्रजापती।

अनुष्टुप्त्र्यंबको। नेत्रन्यासे। ऊँ त्र्यम्बकं यजा नेत्रयो॥४॥

मानस्तेक इति कुत्स ऋषिः।

जगती छन्दः। एको रुद्रो देवता। नासिकान्यासे।

ऊँ मानस्तोके नासिकायाम्॥५॥

अवतत्येत्यस्य परमेष्ठी ऋषिः।

अनुष्टुप्छन्दः।

एको रुद्रो देवता। मुखन्यासे विनियोगः ऊँ अवतत्यधनु मुखे॥६॥

नीलग्रीवा इति द्वयोः परमेष्ठी ऋषिः।

अनुष्टुप् एको रुद्रो प्रकोष्ठन्यासे।

ऊँ नमस्तऽआस प्रकोष्ठे॥८॥

(मणिबंधादूर्ध्व कूर्पराधोभागः प्रकोष्ठः).

येतीर्थानीति परमेष्ठी।

अनुष्टप्। बहवो रुद्रा न्यासे।

ॐ येतीर्थानि। हस्तयौ।।९।।

नमोवः किरिकेभ्यः इति परमेष्ठी।

सामोष्णिक्यजुरुष्णिगतिण्धन्दांसि बहुयरुद्रा।।

हृदयन्यासे विनियोगः।

ॐ नमोवः किरिकेभ्य हृदये।।१।।

नमोहिरण्यबाहव इति परमेष्ठह ऋषिः।

अत्रैकादशाक्षराणा यजुस्त्रिष्टुप्छन्दः।

अष्टाक्षराणां यजुरनुष्टुप्।

दशाक्षरस्य यजुः पङक्ति हिरण्यबाह्वादयोमन्त्रवर्णावगता उभयतो नमस्कारा बहवो रुद्रो नाभिन्यासे विनियोगः।

ॐ नमो हिरण्यबाहवे पुष्टानां पतये नमः नाभौ।।११।।

इमारुद्रायेति कुत्स।

जगती एको रुद्रो दे गुह्यन्यासे।

ॐ इमारुद्राय गुह्ये।।१२।।

मानोमहांनमितिकुत्स। जगती। एको रुद्रो। उरुन्यासे

ॐ मानोमहांत। ऊर्वो।।१३।।

एषत इत्यस्य प्रजापति। सामपङ्क्तिर्यजुर्जगतीछंदः।

रूद्रो। ऊरुन्यासे ॐ एषते रुद्रभाग जाननोः।।१४।।

अवरुद्रमित्यस्य प्रजापति।

पङ्क्ति। रुद्रो। जंघान्यासे। ॐ अवरुद्र जंघयोः।।१५।।

(जानुगुल्फयोरंतरालं जंघा) अध्यवोच दित्यस्य परमेष्ठी।

पङ्क्तिच्छंदः।

एको रुद्रो। कवचन्यासे। ॐ अध्यवोचद।

कवचमुद्रया कवचम्॥१६॥

नमोबिल्मिन इत्यस्य परमेष्ठी षडक्षराणां यजुर्गायत्री।

पञ्चाक्षरयोदैवीपङ्क्तिः। सप्ताक्षरस्य यजुरुष्णिक्कबिल्मिनादयो मन्त्रवर्णा विगताः।

अन्यतरतो नमस्कारा बहवो रुद्रा देवता उपकवचन्यासे

ॐ नमो बिल्मिने।

हनन्यायच (कवचाद्विपरीतमुपकवचम्।
कवचोपरि तथैवेत्युपकवचमित्यन्ये)॥१७॥

नमोस्तुनीलग्रीवायेत्यस्य परमेष्ठी अनुष्टुप्।

एको रुद्रो। तृतीयनेत्रन्यासे। ॐ नमो ऽस्तुनील्ग्री (मुष्टितो विमुक्तया मध्यमया तृतीयनेत्रे)॥१८॥

प्रमुञ्चत्यस्य परमेष्ठी।

अनुष्टुप्। एको रुद्रो दे। अस्त्रन्यासे।

ॐ प्रमुञ्चध। अस्त्रम्॥१९॥

यएतावन्तश्चेत्यस्य परमेष्ठी।

अनुष्टुप्। बहवो रुद्रो दिग्बन्ध्ने।

ॐ यएतावन्तश्च दिक्षुविदिक्षुचपरस्परतर्जन्युङ्गुष्ठाग्रस्फोठनेन दिग्बन्धः॥२०॥

इति शिखाद्यस्त्रान्तो दिग्बन्ध्सन्ति एकोनविंशतिविधो द्वितीयो न्यासः॥२॥

दशाक्षरमंत्रस्य प्रजापति।

विराठ्। रुद्रो। न्यासे ॐ नमो मूर्द्धनि।

ॐ नं नमः शिखायाम्। ॐ मों नमो ललाटे।

ऊँ भं नमो मुखे। ऊँ गं नमः कण्ठे।

ऊँवं नमः हृदये। ऊँ ते नमः दक्षिणहस्ते।

ऊँ रुं नमः वामहस्ते। ऊँ द्रां नमः नाभौ।

ऊँ यं नमः पादयोः॥१०॥

इति दशाक्षरीमन्त्रन्यासस्तृतीयः॥३॥

(अथ संपुटाख्यो न्यासः)।

स च मुदिताञ्जलिना प्राज्या दिदिक्षु वक्ष्यमाणमन्त्रै कार्यः। तद्यथा।
त्रातारमित्यस्य गर्ग ऋषिः।

त्रिष्टुपू छन्दः। इन्द्रो देव ा। संपुटीकरणे विनियोगः।

ऊँ त्रातारमिन्द्र ऊँ इंद्राय नमः।

इति प्राच्याम्॥१॥

त्वन्नोआग्नि इत्यस्य हिरण्यस्तूप आङ्गिरस त्रिष्टुप् छन्दः॥

अग्नि दैवता संपुटीकरणे। ऊँ त्वन्नोअग्रे ऊँ अग्नये नमः। इत्याग्नेयाम्॥२॥

मिगन्नुः पन्था मिथ्यस्य प्रजापति त्रिष्टुप् यमो देवता।

संपुटी। ऊँ सुगन्नुःपन्थां ऊँ यमाय।

इति दक्षिणस्याम्॥३॥

असुन्वन्यमित्यस्य प्रजापति त्रिष्टुप् निर्ऋतिः सं।

ऊँ असुन्वन्तम ऊँ निर्ऋते नमः।

इति नैर्ऋत्याम्॥४॥

तत्वायामीत्यस्य शुनःशेप त्रिष्टुप्।

वरूणो। ऊँ तत्त्वायामि ऊँ वरुणाय नमः।

इति प्रतीच्याम्॥५॥ आनोनियुद्धिरित्यस्य वसिष्ठ त्रिष्टुप्

वायु। सं। ऊँ आनोनियुद्धि ऊँ वायवे नमः।

इति वायव्याम्॥६॥

वयर्ठसोमेत्यस्य बन्धु।

गायत्री सोमो। सं। ॐ वयर्ठसोम ॐ सोमाय नमः।

इत्युदीच्याम्॥७॥

तमीशानमित्यस्य गौतम जगती इशानो।

सं ॐ तमीशान ॐ ईशानाय। इतीशान्याम्॥८॥

अस्मेरुद्रा इत्यस्य प्रगर्थ। त्रिष्टुप्।

ब्रह्म। सं ॐ अस्मे रूद्रा ॐ रुद्राय नमः।

इत्यूर्ध्वम्॥९॥

स्योनापृथिवीत्यस्य मेधातिथि।

गायत्री छन्दः। अनन्तो देवता संपुटीकरणे विनियोगः।

ॐ स्योनापृथिवी ॐ अनंताय नमः इत्यधः॥१०॥

एवं दिक्षु विदिक्षुच इन्द्रादीन् प्रणमेत्॥

इति संपुटाख्यश्चतुर्थो न्यासः॥४॥

अथबृहत्षडङ्गन्यासः॥

यज्जाग्रत इति षड्ऋचस्य शिवसंकल्प ऋषिः।

त्रिष्टुप् छन्दः।

मनो देवता। हृदयन्यासे विनियोगः॥

ॐ यज्जाग्रतो॥१॥

येन कर्माण्य॥२॥

यत्प्रज्ञान॥३॥

येनेद भृतं॥४॥

यस्मिन्नृच॥५॥

सुषारथि॥६॥

इति हृदयाय नमः॥१॥

"मुष्टिविनिर्गताङ्गुष्ठौ संयुतौ कृत्वा हृदयेन्यसेत्"।

सहस्त्रशीर्षेति षोडशर्चस्य पुरुषसूक्तस्य नारायण ऋषिः आद्यानां पञ्चदशानामनुष्टुप् छन्दः।

यज्ञेनयज्ञमित्यस्य त्रिष्टुप्।

जगद्बीजम्। पुरुषो देवता॥

शिपरोन्यासे विनियोगाः।

ॐ सहस्त्रशीर्षा॥१६॥

शिरसे स्वाहा। "इतिमुष्टिनिर्गतांगुष्ठौ संयुक्तौ न्यस्ततर्ज्जनीकौ कृत्वा शिरसि न्यसेत्"॥२॥

अद्भ्यः सम्भूत इति षड्ऋचस्योत्तरनारायणस्य नारायणपुरुष ऋषिः।

आद्यानां तिसृणां त्रिष्टुप् छन्दः।

चतुर्थपञ्चमयोरनुष्टुप्।

षष्ठस्य त्रिष्टुप् छन्दः।

आदित्यो देवता। शिखान्यासे विनियोगः।

ॐ अद्भ्यः सम्भूत ६ शिखायै वषट् "इति मुष्टिपुटौ करो कृत्वाङ्गुष्ठावधः प्रसक्ताग्रे कनिष्ठे चोर्ध्वतः कृत्वा शिखायां न्यसेत्"॥३॥

आशुः शिशान इति सप्तदशानामप्रतिरथ ऋषिः।

त्रिष्टुप् छन्दः।

इन्द्रो देवता। कवचन्यासे विनियोगः।

ॐ आशुः शिशानो॥१७॥

कवचायहुम्॥

"इत्युङ्गुष्ठौ प्रसक्ततर्जन्यौ च त्रिकाणवत् कृत्वा मूर्द्धनि पश्चान्मुखंतः करौ हृदयान्तं नयन् हृदये न्यसेत्"॥४॥

बिभ्राडिति सप्तदशानां बिब्राड ऋषिः।

जगती छन्दः। सूर्यो देवता। नेत्रन्यासे विनियोगः।

ॐ बिभ्राड् बृहत्पिबतु॥१७॥

नेत्रत्रयाय वौषट् "इति नेत्रेन्मुखं हस्तं कृत्वा प्रसक्ताङ्गुष्ठकनिष्ठिकां च कृत्वा मध्यमां किंचित्प्रसार्य इतराङ्गुलीर्नयन् नेत्रेषु न्यसेत्"॥५॥

नमस्ते इत्यादिषोडशर्चस्य परमेष्ठी ऋषिः नमस्त इत्यस्य गायत्री यात इति तिसृणामनुष्टुप्।

अध्यवोचदिति त्रयाणां पङ्क्ति।

नमोस्त्वितिसप्तानामनुष्टुप्।

मान इति द्वयोः कुत्स ऋषिः॥

जगती छन्दः। सर्वासामेको रुद्रो देवता।

अस्त्रन्यासे विनियोगः। ॐ नमति रुद्र हवामहे॥१६॥

इत्यस्त्राय फट्॥

"इति किंचित्तर्जनी प्रर्साय मद्यमाङ्गुष्ठयोगेन अस्त्राय फडित्यस्त्रम्॥५॥

इति बृहत्षडङ्गन्यासः पञ्चमः॥५॥

ततः ॐ एषते रुद्रभाग इति मन्त्रेण योनिमुद्राप्रदर्शनम्॥

एवं पञ्चाङ्गन्यासान् विधाय। रुद्ररुपमात्मानं ध्यायेत्॥

अथ ध्यानम्॥ अथात्मानं रुद्ररुपं ध्यायेत्पञ्चमुखं शिवम्॥

प्रतिवक्त्रं त्रिनेत्रं च दशहस्तं दशायुधम्॥१॥

कमण्डलुं साथसूत्र बाणशूलधरं हरम् दण्डं डमरु खट् वाङ्गाभयपात्रं पिनाकिवम्॥२॥

अष्टसिद्धियुतं सौम्यं सर्वाभरण भूषितम्॥

नीलग्रीवं शशाङ्कार्द्धशेखरं स्मितसुन्दरम्।।३।।

शुद्धस्फटिकसंकाशं नागयज्ञोपवीतिनम्।।

गज चर्मपरीधानं व्याघ्रचर्मोत्तरीयकम्।।४।।

वृषस्कन्धसमारूढमुमादेहार्द्धधारिणम्।।

दुर्द्दन्तं कपिलजटं शिखामुद्योतकारिणम्।।५।।

अमृतेनाप्लुतं हृष्टं दिव्यभोगसमाकुलम्।।

दैवतैश्च समायुक्तं सुरासुरनमस्कृतम्।।६।।

शाश्वतं साच्चिदानन्दं ध्रुवमक्षरमव्ययम्।।

अजातममृतं नित्यं सर्वव्यापिनमीश्वरम्।।७।।

एवं रुद्रतनुं सर्वे यक्षराक्षसपन्नगाः।।

डाकिनीशाकिनीभूतपिशाचा जृम्भका ग्रहाः।।८।।

ज्वलन्तं ते प्रपश्यन्ति प्रलयानलसन्निभम्।।

एवं ध्यात्वा द्विजः सम्यक् ततो यजनमारबेत्।।९।।

एवं श्री रुद्रं ध्यात्वा मानसोपचारैः संपूज्य।

यथाशक्ति "ॐ नमो भगवते रुद्राय" इति मूलमन्त्रं जपेत्।।

यदि तु भेदेनोपासीत तदानीन्तनीं पूजां पात्रासादनं शैवपीठपूजापूर्वकं पद्धति-काण्डोक्तविधिना मण्डलमध्ये स्वर्णमय्यां रुद्रप्रतिमायां लिङ्गे वा वेदोक्त मन्त्रैः पुष्पान्तां पूजां कृत्वापूर्वोक्तरुयन्त्रोक्तावरणदेवतास्सम्पूज्य।

धूपदीपनैद्यादिनीराजनान्तैरुपचारैरर्चनं विधाय रुद्रस्तवेन स्तुत्वा वेदमन्त्रैदेवमूर्धनि पुष्पाञ्जलिं दत्त्वा।

प्रदक्षिणात्रयं कृत्त्वा ॐ नमस्तेस्तु भगवन् विश्वेश्वराय महादेवाय
त्र्यम्बकायत्रिपुरान्तकाय त्रिकाग्निकालाय कालाग्निरुद्राय नीलकण्ठाय
सर्वेश्वराय श्रीमहादेवाय नमः।

इति नत्वा।

नमः सर्वहितार्थाय जगदाधारहेतवे।

साष्टाङ्गोयं प्रणामस्ते दीनत्वेन मया कृतः।।

इति साष्टाङ्गं प्रणम्य विविधैः स्तोत्रैः स्तुत्वा पूजां निवेदयेत्।।

ततस्तन्मना रुद्रं ध्यायन् जपं कुर्यात्।

अथ जपक्रमः।।

ॐ नमस्तेरुद्रमन्यवउतोतइषवेनम्।। नमस्ते अस्तु धन्वने बाहुभ्यामुततेनमः।।१।।

यातेरुद्रशिवातनूरघोरापापकाशिनी।।

तयानस्तन्वाशन्तमयागिरिशन्ताभिचाकशीहि।।२।।

यामिषुङ्गिरिशन्तहस्तेबिभर्ष्यस्तवे।।

शिवाङ्गिरित्रताङ्कुरुमाहिगुंसीपुरुषञ्जगत्।।३।।

शिवेनवचसात्वागिरिशाच्छावदामसि।।

यथानः सर्व्वमिज्जगदयक्ष्मगुंसुमनाअसत्।।४।।

अध्यवोचदथिवक्ताप्रथमोदैव्योभिषक्।।

अहींगुंश्चसर्वाञ्जम्भयन्त्सर्वाश्चयातुधान्योघराचीः परासुव।।५।।

असौयस्ताम्रोअरुणउतबभ्रुः सुमङ्गल।।

येमागुंरुद्राअभितोदिक्षुश्रितासइस्त्रशोवैषागुंहेडईमहे।।६।।

असौयोवसर्पतिनीलग्रीवाविलोहितः।।

उतैनङ्गोपा अदृभन्नदृभन्नुदहार्य्यःसदृष्टोमृंडयातिनः।।७।।

नमोस्तुनीजग्रीवायसहस्त्राक्षयमीढ्षे।।

अथोयेअस्यसत्वानोहन्तेभ्योकरन्नमः।।८।।

प्रमुञ्चधन्वनस्त्वमुभयोरार्त्नियोम्।।

याश्चतेहस्तइषवःपराताभगवोवप।।९।।

विज्यन्धनुः कपर्दिनो विशल्यो बाणवागुं उत।।

अनेंशन्नस्येषंवआभुरंस्यनिषंगतिः॥१०॥

यातेंहेतिर्म्मींदुष्टमहस्तेंबुभूवंतेधनुः॥

तयुास्मान्विश्वतःस्त्वमयक्ष्मयापरिब्भुज॥११॥

परिंतेक्ष्न्वंनोहेतिरस्म्मान्वृणक्तुविश्वतः॥

अथोयइंषुधिस्तवारेअस्म्मन्निधेहितम्॥१२॥

अवतस्तधनुष्ठ्गुंसहस्राक्षशतेंषुधे॥

निशीर्य्यशल्यानाम्मुखांशिवोनः सुमनाभव॥१३॥

नमस्तुआयुधायानांतताधुष्णवें॥

उभाभ्यमुततेनमोंबाहुभ्यांतधवने॥१४॥

मानोमहान्तमुतमानोअर्भकम्मानउक्षन्तमुतमान उक्षितम्॥

मानोवधीः पितरम्मोतमातरंःप्प्रियास्तन्वों रुद्रीरिषः॥१५॥

माानंस्तोकेतनंयेमान अयुषिमानोगोषुमानो अश्वेषरीरिषः॥

मानोंवीरान्रुंद्र भामिनोंवधीर्हुविष्मंन्तासददुमित्वांहवामहे॥१६॥

नमोहिरण्यबाहवेसेनान्येदिशाञ्चपतंयेनमोनमोपवृक्षेभ्यो हरिंकेशेब्भ्यः
पशूनााम्पतयेनमोनमंः सस्पिञ्ज रायत्त्विषीमतेपथीनाम्पंतयुेनमोनमोहरिंकेशायोप
वीतिनेंषुष्टानाम्पतयेनमों बभ्लुशायं॥१७॥

नमोंबभ्लुशाविव्याधिनेन्नांनाम्पतयेनमोंभवस्यहेत्त्यैजगंताम्पतंयेनमोनमोरुद्रायातता-
विनेक्षेत्रांणाम्पतयेनमोनमोः सूतायाहन्त्यैवन्नांनाम्पतंये नमोनमो रोहिंताय॥१८॥

नमोरोहिंताय॥

स्थपतंयेवृक्षाणाम्पतयेनमोनमोंभुवुन्तयेंवारि
वस्कृतायौषंधीनाम्पतंयेनमोनमोमन्त्रिणेबाणि
जायकक्षाणुम्पतंयेनमंउच्चैर्घोषायारक्रन्दयतेपत्तीनांपतयेनमोनमः
कृत्स्नयुतयां॥१९॥

नमः कृत्स्रायतया॥

धावंतेसत्वनाम्पतयेनमोनमःसहमानायनिव्याधिनं आव्याधिनीनाम्पतये नमोनमो निषङ्गिणे ककुभायस्ते नानाम्पतये नमो नामोंनिचेरवेंपरिचरायारंण्यानाम्पतंयेनमो नमोवञ्चते॥२०॥

नमोवञ्चंते॥

परिवञ्चंतेस्तायूनाम्मतंयेनमोनमोंनिषुङ्गिणइषधिमते तस्कराणम्पतयेनमोनमः।

सृकाविभ्योजिघागुंसभ्योमुष्णताम्पतंयेनमोनमोसिमद्भ्योनक्तञ्चरद्भ्योविकृन्तानां पतयेनमः॥२१।

नमउष्णीुषिणें॥

गिरिचरायंकुलुञ्चानाम्पतयेनमोनमइषुमद्भ्योधन्वाविभ्यश्चवो नमोनमआतन्वानेभ्यःप्रतिदधानेभ्यश्चवोनमोनम आयच्छद्भ्योस्यद्भ्योक्ष्चवोनमोनमोविसृजदभ्यः॥२२॥

नमोविसृजभ्दयोविद्धयद्धयश्चवोनमोनमः स्वपभ्दयोजाग्रंद्धयश्चवोनमो नमः शयानेभ्य आसीनेभ्यश्चवोनमोनमस्तिष्टद्धयोधावद्धयश्चवोनमोनमोनम सभाब्भ्यः॥23॥

नमंः सभाभ्यः।

सभापतिभ्यश्चवोन्नमो नमो अश्वेश्वपतिभ्यश्चवोनमोनमः आव्याधिनीभ्योविविद्धयन्तीभ्यश्चवोनमो नमंउगणाब्भ्यसतृठहतीब्भ्यश्चवोनमोमोगणेभ्यः॥२४॥

नमोगणेभ्योगणपतिभ्यश्चवोनमोनमोव्रातोभ्योव्रातपतिभ्याश्चवोनमोगृत्सेभ्योगृत्स-पतिभ्यश्चवोनमोनमोव्विरूपेभ्योविश्वरूयेभ्यश्चवोनमोनमःसेनाब्भ्यः॥२५॥

नम सेनाब्भ्यः।

सेनानिभ्यश्चवोनमोनमो रथेभ्योरयपतिभ्यश्चवोनमोनमःक्षत्तृभ्य संगृहीतृभ्यश्चवोनमोनमोमहद्भयो अर्भकेभ्यश्चवोनमः॥२६॥

नमस्तक्षब्भ्यः॥ नमस्तक्षभ्योरथकारेभ्यश्चवोनमोनमः कुलालेब्भ्यः कर्मरिभ्यश्चवोनमोनमोनिषादेभ्यपुञ्जिष्ठेभ्यश्चवोनमोनमः श्वनिभ्योमृग युभ्यश्चवोनमो नमः श्वभ्यः॥२७॥

नमः श्वभ्य॥

श्वपतिभ्याश्चवोनमोनमोभवायचरुद्रायचनमः॥

शर्वायचपशुपतयेचनमोनीलग्रीवायशितिकण्ठायचनमः कपर्दिने॥२८॥

कपर्द्दिनेचव्युप्तकेशायचनमः सहस्त्राक्षायचशतधन्वनेचनमो
गिनिशायचशिपिविष्टायचनमो मीढुष्टमायचेषुमतेचनमोह्लस्वाय॥२९॥

नमोह्लस्वायचवामनायचनमोबृहतेचवर्षीयसेचनमोव्वृायचसवृधेचनमोग्ग्रायच-
प्रथमायचनमआशवे॥३०॥

नमआश्वे॥

चाजिरायचनमःशीघ्रियायचशीभ्यायचनम
ऊर्म्याचावस्वन्यायचनमोनादेयायचीदुीप्याय॥३१॥

नमोज्ज्येष्ठायचकनिष्ठायचनम
पूर्वजायचापरजायचनमोमद्ध्यमायपचागल्भायचनमोजघन्यायचबुध्न्यायचनमःसोभ्याय॥३२॥

नमः सोभ्याय च प्रतिसर्याय च नमो याम्याय च सोम्याय च

नमः श्लोक्याय चावसान्याच नम उर्वर्वाय च खल्याय च नमो वन्याय॥३३॥

नमोवन्यायचकक्ष्यायचनम श्रवायचप्रतिश्रवायचनमआशुषेणायचाशुरथाय चनमः
शूरायचावभेदिनेचनमोबिल्मने॥३४॥

नमोबिल्मिने।

चकवचिनेचनमोवर्म्मिणेचवरूथिनचनम श्रुतायचश्रुतसेनायचनमोदुन्दुभ्याय
चाहनन्म्यायचनमोधृष्णवे॥३५॥

नमोधृष्णवे॥

चप्रमृशायचमनमोनिषङ्गिणेचेषुधिमतेचनमस्तीक्ष्णेषवेचायुधिनेचनमः
स्वायुधायचसुधन्वनेच॥३६॥

नमस्त्रुत्यायचपत्थ्यायचनमःकाट्यायचनीप्यायचनमःकुल्यायच सरस्यायच
नमो नादेयायचवैशन्ताय च नमः कूप्याय॥३७॥

नमः कूप्यायचावट्यायचनमोवीद्ध्र्यायचातप्यायचनमोमेध्यायचविद्युत्याय-
चनमोवर्ष्यायचावर्ष्यायचनमोवात्याय॥३८॥

नमोवात्याय।

चरेष्म्यायचनमोवास्तव्यायचवास्तुपायचनमःसोमायचरुद्राय
चनमस्ताम्रायचारुणयचनमः। शङ्गवे॥३९॥

नमः शङ्गवे।

चपशुपतयेचनमोउग्रायचभीमायचनमोऽग्रेवधायचदूरेवधायचनमोहन्त्रेचहनीयसेच
नमोवृक्षेभ्योनमस्ताराय॥४०॥

नमः शम्भवाय।

चमयोभवायचनमः शंकरायचमयस्करायचनमः शिवायचशिवतरायच॥४१॥

नमः पार्य्याय।

चावार्यायचनमः प्रतरणायचोत्तरणायचनमस्तीर्थ्यायचकूल्यायचनमः
शष्यायचफेन्यायचनमःसिकत्याय॥४२॥

नमसिकत्यायचप्रवाह्यायचनमः किगूंशिलायचक्षयणायचनमकपर्दिनेचपुल-
स्तयेंचनइरिण्यायचप्रपभ्यायचनमोव्रज्याय॥४३॥

नमोव्रज्ज्यायचगोष्टयायचमस्तल्प्यायचगेह्यायचनमोहृदय्यायचनिवेष्यायचनमः-
काट्ट्यायचगह्वरेष्ठायचनमःशुष्काग्याय॥४४॥

नमशुष्क्यायचहरित्यायचनमः पा गूं
सव्यायचरजस्यायचनमोलोप्यायचोलप्यायचनमऊर्म्यायच सूर्म्योयचनमः
पर्णाय॥४५॥

नम पर्णाय।

चपर्णशद्यायचनमोपगुरमाणायचाभिघ्नतेचनमआ
खिदतेचप्रखिदतेचनमइषुकृद्भ्यो धनुष्कृद्भयश्चवोनमोनमोवः
किरिकेभ्योदेवानागूंहृदयेभ्योनमोविचिन्वत्केभ्योनमोविक्षीणत्केभ्योनम
आनिर्हतेभ्यः नम अमीवत्केभ्यः॥४६॥

द्रापे अन्धसस्पजेदरिद्रन्नीललोहित॥

आसांप्रजानामेषाम्पशूनाम्माभेर्म्मारोमोचनः किञ्च नाममत्॥४७॥

इमागं्रुद्रायतवसेकपर्द्दिनेक्षयद्वीरायप्रभरामहेमती।।

यथानः शमसदूिपदेचतुष्पदेविश्वम्पुष्टंग्रामे अस्मिन्ननातुरम्।।४८।।

यातेरुद्रशिवातनूः
शिवाविश्वाहाभेषजीशिवारुद्रस्यभेषजीतयानोमृडजीवसे।।४९।।

परिनोरूद्रस्यहेतिर्वृणक्तुपरित्वेषस्यदुर्मतिरघायोः।।

अवस्थिरामघवद्भ्यस्तनुष्वमीढ्वस्तोकायनंयायमृड।।५०।।

मीढृष्टमशिवतम।

शिवोनः सुमना भव।।

परमेवृक्षआयुधन्निधायकृत्तिंवसान आचरपिनाकम्बिभ्रदाग्रहि।।५१।।

विक्रिरिद्रविलोहितनमस्ते अस्तुभगवः।।

यास्तैसहस्त्रगंूहेतयोन्न्यमस्म्मन्निवपन्तुताः।।५२।।

सहस्त्राणिसहस्त्रशोबाह्वोस्तवहेतये।

तासामीशानोभगवः पराचीनामुखाकृधि।।५३।।

असङ्ख्यातासहस्त्राणियेरुद्रा अधिभूम्याम् तेषागं्
सहस्त्रयोजनेवधन्वानितन्मसि।।५४।।

अस्मिन्महत्यर्णवेन्तरिक्षेभवा आधि।।

तेषागं्स।।५५।।

नीलग्ग्रीवाः शितिकण्ठादिवर्गं्रुदूद्रा ऊपशिश्रता तेषागं्ः।।५६।।

नीलग्रीवाः शितिकण्ठादिवगं् रुद्रा उपश्रिताः शर्वा अधः क्षमाचराः
तेषागं्स।।५७।।

येवृक्षेषुसस्पिञ्जरानीलग्रीवाविलोहिताः तेषा सः।।५८।।

येभूतानामधिपतयो विशिखासः कपर्दिनः।।

तेषागं्सः।।५९।।

येपथाम्पथिरक्षय ऐलवृदायंयुर्युधः।।

तेषागं्सः॥६०॥

येतीर्थानिप्प्रचरन्तिसृकाहस्ता निषङ्गिणः॥

तेषागं्स॥६१॥

येऽन्नैषुविविद्ध्यन्तिपात्रेषुपिबतोजमान्॥

तेषागं्स॥६२॥

यएतावन्तश्चभूयागं्सश्चदिशोरुद्राविवितिस्त्थरे॥

तेषागं्सं॥६३॥

नमोस्तुरुद्रेभ्योयेदिवियेषावर्षमिषवः॥

तेभ्योदशाप्राचीर्दश दक्षिणादशप्रतीचीर्दशोदीचीर्दशेर्ध्वा॥

स्तेभ्योनमोअस्तुतेनोऽवन्तुतेनोमृडयन्तुतेयन्द्विष्मोयश्चनोद्वेष्टितमेषाञ्जम्भेदध्मः॥६४॥

तेभ्योनमो॥६५॥

अस्तुतेनोऽवन्तुतेनोमृडयन्तुतेयंदूष्मोयच्चनोद्वेष्टितमेषांजम्भे दध्मः॥६६॥

इति रुद्राध्यायं पठित्वा।

ॐ वाजश्चमेप्रसवश्चमेप्रयतिश्चमेप्रसितिश्च मेधीतिश्चमे
ॐ वाजश्चमेप्रसवश्चमेप्रयतिश्चमेप्रसितिश्च मेधीतिश्चमे
श्रुतिश्चमेज्ज्योति-श्चमेस्वश्चमेयज्ञेनकल्प्यन्ताम्॥१॥

प्रणश्चमेऽपानश्चमेव्यानश्चमेसुश्चमेचित्तश्चम आधीतश्चमेवाक्
चमेमनश्चमेचक्षुश्चमेश्श्रोत्रंचमेदक्षश्चमेबलश्चमेयज्ञेनंकल्प्यन्ताम्॥२॥

ओजश्चमेसहश्चम आत्माचमेतनूश्चमेशर्मचमेवर्म्मचमेङ्गानिचमेऽस्थानिचमेपरू
गं्षिचमेशरीरणिचमे आयुश्चमेजराचमेयज्ञेनकल्पन्ताम्॥३॥

ज्यैष्ठ्यश्चम
आधिपत्यश्चमेमन्युश्चमेभामश्चमेमश्चमेम्भमम्भश्मेजेमाचमेमहिमाचमेवरिमाचमेप्रथिमा-
चमेवर्ष्माचमेद्युयामचमेवृश्चमेवृद्धि श्चमेयज्ञेनकल्प्यन्ताम्॥४॥

इत्याद्ये चमकानुवाकं पठेत्॥१॥

पुनः ॐ नमस्तेरुद्र इत्यादि॥६६॥

पठित्वा। ऊँ
सत्त्यश्चमेश्रद्धाचमेजगच्चमेधनश्चमेवशरचमेमहश्चमेक्रीडामचमेमोदश्चमेजातश्चमे-
जनिष्यमाणश्चमेसुकृतश्चमेयज्ञेनकल्पन्ताम्।।५।।

ऋतश्चमेमृतश्चमे
यक्षश्चमेनामयच्चमेजीवातुश्चमेदीर्घायुत्वश्चमेभयश्चमेशयनश्चमेसुखश्चमेयज्ञेन-
कल्पन्ताम्।।६।।

यन्ताचमेधर्त्ताचमेक्षेमश्चमेधृमेविश्श्वश्चमेमहश्चमेसंविच्चमेज्ञात्रश्चचमेसूश्चमेप्रसूश्चमे-
सीरश्चमेलयश्चमेयज्ञेनकल्पन्ताम्।।७।।

शंचमेमयश्चमेप्प्रियश्चमेनुकामश्चमेनुकामश्चमेसौमनसश्चमेभगश्चमेद्रविणंचमेभद्रश्च-
मेश्रेयश्चमेवस्यश्चमेयज्ञेनकल्पन्ताम्।।८।।

इति द्वितीयं चमकानुवाकं पठेत्।।२।।

पुनः ऊँ नमस्ते इत्यादि।।६६।।

पठित्वा।। ऊँ ऊर्क्चमेसूनृताचमेपयश्चमेरसश्चमेघृ
तश्चमेमधुचमेसग्धिश्चमेसपीतिश्चमेकृषिश्चमेवृष्टिश्चमेघृतमश्चमेमदुचमेसग्धिश्चमेस-
मीपितश्श्चमे कृषिश्चमेर्वृष्टिश्चमेजैत्रश्चम औद्भिद्यश्चमेयज्ञेन कल्प्यन्ताम्।।९।।

रयिश्चमेरायश्चमेपुष्टंश्चमेपुष्टिश्चमेविभूचमेप्र
भुचमेपूणश्चमेपूर्णतरश्चमेऽक्षितिश्चमेत्र
कूयवाश्चमेक्षुच्चमेयज्ञेनकल्प्पन्ताम्।।१०।।

वित्तश्चमेवेद्यश्चमेभविष्यच्चमेसुगश्चमेसुपथश्चम ऋद्धश्चम
ऋद्धिश्चमेक्लृप्तश्चमेक्लृप्तिश्चमेमतिश्चमेसुमतिश्चमेयज्ञेनकल्ताम्प।।११।।

व्रीहयश्चमे यवाश्चमेमाषास्चमेतिलाश्चमेमुद्गाश्चमे
खल्वाश्चमेप्रियङ्ग्वाश्चमेणवश्चमेशयामाकाश्चमेनीवाराश्चमेगोधूमाश्च
मेमसुरांश्चमेयज्ञेनकल्पन्ताम्।।१२।।

इति तृतीयं चमकानुवाकं पठेत्।।१३।।

पुनः ऊँ नमस्तेइत्यादि।।६६।।

पठित्वा।। ऊँ अश्माचेममृत्तिकाचमेगिरयश्चमे पर्वतराश्चमेसिकताश्चमेहि-
रणयश्चमेऽयश्चमेश्यामश्चमेलोहश्चमेसीसश्चमेत्रपुश्चमेयज्ञेनंकल्प्पन्ताम्।।१३।।

अग्निश्च म आपश्चमेवीरुधश्चम ओषधयश्चमेकृष्टपच्याश्चमेग्राम्याश्चमेपशव आरण्या श्चमेभूतश्चमे भूतिश्चमेयज्ञेनकल्पन्ताम्॥१४॥

वसुचमेवसतिश्चमेकर्म्मचमेशक्तिमेर्त्थश्चम एमश्चम इतिश्चमेगतिश्चमेयज्ञेनकल्पन्ताम्॥१५॥

इति चतुर्थं चमकानुवाकं पठेत्॥४॥

पुनः नमस्ते इत्यादि ६६ रपठित्वा।

ॐ अग्निश्च मइन्द्रश्चमेसोमश्चमइन्द्रश्चमेसवि ताचमइन्द्रश्चमेसरस्वतीचम इन्द्रश्चमेपूषाचम इन्द्रश्चमेबृहस्पतिश्चम इन्द्रश्चमेयज्ञेनकल्पन्ताम्॥१६॥

मित्रश्चमइन्द्रश्चमे वरुणश्चमइन्द्रश्चमे त्वष्टाचम इन्द्रश्चमेधाताचमइन्द्रश्चमेविष्णुश्च मइन्द्रश्चमेऽशिवानो च म इन्द्रस्य मे मरुतश्स्चम इन्द्रश्चमे यज्ञेन कल्पन्ताम्॥२७॥ पृथिवीच म इन्द्ररश्चमेऽन्तरिक्षंचमइन्द्रश्चमे समाश्चमइन्द्रश्चमेन क्षत्राणिचम इन्द्रश्चमेदिशश्चम इन्द्ररश्चमेयज्ञेनकल्पन्ताम्॥१८॥ ॥

इती पञ्चमं चमकानुवाकं पठेत्॥१५॥

पुनः ॐ नमस्ते इत्यादि ६६ पठित्वा।
अगंशुश्चमेरश्मिमश्चमेदाभ्यश्चमेधिपतिश्चम ऊपागं शुश्चमेन्तर्यामश्चम ऐन्द्रवायवश्चमेमेत्रावरुणश्चम आश्विनश्चमेप्रतिप्रस्थानश्चमेशुक्रश्चमेमन्थीचमेयज्ञे नकल्पन्ताम्॥१९॥

आग्रयणश्चमेवैश्वदेवश्चमे ध्रुवश्चमेवैश्वानरश्चमऐन्द्रा ग्निश्चमेमहावैश्वदेवश्चमेमरुत्वतीयाश्चमेनिष्कैल्यश्चमे सावित्रश्चमेसारस्वतश्चमेपात्नीवतश्चमेहारियोजनश्चमे यज्ञेनकल्पन्ताम्॥२०॥

स्रुचश्च मेचमसाश्चमेवायव्यानिचमेद्रोण कलशश्चमेग्रावाणश्च मेधिषवणेचमेपूजभृच्चम आधवनीयश्चमेव्रेदि श्चमेबर्हिश्चमेवभृथश्चमे स्वगाकारश्चमेयज्ञेनकल्पन्ताम्॥२१॥

इति षष्ठं चमकानुवाकं पठेत्॥६॥

पुनः। नमस्ते इत्यादि ६६ पठित्वा।

ॐ अग्निश्चमे घर्मश्चमेर्कश्चमेसूर्य्यश्चमे प्राणश्चमेऽश्वमेधश्चमेपृथि वीचमेदितिश्चमेऽदितिश्चमेद्यौश्चमेंङ्गुलयःशक्वरयोदिशश्चमेयज्ञेनकल्पन्ताम्॥२२॥

व्रतश्चम ऋतवश्श्वमेतपश्श्वमेसंवत्सरश्श्चमेहो रात्रयोवृष्टया
बृहद्रथन्तुरंचमेयज्ञेनकल्प्यन्ताम्॥२३॥

इति सप्तमं चमकानुवाकं पठेत्॥७॥

पुनर्नमस्ते रुद्र इत्यदि ६६ पठित्वा।

एका चमेतिस्त्रश्चमे पञ्चेचमेपञ्चचमेसप्पतचमे सप्तचमेनव
चमएकादशचमएकादशचमेत्रयोदश चमेत्रयोदशचमे
पञ्चदशचमेपञ्चदशचमेसप्तदश
चमेसप्तदशचमेनवदशचमेनवदशचमएकविग्ंशतिश्चम
एकविग्ंशतिश्वचमेत्रयौविग्ंशतिश्चमे पञ्चविग्ं
शतिश्चमेपञ्चत्रिग्ंशतिश्चमेसप्तविंग्ंशति
नरविग्शतिश्चएकत्रिग्ंशतिश्चमेश्चत्रस्त्रिग्ंशच्चमेयज्ञेनकाल्पन्ताम्॥२४॥

इत्यष्टमं चमकानुवाकं पठेत्॥८॥

पुनर्नमस्तेरुद्रइत्यादि ६६ पठित्वा॥

चतस्त्रश्चमेष्टौचमेद्वादशचमेषोडशचमेविग्ंशतिश्चमेच तुर्विग्ंशतिश्वमेष्टावि
ग्ंशतिश्चमे द्वाविग्ंशतिश्चमे षट्त्रिग्ं शतिश्चमे चतुश्चत्वारिग्ंशश्च श्चत्वारिग्ं
मेचतुश्चत्वारिग्ंशच्चमेष्टाचत्वारिंग्ंशच्चमे यज्ञेन कल्प्यन्ताम्॥२५॥

इति नवमं चमकानुवाकं पठेत्॥९॥

पठित्वात्रविश्चमेत्र्यवीचमेदित्यवाट्चमेदित्यौहीचमेपञ्चावि
पुनर्नमस्तेरुद्रइत्यादि॥६६॥

श्चमेपञ्चावीचमेत्रित्सश्चमेत्रिवत्साचमेतुर्यवाट्चमेतुर्योही
चमेयज्ञेनकल्प्यन्ताम्॥२६॥

पष्टवाट्चमे पष्टौहीचमे इक्षचमेवशाचमऋषभश्चमे
वेहच्चमेऽनड्वांचमेयज्ञेनकल्पन्ताम्॥२७॥

इति दशमानुवाकं पठेत्।इति केवलानि नव पठित्वा पुनर्नमस्ते ६६ इत्याति
पठित्वा॥

ऊँ वाजायस्वाहाप्रसवायस्वाहापिजायस्वाहाक्रतवे
स्वाहावसवेस्वाहाहर्पतयेस्वाहामुग्धायस्वाहाशिनायस्स्वाहा हरविनगं

शिनआन्त्यायनायस्वाहान्त्यायभौवनायस्वाहा
भुवनस्यपतयेस्वाहाऽधिपतयेस्वाहाप्रजापतये स्वाहाइयन्तेराणिमन्त्रायययन्तासि
यमनऊर्ज्जेत्वावृष्ट्यैत्वा प्रजानान्त्वाधिपत्याय॥२८॥

आयुर्यज्ञेन कल्पताम्प्राणोयज्ञेनकल्पताञ्चक्षुर्यज्ञेनकल्पताग्ं
श्रोत्रंयज्ञेनकल्पतावाग्यज्ञेनकल्पताम्मनोयज्ञे
नकल्पतामात्मायज्ञेनकल्पताम्ब्रह्मयज्ञेनकल्पञ्ज्योतिर्यज्ञेन
कल्पताम्पृष्ठंयज्ञेनकल्पताम्स्वर्य्यज्ञेनकल्प्पता मपृष्टंयज्ञेनकल्प्पतां
यज्ञोयज्ञेनकल्पताम्॥

स्तोमश्चयजुश्चऋक्चसामचबृहश्चरथन्तरञ्चस्वर्द्देवा अगन्मामृत अभूमप्रजापते
प्रजा अभूमवेट्स्वाहा॥२९॥

इत्येकादशमनुवाकं पठेत्॥१९॥

एवमाद्यं रूपं साङ्गन्दयादिषडङ्गसहितं पठित्वा ततो नव केवलानि च
जत्पवा अन्त्यमेकादशं वयग्ंसोम इत्यादि सर्शार्षकं साङ्गं निरङ्गं वा पठेत्॥

अथ शीर्षकमनुवाकम्॥

ॐ वयग्ं सोमप्रतेतवमानस्तनूषुबिभ्रतः॥

प्रजावन्तः सचेमहि॥१॥

एषतेरुद्रभाग महस्वस्त्राम्बिकयातज्जुषस्व।

एषतेरुद्रभागआखुस्तेंपशुः॥२॥

अवरुद्रमदीमह्यवदेवंत्र्यम्बकम्॥

यथानोवस्यसस्करद्यथानः श्रेयसस्करद्य थानोव्यवसाययात्॥३॥

भेषजमसि भेषजङ्गवेश्वायपुरुषायभेषजम्॥

सुखम्मेषायमेष्यै॥४॥

त्रयंबकंयजामहेसुगन्दिम्पुष्टिवर्द्धनम्॥

उर्वारुकमिवबन्धनान्मृत्योर्म्मुक्षीयमामृतात्॥

त्र्यंबकंय्जामहेसुगन्धिम्पति वेदनम्॥१॥

उर्व्वारुकमिवबन्धनादितोमुक्षीयमामुत॥५॥

एतत्तेंरुद्रावसनोनपरोमूजवतोतीहि॥

अवततधन्वापिनाकावसः कृत्तिवासाअहिगूंसन्नशिवोतीहि॥६॥

त्रायुषश्चमदग्ग्रेःकश्यपस्यत्र्यायुषन्॥

यद्देवेषुत्र्यायुषन्तग्ने अस्तुत्रयायुषम्॥७॥

शिवोनामासिस्वधितिस्तेपितानमस्ते अस्तुमामाहिगूंन्सीः॥

निवर्तयाम्यायुषेन्नाद्यायप्रजननायरायस्पोषायसुप्रजास्त्वायसुवीर्याय॥८॥

इति पठेत्॥ एवं साङ्गादिसशिरोन्त जपं कृत्वा तदन्तेऊँ ऋचंवाचम् इत्यादिशान्तिपाठ पठेत्॥

हरिःऊँऋचंवाचम्प्रद्येमनोयजुः प्रपद्येसामप्राणम्प्रपद्येचक्षुः श्रोत्रंप्रपद्येवागोजः सहौजोमयिप्राणापानौ॥१॥

यन्मेछिद्रश्चक्षुषोहृदयस्यमनसोवातितृणम्बृहस्य तिर्मेतद्दधातु॥

शन्नोभवतुभवनस्ययस्पतिः॥२॥

भूर्भवस्वः तत्सवितुर्वरेण्यम्भर्गोदेवस्यधीमहि॥

धियोयोनः प्रचोदयात्॥३॥

कयानश्चित्रआभुवदूतीसदावृधःसखा॥

कया शचिष्टयावृता॥४॥

कस्त्वा सत्योमदानामगूंहिष्ठोमत्सदन्धसः॥

ट्टढाचिदारुजेवसु॥५॥

अभीबुणः सखीनामविताजरितृणाम्॥

शतभ्भवास्यूतिभिः॥६॥

कयात्वन्न ऊत्याभिप्रमन्दसेवृषम्॥

कयास्तो तृभ्यआभर॥७॥

इन्द्रोविश्वस्यराजतिशन्नोअस्तुद्विपदेयशश्चतुष्पदे॥८॥

शन्नोमित्र:शंवरुण: शन्नोभवत्वर्यमा।।

शन्नइन्द्रो बृहस्पति:शंनोविष्णुरुरुक्रम:।। शन्नोवात शंपवता शन्न:स्तपतुसूर्य्य:।।

शन्न:कनिक्रदद्देव:पर्ज्जन्यो अभिवर्षतु।।१०।।

अहानिशम्भवन्तुन: शगुं्रत्रिप्रतिधीयताम्।।

शन्नइन्द्राग्नीभवतामवोंभि:शन्नइन्द्रावरुणारातहव्या।।

शन्नइन्द्रापूषाणव्वाजसातौशमिन्द्रासो मासुविताशय्यो:।।११।।

शन्नोदेवीरभिष्टय आपोभवंतुपीतये।।

शंयोरभिस्त्रवन्तुन:।।१२।।

स्योनापृथिविनोभवानृक्षरानिवेशनी यच्छानशर्म्मसप्रथा:।।१३।।

आपोहिष्ठामयोभुवस्तान ऊर्ज्जेदधातन।।

महेरणायचक्षसे।।१४।।

योव: शिवतंमोरसस्तस्यभाजयतेहन:।।

उशतीरिवमातर:।।१५।।

तस्मा अरङ्गमामवोयस्यक्षयायजिन्वथ।।

आपोजनयथाचन:।।१६।।

द्यौ शान्तिरन्तरिक्षगूंशान्ति: पृथिवीशांतिराप: शान्तिरोषधय शान्ति:।।

वनस्पतय: शान्तिर्विश्श्वेदेवा शान्तिर्ब्ब्रह्मशान्ति:
सर्वगूंशान्ति:शान्तिरेवशान्तिसामाशान्तिरेधि।।१७।।

दृतेदृंगं् हमामित्रस्यमाचक्षुषासर्वणिभूतानिसमीक्षन्ताम्।।

मित्रस्याहश्चक्षुषासर्वाणिभूतानिसर्मीक्षे।।

मित्रस्यचक्षुषासर्मीक्षामहे।।१८।।

दृतेदृंगं् हमा। ज्योक्तेसन्दृशिजीयासंम्।।१९।।

नमस्तेहरसेशोचिषेनमस्ते अस्त्वर्च्चिष्।।

अन्याँस्ते अस्मत्तपन्तुहेतयः पावकोऽअस्माथ्यगुंशिवोभव॥२०॥

नमस्ते अस्तुविद्युतेनमस्तेस्तनयित्नवे॥

नमस्तेभगवन्नस्तुयतः स्वःसमीहसे॥२१॥

यतोयतः समीहसेततोनो अभयंकुरु॥

शन्नः कुरुप्रजाभ्योभयन्नः पशुभ्यः॥२२॥

सुमित्रियानि आप ओषधयः सन्तु॥

दुर्म्मित्रियास्तस्मैसन्तुयोऽस्मान्द्वेष्टियञ्चवयंद्विष्म्मः॥२३॥

तच्चक्षुर्देवहितम्पुरस्ताच्छुक्रमुच्चरन्॥

पश्येमशरदः शतञ्जीवेमशरद शतगुंशृणुयामशरदः शंतप्रब्रवामशरदः शतमदीनाः स्यामशरदः शतम्भूय चशरद शतात्॥२४॥

ॐ शान्तिः शान्तिः शान्तिः इति शान्तिपाठं पठेत्॥

एवं कर्तुमशक्तश्चेत्तदा दशाक्षरं यथाशक्ति जपेत्॥

ततः। ॐ इमारुद्रयतवसेकपर्दिनेक्षयद्वीरायप्रभरामहेमतीः॥

यथाशमसद्विपदेचतुष्पदोव्वश्वम्पुष्टग्रामे अस्मिन्ननातुरम्॥१॥

इति मन्त्रेण अर्घपात्रोदकं गृहीत्वा देवदक्षिणे। धर्मार्थकाममोक्षादिष्वीप्सितफप्राप्त्यर्थं यथाशक्ति यत्कृतरूपादिजपेन स्वयं वा ऋत्विग्द्वारा कारितेन प्रणतजनानुकम्पी सच्चिदानन्दरूपपरमात्मा श्रीसदाशिवमहारुद्रः प्रीयतामिति पठित्वोत्सृजेत्॥

ततो देवाभिमुखः कृताञ्जलिपुटः सन्।

ॐ जपन्यासार्चनं देव यत्कृतं तु मयाद्य वे॥

न्यूनातिदोषरहितं कृतं कर्म्म मया प्रभो॥१॥

भवत्वेतत्कृपासिन्धो क्षमस्व च नमोस्तु ते॥

पूजान्यासादिकं देव कृतं यत्त्वदनुग्रहात्॥२॥

तेन मत्कर्म्मणा रुद्र प्रीतो भव वरप्रदः।

नमः शिवाय शान्ताय सगणयादिहेतवे॥३॥

निवेदयामि चात्मानं त्वं गतिः परमेश्वर॥

न्यूनातिरिक्तं तत्पूर्णं प्रसादात्तव शङ्कर॥४॥

एतत्कृतेन देवेश सदा मे वरदो भव॥

एवं देवं क्षमाप्य आत्मानं निवेद्य पुष्पाञ्जलिंदत्त्वा पुनः स्तुत्वा॥

मन्त्रहीनः॥१॥

आवाहनं न जानामि॥२॥

इति साष्टाङ्गं प्रणमेत्॥

एवं प्रत्यहं कृत्वा प ञ्चरुद्राणां मध्ये रुद्रस्य यावद्भिर्ब्राह्मणैर्यावद्भिर्दिनैःपूर्वे संकल्पः कृतस्तावत्पर्यन्तमुक्तप्रकारेण अक्षारलवणाशनाधः शयनादिनियमैर्जपं कुर्यात् ततः समाप्ते जपे जपोक्तप्रकारेण समग्रं दशांशेन वा शतांशेन तिलादिद्रव्यै-र्होमादिकं कुर्यात्।

"अभिषेके तु शिवमूर्ध्निहिरण्यादिकलशेन संततधारां मधुना सार्पिषा प्रयसा वेक्षुरसेन नारिकेलोदकेन वाम्ररसेन वा कदली भवेन रसेन शुद्धोदकेन वा निषिञ्चेत्।

पूर्वोक्तपूजादिकं कृत्वा अभिषेकः कर्तव्यः"॥

अथ रुद्रहोमविधिः॥

तत्र तावत् जपान्ते मण्डपं छायामण्डपं वा यथात्कृत्वा तन्मध्ये होमनुसारेण चतुरस्त्रं कुण्डं सलक्षणं विधाय तदीशान्यां रुद्रवेदीं नवग्रहमखपक्षे तत्रैव ग्रंहवेदीं कुर्यात्।

ततः सुमुहुर्ते ॐ भद्रंकर्णेभिरित्यादिवेदघोषण पस्चिमद्वारतो मण्डपं प्रविश्य रूद्रवेदीपश्चिमतः स्वासने प्राङ्मुख उपविश्य।

स्वदक्षिणस्थपत्न्या समारब्धः सपवित्रकरो मूलेनाचम्य प्राणनायम्य।

आनोभद्रा इत्यादिशान्तिपाठं पठित्वा सुमुखश्चेत्यादि गणपतिस्मरणपूर्वकं देशकालौ संकीर्त्य।

अमुकगोत्रेमुकशर्माहममुकफलावाप्त्यै श्रीपरमेश्वरप्रीत्यर्थे स्वयं ब्राह्मण द्वारा वा कृतस्यामुकरुद्रजपस्य साङ्गतासिद्ध्यर्थे समग्रं वा जपदशांशेन वा

शतांशतस्तिलादिद्रव्यैर्होमं करिष्ये इति संकल्प्य।

गणेशपूजनं पुण्याहवाचनं मातृकापूजनंनान्दीश्राद्धमाचा र्यादिवरणं दिग्रक्षणं च पूर्वोक्तपद्धतिकाण्डमार्गोण सर्वं कुर्यात्।

ततः कुण्डे अग्निं प्रतिष्ठाप्य ग्रहपीठे ग्रहान्संपूज्य तदीशान्यां कलशं संस्थापयेत्।

ततो रुद्रपीठे वस्त्रं प्रसार्य्य तत्र द्वादशलिङ्गतोभद्रं तन्मध्ये रुद्रयन्त्रं च विलिख्ये तन्मध्ये ताम्रकलशोपरि पलसुवर्णेन तदर्द्धेन वा रचितां रुद्रप्रतिमां सावयवां संस्थाप्य प्राणप्रतिष्ठां कृत्वा मूलमन्त्रेण पुष्पान्तैरुचारैः संपूज्य पूर्वोक्तयन्त्रावरणदेवतापूजां कृत्वा रुद्रं धूपदीपनैवेद्यताम्बूलदक्षिणानीराजनैरभ्यर्च्य साद्याङ्गं प्रणम्य स्तुतिपाठै स्तुत्वा होमं कुर्यात्।

तत्राघारावाज्यभागान्ते ग्रहादिहोमं कृत्वा तिलपायसाज्यैः प्रधानदेवरुद्रहोमं कुर्यात्।

"तत्र होमक्रमः। होमस्तु त्रेधा। समग्रहोमः। जपदशांशाहोमः। शतांशहोमश्च। तत्राद्यः प्रधानभू तोजपाङ्गभूतस्च उत्तरौ त्वङ्ग बूतावेवेति महार्णवः"॥

अथ प्रधानरुद्रहोमः॥ तत्रादौ ऋत्विजः प्राङ्मुखा उदङ्मुखाश्च कुण्डसमीपे स्थित्वा।

भूतशुद्ध्यादिमातृकान्यासान्तं कृत्वा।

पूर्वोक्तरुद्रपञ्चाङ्गन्यासान् कुर्यः।

ततः पञ्चाङ्गमन्त्रैः पञ्चभिः पञ्चाहुतीर्हुत्वा रुद्रहोमः कार्यः।

तद्यथा-यज्जाग्रत इतिषडचैन एकातकहुतिम्।

सहस्त्रशीर्षेति षोडशार्चेन सूक्तेनैकाहुतिम्।

अध्यः संभूत इति षडर्चेन एकाहुतिम्।

आशुः शिशान इति द्वादशर्चेन एकाहुतिम्।

विभ्राट् इतिसत्पदशर्चेन एकाहुतिं च हुत्वा ततः प्रधानभूतेन रुद्राध्यायेन होमः॥

अथ प्रधानरुहोमक्रमः।

स च एकधा त्रेधा षोढा षोडशधा चतुश्चत्वारिंशद्वा अष्टाचत्वारिशद्वा

एकषष्ट्युत्तरशतधापञ्चविंशत्युत्त रचतुः शतधा चेति अष्टविभागानामन्यतमं पक्षमङ्गकृत्य होमं कुर्यात्॥

अत्र एकषष्ट्युत्तरशतधा मन्त्रविभागपक्षेण होमः।

तत्र मन्त्राः॥

ॐ नमस्ते रुद्र स्वाहा॥१॥

ॐ याते रुद्र शिवा स्वाहा॥२॥

ॐ यामिषुङ्गिरि स्वाहा॥३॥

ॐ शिवेनवचसा स्वाहा॥४॥

ॐ अद्यवोच स्वाहा॥५॥

ॐ असौयस्ताम्रो स्वाहा॥६॥

"मत्रान्ते स्वाहापदं सर्वत्र ज्ञेयम्"

ॐ असौयोव॥७॥

ॐ नमोस्तुनीलग्रीवाय॥८॥

ॐ प्रमुञ्चधन्व॥९॥

ॐ विज्यंधनु॥१०॥

ॐ यातेहेति॥११॥

ॐ परिते धन्वनो॥१२॥

ॐ अवतत्य॥१३॥

ॐ नमस्तआयुधाय॥१४॥

मानो महान्त॥१५॥

ॐ मानस्तोके॥१६॥

ॐ नमो हिरण्यबाहवे सेनान्येदिशांच पतयेनमः स्वाहा॥१७॥

ॐ नमो वृक्षेभ्योहरिकेशोभ्यः पशूनाम्पतये नमः स्वाहा॥१८॥

ॐ नमः शष्पिञ्जरायत्त्विषीमतेपथीनाम्पतये नमः स्वाहा॥१९॥

ॐ नमो हरिकेशायोपवीतिने पुष्टानाम्पतये नमः स्वाहा॥२०॥

ॐ नमो बभ्लुशाय व्याधिनेन्नानाम्पतयेनमः स्वाहा॥२१॥

ॐ नमोभवस्यहेत्यैजगताम्पतये नमः स्वाहा॥२२॥

ॐ नमो रुद्रायाततायिनेक्षेत्राणाम्पतये नमः स्वाहा॥२३॥

ॐ नमः सूंतायाहंत्यैवनानाम्पतये नमः स्वाहा॥२४॥

ॐ नमो रोहितायस्थपतये वृक्षाणम्पतये नमः स्वाहा॥२५॥

ॐ नमोभुवन्तयेवारिवस्कृतायौषधीनाम्पतये नमः स्वाहाः॥२६॥

ॐ नमोमंत्रिणेवाणिजायकक्षणाम्पतये नमः स्वाहा॥२७॥

ॐ नमउच्चैर्घोषायांक्रदयतेपत्तीनाम्पतये नमः स्वाहः॥२८॥

ॐ नमः कृत्स्नावीतधावतेसत्त्वनाम्पतये नमः स्वाहा॥२९॥

ॐ नमः सहमानायनिब्याधिन आव्याधिनीनाम्पतये नमः स्वाहा॥३०॥

ॐ नमोनिषङ्गिणेककुभायस्तेनानाम्पतये नमः स्वाहा॥३१॥

ॐ नमोनिचेरवेपरिचरायारण्यानाम्पतये नमः स्वाहा॥३२॥

ॐ नमो वञ्चतेपरिवञ्चतेस्तायूनाम्पतये नमः स्वाहा॥३३॥

ॐ नमोनिपङ्गिणइषुधिमतेतस्कराणाम्पतये नमः स्वाहा॥३४॥

ॐ नमः सृकाविभ्येजिघागं् सद्भ्योमुष्णताम्पतये नमाः स्वाहा॥३५॥

ॐ नमः सिमद्भ्योनक्तंचरद्भ्योविकृंतानाम्पतये नमः स्वाहा॥३६॥

ॐ नम ऊष्णीषिणेगिरिचरायकुलुंचानाम्पतयेनमः स्वाहा॥३७॥

ॐ नम इषुमद्भ्योधन्वायिभ्यशचवोनमः स्वाहा॥३८॥

ॐ नम आतन्वानेभ्यः प्रतिदधानेब्यश्च वो नमः न्वाहा॥३९॥

ॐ नम आयच्छद्भ्योस्यद्यश्च वो नमः स्वाहा॥४०॥

ॐ नमो विशृजद्भ्यो विध्यद्भ्यश्चवो नमः स्वाहा॥४१॥

ॐ स्वपद्भ्यो जाग्रद्भ्यश्च वो नमः स्वाहा॥४२॥

ॐ नमः शयानेभ्य आसीनभ्यश्चवो नमः स्वाहा॥४३॥

ॐ नमस्तिष्ठद्भ्यश्चवोनमः स्वाहा॥४४॥

ॐ नमः सभाभ्यः सबापतिभ्यश्चवोनमः स्वाहा॥४५॥

ॐ नमो श्वेभ्योष्वपतिभ्यश्चवोनमः स्वाहा॥४६॥

ॐ नम आव्याधिनीभ्योविविध्यंतीभ्यश्चवोनमः स्वाहा॥४७॥

ॐ नम उगणाभ्यस्तृगंहतीभ्यश्चवोनमः स्वाहा॥४८॥

ॐ नमोगणेभ्यो गणपतिभ्यश्चवोनमः स्वाहा॥४९॥

ॐ नमो व्रातेभ्यो व्रात पतिभ्यश्चवोनमः स्वाहा॥५०॥

ॐ नमो गृत्सेभ्यो गृत्सपतिभ्यश्चवोनमः स्वाहा॥५१॥

ॐ नमोविरूपेभ्योविश्वपेभ्यश्चवोनमः स्वाहा॥५२॥

ॐ नमः सेनाभ्यः सेनानिभ्यश्चवोनमः स्वाहा॥५३॥

ॐ नमोरथिभ्यो ऽरथेभ्यश्चवोनमः स्वाहा॥५४॥

ॐ नमः क्षत्रिभ्यः संग्रहीतृभ्यश्चवो नमः स्वाहा॥५५॥

ॐ नमो महद्भ्योअर्भकेभ्यश्चवोनमः स्वाहा॥५६॥

ॐ नमस्तक्षभ्योरथकारेभ्यश्चवोनमः स्वाहा॥५७॥

ॐ नमः कुलालेभ्यः कर्मारेभ्यश्चवो नमः स्वाहा॥५८॥

ॐ नमः निषादेभ्यः पुञ्जिष्ठेभ्यश्चवो नमः स्वाहा॥५९॥

ॐ नमः श्वनिभ्यो मृगयुभ्यश्चवोनमः स्वाहा॥६०॥

ॐ श्वभ्यः श्वपतिभ्यश्चवो नमः स्वाहा॥६१॥

ॐ नमो भवायचरुद्रायच स्वाहा॥६२॥

ॐ नमः शर्वायचपशुपतये च स्वाहा॥६३॥

ॐ नमोनीलग्रीवायचशितिकंठायच स्वाहा॥६४॥

ॐ नमः कपर्धिनेचव्युप्तकेशायच स्वाहा॥६५॥

ॐ नमः सहस्त्राक्षायचशतधन्वनेच स्वाहा॥६६॥

ॐ नमो गिरिशाय च शिपिविष्टायच स्वाहा॥६७॥

ॐ नमोमीदुष्टमायचेषुमतेचस्वाहा॥६८॥

ॐ नमोह्रस्वायच वामनायच स्वाहा॥६९॥

ॐ नमो बृहतेच वर्षीयसे च स्वाहा॥७०॥

ॐ नमोवृद्धाय च सवृध्वने च स्वाहा॥७१॥

ॐ नमोआग्रियायच प्रथमायच स्वाहा॥७२॥

ॐ नम आशवेचाजिराय च स्वाहा॥७३॥

ॐ नमः शीघ्रियायचशीभ्यायच स्वाहा॥७४॥

ॐ नमः ऊर्म्यायचावस्वन्यायच स्वाहा॥७५॥

ॐ नमोनादेयायचद्वीप्यायच स्वाहा॥७६॥

ॐ नमोज्येष्ठायचकनिष्ठायच स्वाहा॥७७॥

ॐ नमः पूर्वजायचापरजायच स्वाहा॥७८॥

ॐ नमोमध्यमायचापगल्भायच स्वाहा॥७९॥

ॐ नमोजघन्यायचबुध्न्यायच स्वाहा॥८०॥

ॐ नमः सोभ्यायचप्रतिसर्यायच स्वाहा॥८१॥

ॐ नमोयाम्यायचक्षेम्यायच स्वाहा॥८२॥

ॐ नमः श्लोक्यायचावसान्यायच स्वाहा॥८३॥

ॐ नम उर्वर्यायचखल्यायच स्वाहा॥८४॥

ॐ नमोवन्यायचकक्ष्यायच स्वाहा॥८५॥

ॐ नमः श्रवायचप्रतिश्रवायच स्वाहा॥८६॥

ॐ नम आशुषेणायचाशुरथायच स्वाहा॥८७॥

ॐ नमः शूरायचावभेदिनेच स्वाहा॥८८॥

ॐ नमोबिल्मिनेचकवचिनेच स्वाहा॥८९॥

ॐ नमोवर्म्मिणेचवरूथिनेच स्वाहा॥९०॥

ॐ नमः श्रुतायचश्रुतसेनायच स्वाहा॥९१॥

ॐ नमोदुन्दुभ्यायचाहनन्यायच स्वाहा॥९२॥

ॐ नमोधृष्णवेचप्रमृशायच स्वाहा॥९३॥

ॐ नमोनिषंगिणेचेषुधिमतेच स्वाहा॥९४॥

ॐ नमस्तीक्ष्णेषवेचायुधिनेच स्वाहा॥९५॥

ॐ नमः स्वायुधायचसुधन्वनेच स्वाहा॥९६॥

ॐ नमः स्रुत्यायचपत्थ्यायच स्वाहा॥९७॥

ॐ नमः काट्यायचनीप्यायच स्वाहा॥९८॥

ॐ नमः कल्यायचसरस्यायच स्वाहा॥९९॥

ॐ नमोनादेयायचवैशन्तायच स्वाहा॥१००॥

ॐ नमः कूप्यायचावट्यायच स्वाहा॥१०१॥

ॐ नमोईध्रियायचातप्यायच स्वाहा॥१०२॥

ॐ नमोमेघ्यायचविद्युत्त्यायच स्वाहा॥१०३॥

ॐ नमोवर्ष्यायचावर्ष्यायच सवाहा॥१०४॥

ॐ नमो वात्याचरेष्म्यायच स्वाहा॥१०५॥

ॐ नमोवास्तव्यायचवास्तुपायच स्वाहा॥१०६॥

ॐ नमः सोमायचरुद्रायच स्वाहा॥१०७॥

ॐ नमस्ताम्रायचारुणायच स्वाहा॥१०८॥

ॐ नमः शङ्गवेचपशुपतयेच स्वाहा॥१०९॥

ॐ नम उग्रायचभीमायच स्वाहा॥११०॥

ॐ नमोग्रेवधायचदूरेवधायच स्वाहा॥१११॥

ॐ नमोहन्त्रेचहनीयसेच स्वाहा॥११२॥

ॐ नमोवृक्षेभ्योहरिकेशेभ्यः स्वाहा॥११३॥

ॐ नमस्ताराय स्वाहा॥११४॥

ॐ नमः शम्भवायचमयोभवायच स्वाहा॥११५॥

ॐ नमः शंकराचमयस्कराय स्वाहा॥११६॥

ॐ नमः शिवाय च शिवतरायच स्वाहा॥११७॥

ॐ नमः पार्यायचावर्याय च स्वाहा॥११८॥

ॐ नमः शम्भवायचमयोभवायच स्वाहा॥११९॥

ॐ नमः प्रतरणायचोत्तरणायच स्वाहा॥११९॥

ॐ नमस्तीर्थ्यायचकूल्यायच स्वाहा॥१२०॥

ॐ नमः शष्प्यायचफेन्याय च स्वाहा॥१२१॥

ॐ नमः सिकत्यायचप्रवाह्यायच स्वाहा॥१२२॥

ॐ नमः किगुंशिलायचक्षयणायच स्वाहा॥१२३॥

ॐ नमः कपर्दिनेचपुलस्तयेच स्वाहा॥१२४॥

ॐ नम इरिण्यायचप्रपथ्यायच स्वाहा॥१२५॥

ॐ नमोव्रज्यायचगोष्ठ्यायच स्वाहा॥१२६॥

ॐ नमस्तल्प्यायचगेह्यायच स्वाहा॥१२७॥

ॐ नमोहृदय्यायचनिवेष्यायच स्वाहा॥१२८॥

ॐ नमः काट्यायचगह्वरेष्ठायच स्वाहा॥१२९॥

ॐ नमः शुष्क्यायचहरित्त्यायच स्वाहा॥१३०॥

ॐ नमः पागुंसव्यायचरजस्यायच स्वाहा॥१३१॥

ॐ नमोलोप्यायचोलप्यायच स्वाहा॥१३२॥

ॐ नम ऊर्व्यायचसूर्व्यायच स्वाहा॥१३३॥

ॐ नमः पर्णायचपर्णशद्यायच स्वाहा॥१३४॥

ॐ नमोपगुरमाणायचाभिन्घतेच स्वाहा॥१३५॥

ॐ नम आखिखदतेचप्रखिखदतेच स्वाहा॥१३६॥

ॐ नमः इषुकृद्भ्योधनुष्कृद्भ्यश्चवोनमः स्वाहा॥१३७॥

ॐ नमोवः किरिकेभ्योदेवानागुंहृदयेभ्यः स्वाहा॥१३८॥

ॐ नमोविचिन्वत्केभ्यः स्वाहा॥१३९॥

ॐ नमोविक्षिणकेभ्यः स्वाहा॥१४०॥

ॐ नम आनिर्हतेभ्यः स्वाहा॥१४१॥

ॐ द्रापेअन्धस स्वाहा॥१४२॥

ॐ इमारुद्राय स्वाहा॥१४३॥

ॐ याते रुद्र स्वाहा॥१४४॥

ॐ परिनोरुद्रस्य स्वाहा॥१४५॥

ॐ मीढुष्टमशिवतम स्वाहा॥१४६॥

ॐ विकिरिदविलोहितं स्वाहा॥१४७॥

ॐ सहस्राणिसहस्रशो स्वाहा॥१४८॥

ॐ असंख्यातासहस्राणि स्वाहा॥१४९॥

ॐ अस्मिन्महत्यर्णवे स्वाहा॥१५०॥

ॐ नीलग्रीवाः शितिकण्ठाः स्वाहा॥१५१॥

ॐ नीलग्रीवाः शितिकण्ठाः शर्वा स्वाहा॥१५२॥

ॐ ये वृक्षेषु स्वाहा॥१५३॥

ॐ ये भूतानामधिपतयो सवाहा॥१५४॥

ॐ येपथाम्पथि स्वाहा॥१५५॥

ॐ येतीर्थानि स्वाहा ।।१५६।।

ॐ येन्नेषुविविद्ध्यन्ति स्वाहा।।१५७।।

ॐ य एतावन्तश्च स्वाहा।।१५८।।

ॐ नमोस्तुरुद्रेभ्योयेदिवि स्वाहा।।१५९।।

ॐ नमोस्तुरुद्रेभ्योयेन्तरिक्षे स्वाहा।।१६०।।

ॐ नमोस्तुरुद्रेभ्योयेपृथिव्यां स्वाहा।।१६१।।

एवमेकषष्ट्युत्तरशतमन्त्रविभागपक्षहोमंघृताक्ततिलाहुतिभिः कृत्वा।

ॐ वाजश्चमे।।१।।

ॐ प्राणश्चमे।।२।।

ॐ ओजश्च में।।३।।

ॐ ज्यैष्ठ्यश्चम आधिपत्त्यश्चमें स्वाहा।।४।।

इत्याद्यचमकानुवाकहोमं कुर्यात्।।१।।

पुनः। ॐ नमस्तेरुद्र इत्याद्येकष्टयुत्तरशतधा होमं कृत्वा।

ॐ सत्यंचमे।।५।।

ॐ ऋतश्चमे।।६।।

ॐ यंताचमे।।७।।

ॐ शश्चमेमयश्चमे स्वाहा।।८।।

इति द्वितीयचमकानुवाकहोमं कुर्यात्।।२।।

ततः पुनः ॐ नमस्ते रुद्र इत्यादि १६१ होमं कृत्वा।
ॐ ऊक्क्र्चमेसूनृताचमे।।९।।

ॐ रयिश्चमे।।१०।।

ॐ वित्तश्चमे।।११।।

ऊव्रीहयश्चमे स्वाहा।।१२।।

इति तृतीयचमकानुवाकहोमं कुर्यात्॥३॥

पुनः ॐ रुद्र इत्यादि १६१

१६१ होमं कृत्वा।

ॐ अश्माचमे॥१३॥

ॐ अग्निश्चम आपश्चमे॥१४॥

ॐ वसुचमे स्वाहा॥१५॥

इतिचतुर्थानुवाकहोमं कुर्यात्॥४॥

पुनः ॐ नमस्तेरुद्र इत्यादि १६१ होमं कृत्वा।

ॐ अग्निश्चमइन्द्रश्चमे॥१६॥

ॐ मित्रश्चमइन्द्रश्चमे॥१७॥

ॐ पृथिवीचम स्वाहा॥१८॥

इति पञ्चमानुवाकहोमं कुर्यात्॥५॥

पुनः ॐ नमस्ते इत्यादि १६१

होमं कृत्वा। ॐ अगंशुश्चमे॥१९॥

ॐ आग्रयणश्चमे॥२०॥

ॐ स्रुचश्चमे स्वाहा॥२१॥

इति षष्ठानुवाकहोमः॥६॥

पुनः ॐ नमस्ते इत्यादि १६१

होमं कृत्वा।

ॐ अग्निश्चमे॥२२॥

ॐ व्रतश्चम स्वाहा॥२३॥

इति सप्तमानुवाकहोमः॥७॥

पुनः ॐ नमस्ते इत्यादि १६१

होमं कृत्वा।

ऊँ एकाचमे स्वाहा॥२४॥

इत्यष्टमानुवाकहोमः॥८॥

पुनर्नमस्ते इत्यादि १६१

हुत्वा।

ऊँ चतस्त्रश्चमे स्वाहा॥२५॥

ऊँ नवमानुवाकहोमः॥९॥

पुनर्नमस्ते इत्यादि १६१. हुत्वा।

ऊँ त्र्यविश्चमे॥२६॥

ऊँ पष्ठवाट्चमे स्वाहा॥२७॥

इति दशमानुवाकहोमः॥१०॥

पुनर्नमस्ते इत्यादि १६१

हुत्वा।

ऊँ व्वाजायस्वाहा॥२८॥

ऊँ आयुर्य्यज्ञेन स्वाहा॥२९॥

इत्येकादशानुवाकहोमं कुर्यात्॥११॥

"एवमेकादशावर्तनेन रूपकाख्यो रुद्रो भवति" एकादशावृत्तौ होमान्ते।

यज्जाग्रत इत्यादि ६ सहस्त्रशीर्षा २३ अद्भ्यः संभृत ६

आशुः शिशान १७ विभ्राड्बृहत् २३ इत्यादिपञ्चसूक्तैः पञ्चाहुतीर्हुत्वा॥

ततो नमस्तेरुद्र इति रुद्राध्यायेन पूर्वोक्तप्रकारेण हुत्वा होमान्ते एकैकेन चमकविभागेन हुत्वा॥

ऊँ ऋतंवाचं स्वाहा॥१॥

ऊँ यन्मेछिद्रश्चक्षुषो स्वाहा॥२॥

ॐ भूर्भुवः स्वः तत्सवितु स्वाहा॥३॥

ॐ कयानश्चित्र स्वाहा॥४॥

ॐ कस्त्वासत्यो स्वाहा॥५॥

ॐ अभीषुण स्वाहा॥६॥

कयात्वन्न स्वाहा॥७॥

ॐ इन्द्रोविश्वस्य स्वाहा॥८॥

ॐ शन्नोमित्र स्वाहा॥९॥

ॐ शन्नोवात स्वाहा॥१०॥

ॐ अहानिश स्वाहा॥११॥

ॐ शन्नोदेवी स्वाहा॥१२॥

ॐ स्योनापृथिवि स्वाहा॥१३॥

ॐ आपोहिष्ठा स्वाहा॥१४॥

ॐ योवः शिवतमो स्वाहा॥१५॥

ॐ तस्माअरङ्ग स्वाहा॥१६॥

ॐ द्यौः शान्तिरन्तरिक्षग्ं स्वाहा॥१७॥

ॐ दृतेदृगंहमा स्वाहा॥१८॥

दृतेदृगंहमाज्योक्ते स्वाहा॥१९॥

ॐ नमस्ते हरसे स्वाहा॥२०॥

ॐ नमस्तेस्तु स्वाहा॥२१॥

ॐ यतोयतः स्वाहा॥२२॥

सुमित्रियान स्वाहा॥२३॥

ॐ तच्चक्षुर्देवहितं स्वाहा॥२४॥

इति शान्त्यध्यामन्त्रैश्चतुर्विशतिराहुतीर्जुहुयात्॥

एवं प्रधानहोमं बिधाय सर्वे ऋत्विजः प्रागुक्त पञ्चाङ्गन्यासान् कुर्यः।

एवं क्रमेण लघुरुद्रहोमं महारुद्रमतिरुद्रहोमं वा कुर्यात्।

इति रुद्रहोमः।

अथ पीठदेवताहोमः॥

तत्र पीठ देवताभ्यो लिङ्गतोभद्रदेवताभ्यो रुद्रयन्त्रदेवताभ्याश्चैकैकामाज्याहुतिं जुहुयुः।

तद्यथा। ॐ मण्डकाया स्वाहा॥१॥

ॐ कालाग्निरूद्राय॥२॥

ॐ आधारशक्त्यै॥३॥

कूर्माय॥४॥

धरायै॥५॥

सुधासिन्धवे॥६॥

श्वेतद्वीपाय॥७॥

सुराङ्घ्रि पाय॥८॥

मणिहर्म्याय॥९॥

हेमपीठाय॥१०॥

धर्माय॥११॥

ज्ञानाय॥१२॥

वैराग्याय॥१३॥

ऐस्वर्य्याय॥१४॥

अधर्माय॥१५॥

अज्ञानाय॥१६॥

अवैराग्याय॥१७॥

अनैश्वर्याय॥१८॥

अनन्ताय स्वाहा॥१९॥

तत्त्वपद्माय॥२०॥

आनन्दमयकन्दाय॥२१॥

संविन्नालाय॥२२॥

विकारमयकेसरेभ्य॥२३॥

प्रकृत्यात्मकपत्रेभ्य॥२४॥

सूर्यमण्डलाय॥२५॥

चन्द्रमण्डलाय॥२६॥

अग्निमण्डलाय॥२७॥

सत्त्वाय॥२८॥

रजसै॥२९॥

तमसे॥३०॥

आत्मने॥३१॥

अन्तरात्मने॥३२॥

परमात्मने॥३३॥

ज्ञानात्मने॥३४॥

मायातत्त्वाय॥३६॥

कलातत्त्वाय

विद्यातत्त्वाय॥३७॥

परतत्त्वाय स्वाहा॥३८॥

इति पीठदेवताहोमः। ॐ वामायै स्वाहा॥१॥

ज्येष्टायै॥२॥

रौद्रै॥३॥

काल्यै॥४॥

कलविकरिण्यै॥५॥

बलविकरिण्यै॥६॥

बलप्रमथन्यै॥७॥

सर्वभूत दमन्यै॥८॥

मनोन्मन्यै॥९॥

इति नवपीठशक्तिहोमः॥

ॐ नमो भगवते सकलगुणात्मशक्तियुक्ताय अनन्तयोगपीठात्मने स्वाहा॥१॥

अथ यन्त्रावरणदेवताहोमः॥

ॐ नमो भगवते रुद्राय स्वाहा॥१॥

सद्योजाताय॥१॥

वामदेवाय॥२॥

अघोराय॥३॥

तत्पुरुषाय॥४॥

ईशानाय॥५॥

नन्दिने॥६॥

महाकालाय॥७॥

गणेश्वराय॥८॥

वृषभाय॥९॥

भृङ्गिरिटये॥१०॥

स्कन्दाय॥११॥

उमायै॥१२॥

चण्डीश्वराय॥१३॥

इति प्रथमावणम्। अनन्ताय॥१४॥

सूक्ष्माय॥१५॥

शिवाय॥१६॥

एकपदे॥१७॥

एकरुद्राय॥१८॥

त्रिमूर्तये॥१९॥

श्रीकण्ठाय॥२०॥

वामदेवाय॥२१॥

ज्येष्ठाय॥२२॥

श्रेष्ठाय॥२३॥

रुद्राय॥२४॥

कालाय॥२५॥

कलविकरणाय॥२६॥

बलाय॥२७॥

बलविकरणाय॥२८॥

बल प्रमथनाय॥२९॥

इति द्वितीयावरणम्॥

अणिम्ने॥३०॥

महिम्ने॥३१॥

लघिम्ने॥३२॥

गरिम्णे॥३३॥

प्राप्त्यै॥३४॥

प्राकाम्यै॥३५॥

ईशितायै॥३६॥

वशितायै॥३७॥

ब्राह्म्यै॥३८॥

माहेश्वर्यै॥३९॥

कौमार्यै॥४०॥

वैष्णव्यै॥४१॥

वाराह्यै॥४२॥

इन्द्राण्यै॥४३॥

चामुण्डायै॥४४॥

चण्डिकायै॥४५॥

असिताङ्गभैरवाय॥४६॥

रुरुभैरवाय॥४७॥

चंडभैरवाय॥४८॥

क्रोधभैरवाय॥४९॥

उन्मत्तभैरवाय॥५०॥

कालभैरवाय॥५१॥

भीषणभैरवाय॥५२॥

संहारभैरवाय॥५३॥

इति तृतीयावरणम्॥ भवाय्॥५४॥

शर्वाय॥५५॥

ईशानाय॥५६॥

पशुपतये॥५७॥

रुद्राय॥५८॥

उग्राय॥५९॥

भीमाय॥६०॥

महादेवाय॥६१॥

इति शिवाष्टकहोमः॥

अनंताय॥६२॥

वासुकये॥६३॥

तक्षकाय॥६४॥

कुलीरकाय॥६५॥

कर्कोटकाय॥६६॥

शंखपालाय॥६७॥

कम्वलाय॥६८॥

अश्वतराय॥६९॥

इत्यष्टनागहोमः॥

वैन्याय॥७०॥

पृयवे॥७१॥

हैहयाय॥७२॥

अर्जुनाय॥७३॥

शाकुन्तलेयाय॥७४॥

भरताय॥७५॥

नलाय॥७६॥

रामाय॥७७॥

"इति नृपाष्टकहोमः" हिमवते॥७८॥

निषधाय॥७९॥

विन्ध्याय॥८०॥

माल्यवते॥८१॥

पारियात्राय॥८२॥

मलयाय॥८३॥

हेमकूटाय॥८४॥

गन्धमादनाय॥७५॥

"इतिगिर्य्यष्टकहोमः" इति चतुर्थावरणम्॥

इन्द्राय॥८६॥

अग्नये॥८७॥

यमाय॥८८॥

निर्ऋतये॥८९॥

वरुणाय॥९०॥

वायवे॥९१॥

कुबेराय॥९२॥

इशानाय॥९३॥

"इतीन्द्रादिदेवहोमः" शच्यै॥९४॥

स्वाहायै॥९५॥

वाराह्यै॥९६॥

खड्गिन्यै॥९७॥

वारूण्यै॥९८॥

वायव्यै॥९९॥

कौबेर्यै॥१००॥

ईशान्यै॥१०१॥

"इत्यष्टशक्तिहोमः" वज्राय॥१०२॥

शक्त्यै॥१०३॥

दण्डाय॥१०४॥

खाड्गाय॥१०५॥

पाशाय॥१०६॥

अङ्कुशाय॥१०७॥

गदायै॥१०८॥

त्रिशूलाय॥१०९॥

"इत्यायुधहोमः" ऐरावताय॥११०॥

मेषाय॥१११॥

महिषाय॥११२॥

प्रेताय॥११३॥

मकराय॥११४॥

हरिणाय॥११५॥

नराय॥११६॥

वृषभाय॥११७॥

इति वाहनहोमः॥

ऐरावताय॥११८॥

पुण्डरीकाय॥११९॥

वामनाय॥१२०॥

कुमुदाय॥१२१॥

अञ्जनाय॥१२२॥

पुष्पदन्ताय॥१२३॥

सार्वभौमाय॥१२४॥

सुप्रतीकाय॥१२५॥

इति गजहोमः॥

इति पञ्चमावरणम्॥

इन्द्राय॥१२६॥

अग्नये॥१२७॥

यमाय॥१२८॥

निर्ऋतयै॥१२९॥

करुणाय॥१३०॥

वायवे॥१३१॥

कुबेराय॥१३२॥

ईशानाय॥१३३॥

ब्रह्मणे॥१३४॥

अनन्ताय॥१३५॥

"इति दिक्पालहोमः"

इति षष्ठावरणम्।

विरूपाक्षाय॥१३६॥

विश्वरूपाय॥१३७॥

पशुपतये॥१३८॥

ऊर्ध्वलिङ्गाय॥१३९॥

शेषाय॥१४०॥

तक्षकाय॥१४१॥

अनन्ताय॥१४२॥

वासुकये॥१४३॥

शंखपालाय॥१४४॥

महापद्माय॥१४५॥

कम्बलाय॥१४६॥

कर्कोटकाय॥१४७॥

"इत्यष्टनागहोमः"॥

इति सप्तमावरणम्॥

इतिरुद्रयत्रदेवताहोमः॥

एवं होमं कृत्वा स्विष्टकृदादिप्रायश्चित्तहोमांतं समाप्य।

इंद्रादिदिक्पालेभ्यो नवग्रहोभ्यः क्षेत्रपालदिभ्यश्च माषभक्तबलींस्तत्तन्मंत्रैर्दद्यात्॥

ततः पूर्णाहुतिहोमः॥

घृतकुम्भवसोर्धारां पातयेदानलोपरि॥

औदुम्बरीमथार्द्रां च ऋज्वी कोटरवर्जिताम्॥

बाहुमात्रां सुचं कृत्वा ततः स्तम्भद्वयोपरि॥

घृतधारां तथा चाज्यमग्रेरुपरि पातयेत्॥

श्रावयेत्सूक्तमाग्नेयं वैष्णवं रौद्रमैन्दवम्॥

महावैश्वानरं साम ज्येष्ठसाम च पाठयेत्॥

इति मात्स्योक्तः पूर्णाहुतिहोमः॥

अत्र चतुर्गृहीताज्येन समुद्रादूर्मीत्यादिमन्त्रैर्मूलमन्त्रेण च वाजश्चमे इत्यनुवाकैश्च सततां वसोर्द्धारां जुहुयात्॥

एवं पूर्णाहुतिं वसोर्धारां च हुत्वा नमस्ते रूद्र इत्यादिभिः रुद्रं स्तुत्वाप्रणीताविमोकान्तं कर्म्मशेषं समाप्य।

आचार्यादिभ्यो दिक्षिणां दत्त्वा जपहोमश्रेयो गृहणीयात्।

तत आचार्यादयो रुद्रग्रहकलशोदवेनयजमानस्याभिषेकं कुर्युः। ततो यजमानो ग्रहाणां रुद्रस्य चोत्तरपूजां महानीराजनं च कृत्वा त्रिः परिक्रम्य साष्टाङ्गं प्रणष्टाम्य।

ॐ कृतेनानेन ब्राह्मणद्वारा अमुकरुद्रजपेन श्रीसदाशिवमहारुद्रः प्रीयतामिति पठित्वा देवदक्षिणभागे जलमुत्सृजेत्।

ततो देवाभिमुखः कृतञ्जलिपुटः सन्॥

"जपन्यासार्चनं होमं यत्कृतं तु मयाद्य वै न्यूनातिदोषरहितं कृतं कर्म मया प्रभो॥१॥

भवत्वेतत्कृपासिन्धो क्षमस्व च नमोस्तुते॥

पूजान्यासादिकं देव कृतं यत्त्वदनुग्रहात्॥२॥

तेन मत्कर्मणा रुद्र प्रीतो भव वरप्रदः॥

नमः शिवाय शान्ताय सगणायादिहेतवे॥

निवेदयामि चात्मानं त्वं गतिः परमेश्वर॥३॥

न्यूनातिरिक्तं तत्पूर्णं प्रसादादस्तु शङ्कर॥

एतत्कृतेन देवेश सदा मे वरदो भव"॥४॥

इति देवं क्षमाप्य विसृज्य प्रतिमादिकमाचार्यादिभ्यो दत्त्वाग्निंसंपूज्य गच्छगच्छेति विसृजेत्।

ततो यथाशक्ति ब्राह्मणान्संभोजयित्वायस्यस्मृत्या इत्यादि जपित्वा कर्मसंपूर्णतां वाचयित्वा कर्मेश्वरार्पणं कृत्वा सुहृद्युक्तो भुञ्जीत॥

इति रुद्रहोमपद्धतिः॥ अथ कामनाभेदेन रुद्रहोमद्रव्याणि (लिंगपुराणे) रुद्राध्यायेन विधिना घृतेन नियतः क्रमात्।

सघृतेन तिलेनैव कमलेन विशेषतः॥

दूर्वया घृतगोक्षीरमिश्रया मधुना तथा।

चरुणा सघृतेनैव केवलं पयसाथ वा॥

यस्तुजुहुयात्कालमृत्योः प्रतीकारः प्रकीर्तितः॥

(हेमाद्रौ) पापक्षयेभिचारे च तथा व्याधिविमोचने॥

पलाशसमिधः कार्या नान्यत्रोत्पातदर्शनात्॥१॥

औदुम्बर्याश्च समिधो मध्यक्ताश्च तथाक्षताः॥

ग्राह्यश्चान्नाद्यकामेन श्रियै शान्त्यै च पायसम्॥२॥

सर्वकामेन वा ग्राह्या।

आयुर्वृद्ध्यै तिलाः स्मृताः॥

घृताक्ता अथवा दूर्वास्तेजस्कामेन वै घृतम्॥३॥

व्रीहयः पशुकामेन राष्ट्रकामेन वै यवाः॥

उपविश्य शुचौ देशे दूर्वास्तम्बे जपेद्यदि॥४॥

जुहुयाच्छूत पुष्पैर्वा स विश्वं कुरुते वशम्॥

स्पृष्ट्वाश्वत्थं जपेद्यस्तु रुद्रैकादशिनीं नरः॥५॥

रोगान्ज्वरातिसारादीन्नाशयेदुल्बणानपि॥

होमः पलाशसमिधा कर्तव्यो मधुसंयुतः॥६॥

एकादशमहरुद्रान् परचक्रागमे पुनः॥

जपेदेकाशगुणान्होमस्तु विधिवत्स्मृतः॥७॥

तिलैराज्येन संसिक्तैर्विधिवदभिवर्तयेत्॥

रुद्रैकादशिनी जाप्ये शतमेकोनमिष्यते॥८॥

सहस्त्राश्च तथा रौद्रे नवत्येकोनया युतः॥

एवं त्रिगुणिता कार्या महारुद्रातिरुद्रयोः॥९॥

वृष्टिकामेन वा योज्या हस्त्यश्वामयशान्तये॥

उद्भवेत्यद्भुतानां च ग्रहाणांतु विपर्यये॥१०॥

गृहग्रामादिशान्त्यै च तिलश्चाज्येन संयुताः॥

होमान्ते सर्वकामानांकूष्माण्डैश्चापि वा जपः॥११॥

होतव्यमाज्यं विधिवन्महाव्याहृतिभिस्तथा॥

परिषिच्य ततो वह्निं तत्त्वायामेति चार्च्य च॥१२॥

अभिषेकं ततः कुर्यान्मंत्रैस्त्वलिङ्गकैः शुचिः॥

आदावन्ते व संपूज्य पार्वतीसहितं शिवम्॥१३॥

लोकपालांश्च संपूज्य विधिवच्छिवसन्निधौ॥

गङ्गां दुर्गा च मन्त्रैण विदिवद्विंरदाननम्॥१४॥

स्नपनोक्तविधानेन त्वरितेन नमस्कृतिः॥

तर्पयेद्विविधै रत्नैः पयसा पायसेन वा॥१५॥

प्रीयतां शम्भुरित्युक्त्वा भूमिदेवाञ्छुचिः शुचीन्॥

दत्त्वा तु दक्षिणां तेभ्यः प्रणिपत्य विसर्जयेत्॥१६॥

एवं कृते स भगवन्प्रीतः कामान्प्रयच्छति॥

अकामस्य फलं मुक्तिर्नात्र कार्या विचारणा॥१७॥

बौदायनोक्तमन्त्रोयं सर्वकामसमृद्धये॥

इतिरुद्रहोमद्रव्याणि॥

अथ रुद्राभिषेकविधानं (हेमाद्रौ महार्णवे च) सुमुहूर्ते कृतनित्यक्रियः धृतभस्मात्रिपुण्ड्रद्राक्षः पवित्रापाणिः शिवसमीपेतद्दक्षिणतः पशिचमतो वा सन्मुखः स्वासने उदङ्मुख उपविश्य मुलेनाचम्य प्राणानायम्य देशकालौ संकीर्त्य ममात्मनः श्रुतिस्मृतिपुराणोक्त फलावाप्तये धर्मार्थकाममोक्षसिद्धिद्वारा सर्वपातकनिरासार्थं सर्वव्याधिनिवृत्तिपूर्वकसर्वाभीष्टसिद्ध्यर्थे वा अमुककामनासिद्ध्यंर्थे श्रीभवानी-शाङ्करमृत्युञ्जययमहारुद्रदेवताप्रीत्यर्थं च स्वयं (ब्रह्मणद्वारा वा) अमुकद्रव्येण नमस्तेरुद्र इत्यादि शतरुद्रियेण (वा डङ्गरुद्रेण वा अमुकरूपादिरुद्रजपेन) सन्ततधारयाभिषेकं करिष्ये।

इति संकल्प्य। तत्रादौनिर्विघ्नतासिद्धये 'ॐ सुमुखश्चैकदन्तश्च' इत्यादिस्मरणपूर्वकं गणपतिं संपूज्य स्मरणं वा कृत्वा पूर्वोक्तभूतशुद्ध्यादिश्रीकण्ठादिक लान्यासान्तं-कुर्यात् ततः यातेरुद्रइत्यादि ३१ मन्त्रैः शिखाद्यस्त्रान्तमेकत्रिंशदङ्गन्यासं प्रथमम्॥१॥

ततः ॐ नमो भगवते रुद्रायेतिमन्त्राक्षरैर्मूर्द्धादिपादान्तंदशाङ्गन्यासंद्वितीयम्॥२॥

ततः सद्योजातादिभिः पादादिमूर्द्धान्तंपञ्चाङ्गन्यासं तृतीयम्॥३॥

मनोजूतिरित्यादिमन्त्रैर्गुह्यादिमस्तकान्तंपञ्चांङ्गन्यासंचतुर्थम्॥४॥

न्यासं च कृत्वा यज्जाग्रत इत्यादिषड्मन्त्रैर्हृदयं॥१॥

सहस्त्रशीर्षाइत्यादिषोडशभिः शिरः॥२॥

अद्भ्यः संभूतइत्यादिषड्भिः शिखा

आशुः शिशानुइत्यादिसप्तदशभिः कवचम्॥४॥

विभ्राडितिषोडशभिर्नेत्रम्॥५॥

नमस्तेरुद्रइत्यादिषोडशभिरस्त्रं च विन्यसेत्॥६॥

इति पञ्चमं न्यासं कुर्यात्॥५॥

एवं पञ्चन्यासं पूर्ववत् कृत्वा शातातपोक्तं षष्ठं षडङ्गन्यासं कुर्यात्।

तद्यथा ऊँ प्रजनने व्रह्मातिष्ठतु॥१॥

पादयोर्विष्णुस्तिष्ठतु॥२॥

हस्तयोर्हरस्तिष्ठतु॥३॥

बाह्वोरिन्द्रस्तिष्ठतु॥४॥

जठरे अग्निस्तिष्ठतु॥५॥

हृदये शिवस्तिष्ठतु॥६॥

कण्ठे वसवस्तिष्ठन्तु॥७॥

वक्त्रे सरस्वती तिष्ठतु॥८॥

नासिकयोर्वायुस्तिष्ठतु॥९॥

नयनयोः सूर्याचन्द्रमसौ तिष्ठेताम्॥१०॥

कर्णयोरश्विनौ देवौ तिष्ठेताम्॥११॥

ललाटे रुद्रास्तिष्ठन्तु॥१२॥

मूर्ध्न्यादित्यास्तिष्ठन्तु॥१३॥

पृष्ठे पिनाकी तिष्ठतु॥१४॥

पुरतः शूली तिष्ठतु॥१५॥

पार्श्वयोः शिवाशङ्करौ तिष्ठेताम्॥१६॥

सर्वतो वायुस्तिष्ठतु॥१७॥

ततो बहिः सर्वतोग्निर्ज्वालामालापरिवृतस्तिष्ठतु॥१८॥

सर्वेष्वङ्गेषु सर्वा देवतास्तिष्ठन्तु॥१९॥

माँगं् रक्षन्तु आग्निर्वायुः सूर्यश्चन्द्रमा दिशं आपः पृथिव्योषधिवनस्पतय इन्द्रः पर्जन्य ईशान आत्मा पुनर्नम अग्निर्मे वाचि श्रित इति यथालिङ्गमङ्गानि संस्पृशेत् इति न्यासषट्कं कृत्वा मानसोपचारैः संपूज्य 'ऊँ ध्यायेन्नित्यं महेशं' इति ध्वात्वा लिङ्गपूजां कुर्यात्॥

तद्यथा आराधितो मनुष्यैस्त्वं सिद्धैर्देवासुरादिभिः॥

आराधयामि भक्त्या त्वां मां गृहाण महेश्वर॥१॥

ऊँ त्रयम्बकं यजामहे इत्याराध्य॥

ऊँ आत्वावहंतुहरयः सचेतसः श्वेतैरश्वैः सहकेतुमद्भिः॥

वाताजवैर्बलवद्भिर्मनोजवैरायाहि शीघ्रं मम हव्याय शर्वोम् ऊँ
सद्योजातंप्रपद्यामीत्यावाह्य॥१॥

ऊँ त्र्यम्बकं सद्योजाताय वै नमोनमः इत्यासनम्॥२॥

त्र्यम्बकं भवे भवे नातिभवे भवस्व मामिति पाद्यम्॥३॥

ऊँ त्र्यम्बकं भवोद्भवाय नम त्यर्घ्यम्॥४॥

ऊँ त्र्यम्बकं आपोहिष्ठामयो भुव इत्यादिमन्त्रत्रयेण स्नानम्॥५॥

देवैस्तु वन्दिता धेनुः सर्वपापप्रणाशिनी॥

तत्क्षीरस्नापितो देव नित्यं में वरदो भव॥

ऊँ त्र्यम्बकं पयःस्नानम्॥६॥

कामतोऽकामतो वापि यन्मया दुष्कृतं कृतम्॥

तत्सर्वेऽरिलयं यातु दधिस्नानेन भो शिव॥१॥

त्र्यम्बकं इति दधिस्नानम्॥७॥

रसानामुत्तमं त्वाज्यं देवानां च सदा प्रियम्॥

तेन त्वं स्नापितो देव निधिकान्तिप्रदो भव॥८॥

त्र्यंम्बकं इति घृतस्नानम्॥८॥

यस्य धारणमात्रेण तृप्तिं याति पितामहः॥

मुधुना स्नापितो देव नित्यं शोकहरो भव॥१॥

त्र्यंम्भकं मधुस्नानम्॥९॥

यमलोकभयत्रस्तः शरणं त्वां गतः शिव॥

खण्डस्नानेन देवेश मां कुरुष्व सुखान्वितम्॥१॥

ॐ त्र्यम्बकं इति शर्करोदकस्नानम्॥१०॥

यस्य दर्शनमात्रेण शुद्धि प्राणाश्च जीवितम्॥

तेन चोत्तमतोयेन स्नातो देहि प्रियं ध्रुवम्॥१॥

ॐ त्र्यंम्बकं इति शुद्धोदकस्नानम्॥११॥

अथाद्भिर्देवं तर्पयेत्॥

ॐ भवं देवं तर्पयामि।

ॐ शर्वं देवं तर्पयामि।

ॐ ईशानं देवं तर्पयामि।

ॐ पशुपतं देवं तर्पयामि।

ॐ रुद्रं देवं तर्पयामि।

ॐ भीमं देवं तर्पयामि।

ॐ महान्तं देवं तर्पयामीति तर्पयित्वा तत ॐ त्र्यंम्बकं ज्येष्ठाय नमः।

इत्याचमनीयम्॥१२॥

ॐ त्र्यबकं श्रेष्ठाय नमः इति मधुपर्कमाचमनं च॥१३॥

सुगन्धं चन्दनं देव कुङ्कुमेन समन्वितम्॥

अर्चितोसि मया भक्त्या शिवलोकप्रदो भव॥

ॐ त्रय्म्बकं इति गन्धम्॥१४॥

अक्षय्यान्बन्धुपुत्रार्थान् कायं चैवाक्षिवाङ्मनः॥

अन्ते चैवाक्षयं लोकमक्षतैरर्चितोः कुरु।

ॐ त्र्यंबकं इत्यक्षतान्॥१५॥

संतानः परिजातश्च ये चान्ये सुरपादपाः॥

तेषां पुष्पैर्मया देव पूजितः सुखदो भव॥१॥

ॐ त्र्यंबकं कलविकरणाय नमः इति पुष्पाणि॥१६॥

धूपोयं गृह्यतां देव सुन्दरो गन्धवाञ्छुचिः॥

ईप्सितं मे वरं देहि परत्र चं शुभांगतिम्॥१॥

ॐ त्र्यंबकं सर्वभूतदमनाय नमः इति धूपम्॥१७॥

शुद्धा शुक्लाम्बरा वर्तिराज्येन च समन्विता॥

दीपवर्तिप्रदानेन प्रीतः स्यादीश्वरो भव॥१॥

ॐ त्र्यंबकं मनोन्मनाय नमः।

इति दीपम्॥१८॥

सर्वमंत्रप्रदानं च देवानां तु सदा प्रियम्॥

तेन चान्नप्रदानेन सुप्रीतो वरदो भव॥

ॐ त्र्यंबकं भवोद्भवाय नमः।

इति नैवेद्यम्॥

आचामनं च॥१९॥

अथाष्टभिर्मन्त्रैरष्टौ पुष्पाणि। ॐ भवाय देवाय नमः पुष्पं समर्पयामि॥१॥

नमः पुष्पं समर्पयामि॥१॥

ॐ शर्वाय देवाय॥२॥

ॐ ईशानाय देवाय॥३॥

ॐ पशुपतये देवाय॥४॥

ॐ रुद्राय देवाय॥५॥

ॐ उग्राय देवाय॥६॥

ॐ भीमाय देवाय॥७॥

ॐ महते देवाय॥८॥

इति पुष्पाणि समर्प्य प्रदक्षिणात्रयं कृत्वा साष्टाङ्गं प्रणमेत्॥

ततः शिवस्य मूर्ध्नि हिरण्यादिकलशेन संततां धारां मुधुना सर्पिषा पयसा वेक्षुरसेन नारीकेलोदकेन चाम्ररसेन वा तदभावे उदकेन।

ॐ नमस्तेरुद्रमन्यव इत्येकादशानामनुवाकानामेकमेकं जपेत्सर्वेषां पारे पुनराराधयेत्।

उत्तमाराधनेन तदेतद्विधानमुक्तम्॥

ततः अभिषेकान्ते॥

ॐ अनेन रुद्राभिषेककर्मणा श्रीभवानीशङ्करमृत्युञ्जययमहारुद्रः प्रीयतामिति देवदक्षिणपार्श्वे जलमुत्सृजेत्॥

ॐ तत्सद्ब्रह्मा॥ ततस्तेनाभिषिक्तोदकेन (अक्षि भ्यामित्यनुवाकेन) ॐ अक्षीभ्यांतेनासिकाभ्यांकर्णाभ्यां छुबुकादाधि।

यक्ष्मंशीर्षण्यंमस्तिष्काजिह्वायाविवृहामिते ग्रीवाभ्यस्त उष्णिहाभ्यः कीकसाभ्यो अनूक्यादयक्ष्मंदोषण्य।

मंमाभ्यांबाहुभ्यांविवृहामिते॥२॥

आंत्रेभ्यस्तगुदाभ्योवनिष्ठोहृदयादधि।

यक्ष्मंमतस्त्राभ्यांयक्रः प्लाशिभ्योविवृहामिते॥३॥

ऊरुभ्यांतेअष्टीवभ्द्यांपार्ष्णिभ्यांप्रपदाभ्यां क्ष्मंश्रोणियभ्यांभासदा
द्धंससोविवृहामिते ४ मेहनाद्वनंकरणाल्लोमभ्यस्तेनखेभ्यः॥

यक्ष्मंसर्वस्मादात्मनस्तमिदंविवृहामिते ५ अंगादंगाल्लाम्नोलोम्नोजातं पर्वणिवर्वणि।

यक्ष्मंसर्वस्मादात्मनस्तमिदंविवृहामिते॥६॥

इति ऋग्वेदीयानुवाकम्॥

वारुणौर्वा मन्त्रैः मस्तकाद्यापादान्तं संमृज्यात्।

पापक्षयार्थी व्याधिविमोचनार्थी श्रीकामः पुष्टिकामो मोक्षार्थी च कुर्यादेवं कुर्वन् सिद्धिमाप्नाति॥

तत आचार्याय दक्षिणां ददाति दश गाः सवत्साः सुवर्ण भूषिताः॥

वृषभैकादशस्तलाभे एकां गां दद्यादित्याह भगवान् बौधायनः॥

इति रुद्राभिषेकविधानम्॥

अथ चण्डेश्वारमंत्रपुरश्चरणं शारदायाम्।

मूलमन्त्रो यथा ऊँ ध्वँ फट्।

इति त्र्यक्षरो मन्त्रः।

अस्य चण्डेश्वरमन्त्रस्य त्रिकऋषिरनुष्टुप्छन्दश्चण्डेश्वरो देवता सर्वेष्टसिद्ध्यर्थे विनियोगः॥

ऊँ त्रिकऋषये नमः शिरसि॥१॥

ऊँ अनुष्टुप्छन्दसे नमः मुखे॥२॥

ऊँ चण्डेश्वरदेवतायै नमः हृदये॥३॥

इति ऋष्यादिन्यासः॥

ऊँ दीप्तफट्हृदयाय नमः॥१॥

ऊँ ज्वलफट् शिरसे स्वाहा॥२॥

ज्वालामालिनीफट् शिखायै वषट्॥३॥

ऊँ फट् कवचाय हुं॥४॥

ॐ हनफट् नेत्रत्रयाय वौषट्॥५॥

ॐ सर्वज्वालिनीफट् इत्यस्त्राय फट्॥६॥

इति षडङ्गन्यासं कृत्वा ध्यायेय॥

चण्डेश्वरं रक्ततनुं त्रिनेत्रं रक्तांशुकाढ्यं हृदि भावयायमि॥

ढक्कां त्रिशूलं स्फटिकाक्षमालां कमण्डलुं बिभ्रतमिन्दुचूडम्॥१॥

एवं ध्यात्वा शिचपञ्चाक्षरोदिते पीठे मूलेन मूर्तिं प्रकल्प्य ॐ ध्वं चण्डेश्वराय नमः इति मन्त्रेण आवाहनादिपुष्पान्तैरुपचारैः संपूज्य संपूज्य आवरणपूजां कुर्यात्॥

षट्कोणे हृदयादिषडङ्गानि संपूज्य अष्टदले द्व्यष्टमातृकाः संपूजयेत्॥

ततो भूपुरे इन्द्रादिदशदिक्पालान् तद्बाह्ये वज्राद्यायुदानि च पूजयेत्।

एवं चतुरावरणापूजां कृत्वा धूपादिनीराजनान्तैश्चंडेशं संपूज्य त्रिलक्षं मन्त्रं जपेत।

वर्णलक्षं जपेन्मन्त्रं होमं कुर्याद्दशांशतः॥

मधुरत्रयसंयुक्तैर्विशुद्धैस्तिलतण्डुलैः॥१॥

इति सिद्धे मनौ मन्त्री धनवाञ्जायतेचिरात्॥

तर्पयेन्मनुनानेन नित्यमष्टोत्तरं शतम्॥२॥

श्रियं प्राप्नोति महतीं पुत्रमित्रसमिन्वतः॥

प्रियङ्गुकुसुमैः फुल्लैस्तत्काष्ठज्वलितेऽनले॥३॥

जुहुयादयुतं मन्त्री पुरक्षोभः प्रजायते॥

साध्यवृक्षत्व चो लोणं पिष्ट्ण पिष्टसमन्वितम्॥४॥

पुत्तलीं रुचिरां कृत्वा प्रतिष्ठाप्य समीरणम्॥

छित्त्वा छित्त्रा प्रजुहुयादष्टोत्तरशतं निशि॥५॥

सप्ताहमेवं कुर्वीत साध्यो दासो भवेत्स्वयम्॥

शैवमन्त्रेषु निष्णातश्चण्डेश्वरमनुं भजेत्॥६॥

सर्वान्कामानवाप्नोति परत्रेहचनन्दति॥

इति चण्डेश्वरमन्त्रप्रयोगः॥

अथ त्वरितरुद्रमन्त्रपुरश्चरणप्रयोगः।

(हेमाद्रिशान्तिसारशान्तिरत्नेष) देवालयादिषु जपस्थानं प्रकल्प्य तत्र नित्यकर्मा-नन्तरं जपसने प्राङ्मुख उदङ्मुखो वा उपविश्य भस्मत्रिपुण्ड्रं रुद्राक्षमालां च धारयित्वा मूलेनाचम्य तेनैव प्राणानायम्य देशकालौ संकीर्त्य अमुककामनासिद्ध्यर्थं त्वरितरुद्रजपमहं करिष्ये।

इति संकल्प्य पूर्वोक्तक्रमेण भूतशुद्धिं प्राणप्रतिष्ठा
मन्तर्मातृकाबहिर्मातृकान्यासं श्रीकण्ढकादिकलान्यासं च कृत्वा
षोडशोपचारैः शिवपूजां विप्राय रुद्रस्तवेन स्तुत्वा
त्वरितरुद्रविधानन्यासादिकं कुर्यात्।

तत्र मूलमन्त्रो यथ–ऊँ यो रुद्रोग्नौ योप्सु य औषधीषु यो रुद्रो विस्वा भुवना विवेश तस्मै रुद्राय नमोऽस्तु॥१॥

इत्येकत्रिंशद्वर्णो ३१ मन्त्रः।

अस्य त्वरितरुद्रमन्त्रस्य अथर्वणऋषिः अनुष्टुपृ छन्दः त्वरितरुद्रसज्ञको देवता नमः इति बीजम् अस्तु इति शक्तिः त्वरितरुद्रप्रीत्यर्थे जपे विनियोगः।

(तत्रादौ मूलेन करशुद्धिं कृत्वा प्रणवं करतलयोर्विन्यसेत्)

ऊँ अथर्वर्षये नमः शिरसि॥१॥

ऊँ अनुष्टुपृछन्दसे नमः मुखे॥२॥

ऊँ त्वरितरुद्रदेवतायै नमः हृदये॥३॥

ऊँ नमः इति बीजाय नमः गुह्ये॥४॥

ऊँ अस्तु शक्तये नमः पादयोः॥५॥

इति ऋष्यादिन्यासः॥

ऊँ यो रुद्र अङ्गुष्ठाभ्यां नमः॥११॥

ऊँ अग्नौ तर्जनीभ्यां नमः॥२॥

ऊँ योप्सु मध्यमाभ्यां नमः॥३॥

ऊँ य औषधीषु अनामिकाभ्यां नमः।।४।।

ऊँ यो रुद्रो विश्व भुवना विवेश कनिष्ठिकाभ्यां नमः।।५।।

ऊँ तस्मै रुद्राय नमोस्तु करतलकरपृष्ठाभ्यां नमः।।६।।

इति करन्यासः।

एवं हृदयादिन्यासः।

अथ पदन्यासः। ऊँ यः नमः पादयौः।।१।।

रुद्रः नमः जङ्धयोः।।२।।

अग्नौ नमः जानुनोः।।३।।

यः नमः ऊर्वोः।।४।।

अप्सु नमः गुल्फयोः।।५।।

यः नमः मेढ्रे।।६।।

औषधीषुनमः नाभौ।।७।।

यः नमः उदरे।।८।।

रुद्रः नमः हृदये।।९।।

विश्वा नमः कण्ठे।।१०।।

भुवना नमः मुखे।।११।।

विवेश नमः नासिकायाम्।।१२।।

तस्मै नमः नेत्रयोः।।१३।।

रुद्राय नमः भ्रवोः।।१४।।

नमः नमः ललाटे।।१५।।

अस्तु नमः शिरसि।।१६।।

अथ वर्णन्यासः

ऊँ यः शिरसि।।१।।

रुद्रः ललाटे॥२॥

अग्नौ नेत्रयोः॥३॥

यः कर्णयोः॥४॥

अप्सु नासिकायाम्॥५॥

यः मुखे॥६॥

औषधीषु बाह्वोः॥७॥

यः हृदये॥८॥

रुद्रः नाभौ॥९॥

विश्वा गुह्ये॥१०॥

भुवना अपाने॥११॥

विवेरा ऊर्वोः॥१२॥

तस्मै जान्वोः॥१३॥

रुद्राय जंघयोः॥१४॥

नमः गुल्फयोः॥१५॥

अस्तु चरणयोः॥१६॥

एवं पञ्च न्यासान्कृत्वा शुभदामुद्रां प्रदर्शयेत्।

(अङ्गुल्यग्राणि मूले तु कृत्वाङ्गुष्ठेन पीडयेत्॥

सा मुद्रा शुभदा प्रोक्ता सैव शान्तिप्रदायिनी॥१॥

मुद्रादर्शनमन्त्रः।

ॐ एषातेरुद्रभागः सहस्वस्त्रांबिकयातंजुषस्वस्वाहा।

इति मन्त्रेण मुद्रां दर्शयित्वा ध्यानं कुर्य्यात्॥

"रुद्रं चतुर्भुजं देवं त्रिनेत्रं वरदाभयम्॥

दधानमूर्ध्वहस्ताभ्यां शूलं डमरुमेव च॥१॥

अङ्कसंस्थामुमां पद्मे दधानां च करद्वये॥
आद्ये करद्वये कुम्भं मातुलुङ्गं च बिभ्रतीम्॥२॥
(अथवा) चतुर्बाहुं त्रिनेत्रं च शुद्धस्फटिकसन्निभम्॥
उगे कर्मणि चैवोग्रं मूर्तिं ध्यायेदुमापतिम्॥१॥
द्विभुजं नागपाशं च शूलपाणिं जटाधरम्॥
ध्यात्वैवं शंकरं पापान्मुच्यते मानसोद्भवात्॥२॥
(अथवा) चतुर्भुजं त्रिनेत्रं च शुद्धस्फटिक सन्निभम्।
अमृतेन च पूर्णौ द्वौ कलशौ हस्तयोर्द्वयोः॥१॥
हस्तद्वयेन योगस्य कृतमुद्रां स्थिरासनम्॥
सर्वकामप्रदं शान्तं शङ्करं करुणाकरण्॥२॥
उग्रकर्मणि चैवोग्रमूर्ति ध्यायेदुमापतिम्॥
द्विभुजं नागपाशं च शूलपाणिं जटाधरम्॥३॥

इति ध्यात्वा मानसोपचारैः संपूज्य भेदपक्षे गन्धादिपूजनं कुर्यात्। एवं पूजनं कृत्वा मूलमन्त्रं जपेत्॥ अस्य पुरश्चरणमयुतद्वयजपात्मकं कुर्यात्।

प्रत्यहं शिवं पूजयेत्।

अधः शय्येकभक्ताशी ब्रह्मचारी हविष्यभुक्॥
अयुते द्वे जपेत्पूर्वं प्रत्यहं पूजयेच्छिवम्॥१॥
जुहुयात्तद्दशांशेन तद्दशांशेन तर्पणम्॥
मार्जनं तद्दशांशेन दशांशेन तु भोजयेत्॥२॥
एवं कृते तु सिद्धिः स्यात्फलार्थे तु ततो जपेत्॥
पुरश्चरणमेवं तु कृत्वा संपूज्य शंकरम्॥३॥
जपेत्त्वरितरुद्रं तु सर्वकामसमृद्धये।
श्रीकामः शान्तिकामो वा जपेल्लक्षमतंद्रितः॥४॥

बिल्वसमिद्भिः श्रीकामः शान्तिकामः शमीमयैः॥

जुहुयादाज्यसंमिश्रैस्तर्पणं मार्जनं तथा॥५॥

जप्त्वा लक्षं तु पुत्रार्थी पायसं जुहयात्ततः॥

वित्तार्थी श्रीफलैर्होममायुष्कामस्तु दूर्वया॥६॥

तिलैराज्येन संमिश्रैस्तेजस्कामो घृतेन वै॥

व्रीहिभिः पशुकामस्तु राष्ट्रकामस्तु वै यवैः॥७॥

पायसं सर्वकामेन होतव्यं शर्करान्वितम्॥

मध्याक्तान्याम्रपत्राणि तीव्रज्वरविनाशिने॥८॥

हिमभूतज्वरेणैव गुडूचीभिर्हुनेद्ध्रुवम्॥

सर्वरोगविनाशय सूर्यस्याभिमुखो जपेत्॥९॥

अयुते द्वे जपे होमः काय्यौकेसमिधा शुभः॥

औदुम्बरैरन्नकामस्तेजस्कामस्तु खादिरैः॥१०॥

अपामार्ग समिद्धोमाद्भूतबाधा विनश्यति॥

ग्रहबाघाविनाशाय जपेदश्वत्थसन्निधो॥११॥

लवणान्वितदध्यक्तस्तीक्ष्णाग्राश्वत्थसंभवाः।

हूयन्ते समिधः शुष्काः स्वाहान्तं मन्त्रमुच्चरेत्॥१२॥

दशापश्चाहुतीर्हुत्वा गच्छगच्छेत्युदीरयेत्॥

यावद्धोमो बलिर्देयः पुरुषाहार संमितः॥१३॥

एवं कृते प्रमुच्येत पुमान् स्त्री वा महाग्रहात्॥

यं जेतुमिच्छेत्पुरुषस्तत्स्थानाभिमुखो जपेत्॥

जुहुयाच्छतपत्राणि स दुष्टः क्षयमाप्नुयात्॥१४॥

लाजाहोमेन कन्यार्थी कन्यामाप्रोति रूपिणीम्॥

लाजाश्च मधुसंमिश्राः श्वेतपुष्पाणि वा पुनः॥१५॥

हूयन्ते हरिते देशे तस्य शिश्ववशो भवेत्॥

वामाङ्गमुन्नतं कार्ये स्त्रीवशित्वे विचक्षणैः॥१६॥

हस्त्यश्वामात्यशान्त्यर्थे तिलैश्चाज्येन संयुतैः॥

होमस्थाने तु संस्थाप्य कुम्भमेकं कुम्भमेकं जलान्वितम्॥१७॥

मन्त्रं जप्त्वाष्टसाहस्त्रं कुम्भं स्पृश्य प्रयत्नतः॥

अभिषेकं तु तेषां वै शालां प्रोक्ष्य प्रदक्षिणम्॥१८॥

ग्रहग्रामादिशान्तिस्तु सर्वैः कार्या तु पूर्ववत्॥

वास्तुपूजा प्रकर्तव्या प्राच्यांदिशि पदे शुभे॥१९॥

ईशानाय बलिः कार्यः पशूनां पतये तथा॥

एवं कृते पशूनां तु प्रजानां शान्तिमाप्नुयात्॥२०॥

अद्भुतेषु च सर्वेषु निशायां ग्रामबाह्यतः॥

उपविश्य जपेद्रुद्रं त्वरितं बलिभिः सह॥२१॥

होमः पलाशासमिधैः कर्तव्यो घृतसंयुतैः॥

ईशानाय बलिः कर्य्यो यस्यां दिशि तदद्भुतम्॥२२॥

तदाशापतये चैव पशूनां पतये तथा॥

वृष्टिकामो जपेल्लक्षं खिलैर्होमो घृतान्वितैः॥२३॥

बलिपूजा प्रकर्तव्या शिवस्य वरुणस्य च॥

सर्वस्मिन्नपि चैवार्थे त्वरितस्य जपो भवेत्॥२४॥

अयुतद्वयजाप्यं तु यावल्लक्षं ततोधिकम्॥

एवं कृते तु सिद्धिः स्यान्निष्कामः प्राप्नुयाच्छिवम्॥२५॥

ऐहिकामुष्मिकान् भोगान् भुक्त्वा सायुज्यमाप्नुयात्॥

इति श्रीत्वरितरुद्रमन्त्रपुरश्चरणं समाप्तम्॥

अथ पार्थिवलिङ्गपूजन विधानम् (मन्त्रमहोदध्यादिषु)

तत्रादौ प्रातर्नित्यकर्म समाप्य सुमुहूर्त्ते पुण्यस्थाने वा गत्वा तत्र स्थानशुद्धिं संपाद्य स्वासने उदङ्मुख उपविश्य भस्मत्रिपुण्ड्ररुद्राक्षधारणं च कुर्यात्।

ततः ॐ नमः शिवाय इत्यनेनाचम्य प्राणनायम्य गाणपति स्मरणं कृत्वा देशकालौ संकीर्त्य अमुकगोत्रोमुकशर्मा मम श्रुतिस्मृतिपुराणोक्तफलावाप्तये अमुककामना-सिद्ध्यर्थं श्रीभवानीशङ्करप्रसन्नतार्थे पर्थिवलिङ्गपूजां करिष्ये।

अथवा अनुककामोमुकसंख्यया एतावन्तं कालं पर्थिवलिङ्गनि स्वयं ब्राह्मणद्वारा वा पूजयिष्ये तदङ्गतया भूतशुद्धिं प्राणप्रतिष्ठां मातृकन्यासादिकर्म च करिष्ये॥

इति संकल्प्य।

पृथ्वि त्वयेति मन्त्रस्य मेरुपृष्ठऋषिः।

सुतलं छन्दः। कूर्म्मो देवता।

आसनोपवेशने विनियोगः।

"ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता।

त्वं च धारय मां देवि पवित्रं कुरु चासनम्॥१॥"

इति भूमिं प्रार्थ्य। ॐ पृथिव्यै नमः॥

ॐ आधारशक्त्यै नमः॥

ॐ विश्वशक्त्यै नमः॥

ॐ चिच्छक्त्यै नमः । ॐ मायाशक्त्यै नमः॥

इति गन्धपुष्पैः पूजयेत। ततो मूलेन शिखां बध्वा आचम्य।

स्वात्मदृष्ट्यावलोकनेन दिव्यान् विघ्नान्।

अस्त्राय फट्।

इत्यभिमन्त्रितजलप्रक्षेपेणान्तरिक्षस्थान्॥

"ॐ अपसर्पन्तु ये भूता ये भूता भूमिसंस्थिताः॥

ये भूता विघ्नकर्तारस्तेनश्यन्तु शिवाज्ञया॥१॥

अपक्रामन्तु भूतनि पिशाचाः सर्वतो दिशम्॥

सर्वेषामविरोधेन ब्रह्मकर्म्म समारभे॥२॥

इति मन्त्राभ्यां वामपार्ष्णिघातत्रयेण भौमान्तरिक्षगान् विघ्नानुत्सारये।

ततः ॐ सर्वभूतनिवारकाय शार्ङ्गाय सशरास्त्रराजाय सुदर्शनाय हुं फट् इति छोटिकाभिस्तालत्रयेण च दिग्बन्धं विधाय ॐ अस्त्राय फट् इति करशुद्धिं कृत्वा।

ॐ गुरुभ्यो नमः। ॐ परमगुरुभयो नमः।

ॐ परमेष्ठिगुरुभ्यो नमः।

ॐ आचार्यगुरवे नमः।

ॐ नमो महद्भ्यः इति नत्वा भूत्तशुद्धिं कुर्यात्।

अथ भूतशुद्धिः॥ हृदयस्थं प्रदीपकलिकाकारं जीव ॐ हंसः सोहमिति मन्त्रेण ब्रह्माण्डस्थितसहस्त्रदलपद्मान्तर्गतशिवेन संयोज्य।

ॐ लँहाँ सद्योजाताप निवृत्तिकलात्मने हुं फट् इति पादादिजानुपर्यन्तं न्यसेत्॥

ॐ वँहीँ वामदेवाय प्रतिष्ठाकलात्मने हुं फट् इति जान्वादिनाभिपर्यतं॥२॥

ॐ रँहूँ अघोराय विद्याकलात्मने हुं फट् इति नाभ्यादिहृयांतं॥३॥

ॐ यंहै तत्पुरूषाय शान्तिकलात्मने हुं फट् इति हृदयादि भ्रूमध्यान्तं॥४॥

ॐ हँ हौं ईशानाय शान्त्यतीताय कलात्मने हुं फट् इति भ्रूमध्यादि ब्रह्मरन्ध्रान्तं च विन्यसेत्।

एवं भूतानि संचिन्त्य जन्मान्तरे दुःखप्रदं पापपुरुषमसद्वासनात्मकं वामकुक्षिस्थितं ॐ यँ इति वायुबीजं पूरके षोडशवारं जपित्वा विशोष्य ॐ रं इति वह्निबीजं कुम्भके चतुःषष्टिवारं जत्प्वा तं दहेत्।

ततः ॐ यँ इतिवायुबीजं रेचके द्वात्रिंशद्वारं जप्तेन तद्भस्म शरीराद्वहिर्निष्कास्य पुनः वँ इति षोडशधा सुधाबीजजप्तेन तद्भस्म संप्लाव्य लँ इति षोडशधा जप्तेन भूबीजेन घनीकृत्य कनकाण्डवत् विभाव्य नित्यशुद्धबुद्धमुक्तस्वभावं ब्रह्मैवाहमिति भावयेत्।

ततः ॐ हो ईशानाय नमः मूर्ध्नि॥१॥

ॐ है तत्पुरूषाय नमः मुखे॥२॥

ऊँ हुं अघोराय नमः हृदि।।३।।

ऊँ हिं वामदेवाय नमः गुह्ये।।४।।

हं सद्योजाताय नमः पादयोः।।५।।

इति न्यसेत्।

एवमुत्पन्ने देवात्मके देहे ब्रह्माण्डस्थितपरमात्मनः सकाशाज्जीवं हंसः सोहमिति हृदयमानीय स्वप्राणप्रतिष्ठां कुर्यात्।।

इति भूतशुद्धिः।।

अस्य प्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुरुद्राऋषयः ऋग्यजुःसामानि च्छन्दांसि।

प्रणाशक्तिर्देवता।

आँ बीजम्।

ह्री शक्तिः।

क्रौं कीलकम्।

स्वशरीरप्राणप्रतिष्ठापने विनियोगः।

ऊँ ब्रह्माविष्णुरुद्रऋषिभ्यो नमः शिरसि।

ऊँ ऋग्यजुःसामच्छंदोभ्यो नमः मुखे।

ऊँ प्राणशक्त्यै देवतायै नमः ह्रदये।

ऊँ आँ बीजाय नमः गुह्ये।

ऊँ ह्री शक्त्यै नमः पादयोः।

ऊँ क्रौ कीलकाय नमः सर्वाङ्गे।।

इति ऋष्यादिन्यासः।।

ऊँ ह्राँआँअँकँखँगँघँङँआँआकाशवायुतेजोजलपृथिव्यात्मने आँ अङ्गुष्ठाभ्यां नमः।।

ऊँ ह्रीइँचँजँझँञँ ई शँब्दस्पर्शरूपरसगन्धात्मने ईं तर्जनीभ्यां नमः।

ऊँ ह्रूँऊँटँठँडँढँणँऊँ श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मने ऊँ मध्यमाभ्यां नमः।।

ॐ ह्रैएतँथँदँधँनँए वाक्पाणिपादपायूपस्थात्मने ऐं अनामिकाभ्यां नमः।।

ॐ ह्रौंऔंपँफँबँभँमँऔं वचनादानगतिविसर्गानन्दात्मने औं कनिष्ठिकाभ्यां नमः।।

ह्रः आंयँरँलँवँशँषँसँहँळँक्षँअँ मनोबुद्ध्यहंकारचित्तज्ञानात्मने अः करतलकरपृष्ठाभ्यां नमः।।

इति करन्यासः।।

ततः एवं हृदयादिन्यासं कुर्यात्।।

ॐ ह्राँ अँ कँ।।१९।।

हृदयाय नमः।।१।।

ॐ ह्री इँचँ।।१७।।

ई शिरसे स्वाहा।।२।।

ॐ ह्रूँऊँटँ।।१७।।

शिखायै वषट्।।३।।

ॐ ह्रैऐतँ।।१७।।

ऐ कवचायहुम्।।४।

ॐ ह्रौ औ पँ।।१९।।

औं नेत्रत्रयाय वौषट्।।५।।

ॐ ह्रः आंयँ।।२४।।

अँ अस्त्राय फट्।।६।।

इति हृदयादिन्यासः।।

अथ ध्यानम्।

रक्ताम्भोधिस्थपोतोल्लसदरुणसरोजाधिरुढाकरब्जैः पाशं
कोदण्डमिक्षूद्भवमणिगणमयङ्कुशं पञ्चबाणान्।।

बिभ्राणासृक्कपालं त्रिनयनलसिता पीनवक्षोरुहाढ्या देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा नः।।१।।

इति ध्यात्वा स्वहृदि करं निधाय ऊँ आँह्रींक्रौंयँरँलँवँशँषँसँहौहंसः मम प्राणा इह प्राणाः॥१॥

ऊँ आँह्रीक्रीयँरँ मम जीव इह स्थितः॥२॥

ऊँ आँह्रींक्रौं यँ मम सर्वेन्द्रियाणि वाङ्मनश्चक्षुःश्रोत्र जिह्वाघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा॥३॥

इति वारत्रयं पठित्वा पञ्चदशप्रणवावृत्तीः कृत्वा क्रमेण मम संस्कारा जाता इति भावयेत्।

इति प्राणप्रतिष्ठां कृत्वा ततः पूर्वोक्तपद्धतिकाण्डोक्तमन्तर्मातृकाबहिर्मातृकान्यासं च कृत्वा पञ्चाक्षरौदितं श्रीकण्ठादिकलान्यासं च कुर्यात्।

एवं न्यासं कृत्वा सूर्यायार्घ्यं दत्त्वा।

ऊँ सर्वाधारधरे देवि त्वद्रूपां मृत्तिकमिमाम्॥

ग्रहिष्यामि प्रसन्न त्वं लिङ्गार्थं भव सुप्रभे॥१॥

इतिभूमिं प्रार्थ्य।

ऊँ ह्लां पृथिव्यै नमः। इति षडर्णेनाभिमन्त्र्य।

उद्धृतासि वराहेण कृष्णेन शतबाहुना॥

मृत्तिके त्वां च गृह्णामि प्रजया च धनेन च॥१॥

ऊँ हराय नमः। इतिशुचिस्थानात् (पाषाणवेणुकी टकेशास्थिवालुकादिदोषरहितामीशानकोणगताम्) मृदं शस्त्रेणोत्कीर्य सुस्निग्धां शुभ्रां मृदमादाय निःशर्करां कृत्वा प्रत्यहं पूजनाय संशुद्धे ताम्रादिपात्रे निदध्यात्। ततस्तां दृष्ट्यावलोकनेन सशोध्य।

ऊँ (वँ) इति अमृतबीजेनाभिमन्त्रितजलप्रक्षेपेण संपीड्य।

तेन पिण्डं कृत्वा तस्मात्पिण्डादल्पां मृदमादाय ऊँ ह्रीं ग्लौं गंगणपतयेग्लौं गं ह्री इत्येकादशा ११ क्षरमन्त्रेण बालगणेश्वरं वराभयलसत्पाणिपद्मं निर्माय ततः महेश्वराय नमः।

इति मनोहरं लिङ्गमङ्गुष्ठादिदशांगुलान्तं संघट्टनं विधाय एवमन्यान्यपि लिङ्गानि यथा संकल्पितानि कृत्वा अवशिष्टमृदा ऊँ ऊँ ऐ हुँ क्षँक्लीं कुमाराय नमः।

इति दशाक्षरमन्त्रेण षणमुखं कुमारं च कृत्वा पङ्क्त्यन्ते स्थापयेत्।

तावत् पीठपूजा।

पीठं जलेन प्रोक्ष्य तत्र पूर्वदिदिक्षु ॐ वामायै नमः।।१।।

ॐ ज्येष्ठायै नमः।।२।।

ॐ रौद्रयै नमः।।३।।

काव्यै नमः।।४।।

ॐ कलविकरण्यै नमः।।५।।

ॐ बलविकरण्यै नमः।।६।।

ॐ बलप्रमथिन्यै नमः।।७।।

ॐ सर्वभूतदमन्यैः नमः।।८।। (मध्यै)

मनोन्मन्यै नमः।।९।।

इति पीठसाक्तीः संपूज्य।

ॐ नमो भगवते सकलगुणात्मशक्तियुक्तायानन्ताय योगपीठात्मने नमः इति पुष्पञ्जलिना आसनं दत्त्वा तत्र स्वपुरतः ॐ शूलपाणये नमः इति पीठमध्ये संस्थापयेत्।

ततः आचम्य प्राणनायम्य ॐ अस्य श्रीसदाशिवमन्त्रस्य वामदेव ऋषिः।

पंक्तिश्छन्दः श्रीसदााशिवो देवता।

ॐ बीजम्। नमः शाक्तिः।

शिवाय कीलकं मम साम्बसदाशिवप्रीत्यर्थे पार्थिवलिङ्गपूजने विनियोगः।।

ॐ वामदेवऋषये नमः शिरसि।।१।।

ॐ पंक्तिच्छन्दसे नमः मुखे।।२।।

ॐ श्रीसदाशिवदेवतायै नमः हृदये।।३।।

ॐ बीजाय नमः गुह्ये।।४।।

ॐ शक्तये नमः पादयोः।।५।।

ॐ शिवाय कीलकाय नमः सर्वाङ्गे॥६॥

इति ऋष्यादिन्यासः।

ॐ अङ्गुष्टाभ्यां नमः॥१॥

ॐ नं तर्जनीभ्यां नमः॥२॥

ॐ मं मध्यमाभ्यां नमः॥३॥

ॐ शिं अनामिकाभ्यां नमः॥४॥

ॐ वां कनिष्ठिकाभ्यां नमः॥५॥

ॐ यं करतलकरपृष्ठाभ्यां नमः॥६॥

इति करन्यासः॥

एवँ हृदयादिषडङ्गन्यासं कुर्यात्।

ॐ नं तत्पुरुषाय नमो हृदये॥१॥

ॐ मं अघोराय नमः पादयोः॥२॥

ॐ शिं सद्योजाताय नमो गुह्ये॥३॥

ॐ वां वामदेवाय नमो मूर्ध्नि॥४॥

ॐ यं ईशानाय नमो मुखे॥५॥

एवं न्यासविधिं कृत्वा ध्यायेत्।

अथ ध्यानम्॥

ॐ ध्याये नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम्॥

पद्मासीनं समन्तात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं विश्वाद्यं विस्ववन्द्यं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम्॥१॥

इति ध्यात्वा मानसोपचारैः संपूज्य प्राणप्रतिष्ठां कुर्यात्।

अस्य श्रीप्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः ऋग्यजुःसामानि छन्दांसि क्रियामयवपुः प्राणख्या देवता।

आं बीजम्। ह्री शक्तिः। क्रौं कीलकम् देवे प्राणप्रतिष्ठापने विनियोगः ॐ ब्रह्मविष्णुरुद्रऋषिभ्यो नमः शिरसि॥१॥

ॐ ऋग्यजुःसामच्छन्दोभ्यो नमो मुरवे॥२॥

ॐ प्राणाख्यदेवतायै नमः हृदि॥३॥

ॐ आँ बीजाय नमो गुह्ये॥४॥

ॐ ह्री शक्तये नमः पादयोः॥५॥

ॐ क्रौं कीलकाय नमः सर्वाङ्गे इति कृत्वा।

ॐ आँह्रीक्रौयँरँलँवँशँषँसँहँसः सोहं शिवस्य प्राणा इह प्राणाः॥१॥

ॐ आँह्रौक्रौयँरँलँवँशाँषँसँहँसः सोहं शिवस्य जीव इह स्थितः॥२॥

आँह्रौक्रौंयँरँलँवँशँषँसँहँसः सोह शिवस्य सर्वेन्द्रियाणि वाङ्मनस्त्वक्चक्षुशश्रोत्र-घ्राणजिह्वापाणिपादपायूपस्थानि इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा॥३॥

एव प्राणपतिष्ठां कृत्वा ध्यायेत्बिभ्रद्दोर्भि कुठारं मृगमभयवरौ सुप्रसन्नो महेशः सर्वालङ्करदीप्तः सरसिजनिलयो व्याघ्रचर्मात्तवासाः।

ध्येयो मुक्ताङ्गरागामृतरसकणिकाद्रिप्रभः पञ्चवक्त्र स्त्र्यक्षः कोटीरकोट्युच्चटितहिमरुचिः सर्वदा चन्द्रमौलिः॥

इति ध्यात्वा नमस्कारं कुर्यात्।

तद्यथा-नमोस्तु स्थाणुरूपाय ज्योतिर्लिङ्गमृतात्मने॥

चतुर्मूर्तेश्च पुंछायाभासिताङ्गाय शंभवे॥२॥

सर्वज्ञज्ञानविज्ञानप्रदानैकमहात्मने॥

नमस्ते देवदेवेश सर्वभूतहितेरत॥२॥

अनन्तकान्तिसंपन्न अनन्तासनसंस्थित॥

अनन्तन्तिसंभोग परकान्त नमोस्तु ते॥३॥

वज्ररूप महारूप सर्वरूपोत्तमोत्तम॥

पशुपाशार्णवासीन दृढव्रत नमोस्तुते॥४॥

स्वभावनिर्मलाकार सर्वोपाधिविनाशन॥

योगियोगिन्महायोग योगीश्वर नमोस्तु ते॥५॥

इतिनत्वा स्थापितं लिङ्गं स्पृशन् ऊँ भूः पुरूषं साम्बसदाशिवमावाहयामि॥१॥

ऊँ भुवः पुरुषं साम्बसदाशिवमावाहयामि॥२॥

ऊँ स्वः पुरुषं साम्बसदाशिवमावाहयामि॥३॥

इत्यावाह्य। ऊँ स्वामिन्सर्वजगन्नाथ यावत्पूजावसानकम्॥

तावत्त्वं प्रीतिभावेन लिङ्गेस्मिन्सन्निधो भव॥१॥

इति पुष्पाञ्जलिं दत्त्वा ऊँ ह्रीं ग्लौ गं गणपतये ग्लौ गं ह्रीं॥११॥

इत्येकादशार्णमन्त्रेण गणपतिं संपूज्य ऊँ ऐं हुँ क्षुँ क्ली कुमाराय नमः॥१०॥

इति दशाक्षरमन्त्रेण स्कन्दं पूजयेत्॥३॥

अथ शिवपूजनम्॥ तत्रादौ ध्यानम्। दक्षाङ्कस्थं गणपतिमुखं प्रामृशन्दक्षदोष्णा
वामोरुस्थां नगपतनयाङ्के गुहं चापरेण॥

इ्द्याभीती परकरयुगे धारयन्निन्दुकान्तिरव्याद स्मास्त्रिभुवननतो नीलकठस्त्रिनेत्रः॥१॥

एवं ध्यात्वा ऊँ नमोस्तुनीलग्रीवायसहस्त्राक्षाय मीढुषे
अथोयेअस्यसत्वानोहंतेभ्योंकरन्नमंः॥१॥

श्रीसाम्बसदाशिवाय नमः पाद्यं समर्पयामि

इति पाद्यं दद्यात्॥१॥

ऊँ गायत्रीत्रिष्टुबूजगंत्यनुष्टुप्पंक्त्यासुह॥

बृहत्युष्णिहांककुप्सूचीभिः शम्यन्तु त्वा॥

ऊँ सांबसदाशिवाय नमः।

अर्घ्यं समर्पयामि इत्यघर्यमू॥२॥

ऊँ त्र्यंबकंयजामहेसुगुंधिम्पुष्टिवर्धनम्॥

उर्वारुकमिवबंधनान्मृत्योर्मुक्षीयमामृतात्॥

ऊँ सांबसदाशिवाय नमः आचमनं सः इत्याचमनम्॥३॥

ॐ मधुवाताऋतायते: इति मधुपर्कम्॥४॥

ॐ सांबसदशिवाय नमः इत्याचमनीयम्॥५॥

ॐ यरुणस्योत्तंभेनमसि वरुणस्यस्कंभसर्ज्जनीस्थोवरुणस्यऋतसदन्यसिवरुणस्य ऋतसदनमसिवरुणस्यऋतसदनमासीद॥६॥

ॐ सांबसदाशिवाय नमः जलस्त्रानं सः

इति जलस्त्रानम्॥६॥

ॐ पयः पृथिव्यांपय ओषधीषुपयोंदिव्यंतरिक्षेपयोधाः॥

पयंस्वतीः प्रदिशः संतुमह्यम्॥

ॐ सांबसदाशिवाय नमः पयःस्नानं सः।

इति पयः स्नानम्॥७॥

ॐ दक्षिक्राव्णों अकारिषंजिष्णोरश्वस्यवाजिनः॥

सुरभिनोमुरवाकरत्प्रणआयूंगूं षितारिषत्॥

ॐ सांबसदाशिवाय नमः।

दधिस्नानं सः।

इति दधिस्नानं पुनर्जलस्नानम्॥८॥

ॐ घृतं घृंतपावानःपिबतवसांवसापावानः पिबतांतरिक्षस्यहविरंसिस्वाहांदिशः-प्रदिशआदिशादिश उद्दिर्शोदिग्भ्भः स्वाहा।

ॐ सांबसदाशिवाय नमः घृतरस्नानं समर्पयामि।

इति घृतस्नानं पुनर्जलस्नानम्॥९॥

ॐ मधुवातांऋतायतेमधुक्षरंतिसिंधवः माध्वीर्न्नः संत्वोष धीःमधुनक्तमुतोष-सोमधुंमत्पार्थिवगूं रजः मधुजःरस्तुनः पितामधुमान्नोवनंस्पतिर्मधुमाँ अस्तुसूर्यः माध्वीर्गावोभवंतुनः॥

ॐ सांबसदाशिवाय नमः मधुस्नानं सः।

इति मधुस्नानं सः।

इति मधुस्नानं पुनर्जलस्नानम्॥१०॥

ॐ आपारसमुद्वंयसगृंसूर्य्येसन्तगृं समाहिंतम्।।

आपागृंरसंस्ययोरसस्तंर्वोगृह्णम्युत्तममुपयामगृहीतोसीन्द्रा यत्वाजुष्टं गृह्णाम्येषतेयोनिरिन्द्रा यत्वाजुष्टतममू।।

ॐ सांबसदाशिवायनमः शर्करोदकस्नानं सः इति शर्करोदकस्नानं पुनर्जलस्नानम्।।११।।

ॐ पंचनद्यः संरस्वतीमर्पियन्तिसस्त्रोतसः।।

ॐ सांबसदाशिवायनमः पंचामृतस्नानं सः इति पञ्चामृतस्नानम्।।१२।।

ॐ शुद्धवांलःसर्वशुद्धंवालोमणिवालस्तआश्रिनाः श्येतः स्येताक्षोरुणस्तेरुद्राय पशुपतयेकणाषामा अवलिप्तारौद्रानभोंरूपः पःपार्जन्याः।।

ॐ सांबसदााशिवाय नमः शुद्धोदकस्नानं सः।

इति शुद्धोदकस्नानम्।।१३।।

ततः स्नानांते ॐ नमोरुद्र इति षोडशभिऋग्भिः अभिषेकं कुर्यात्।।

ततः ॐ प्रमुञ्चधन्वनस्त्वमुभयोरात्न्योंर्ज्याम्।।

याश्चतेहस्तइषवः पराताभगवोवप।।

ॐ सांबसदाशिवायनमः वस्त्रं कौपीनं स।

इति वस्त्रकौपीनम्।।१४।।

ॐ विज्यंधनुः कपर्दिनोविशल्यो बाणंवागृंउत।।

अनेशन्नस्यवाइषव आभुरस्यनिषंगतिः।।

ॐ सांबसदाशिवाय नमः आभरणं सः इत्याभरणम्।।१५।।

ॐ ब्रह्मजज्ञानं प्रथमंपुरस्ताद्विसीमतः सुरुचोवेन आवः सबुध्न्या उपमा अंस्यविष्ठाः सतश्चायोनिमसंतश्चविवः।।

ॐ सांबसदाशिवाय नमः यज्ञोपवीतं समर्पयामि इति यज्ञोपवीतम्।।१६।।

आचामनं दद्याद्।।

ॐ नमः श्वभ्यःश्वपतिभ्यश्चवोनमोनमोभवायच रुद्रायचनमः शर्वायचपशुपतयेचन-

मोनीलग्रीवाय चशितिकण्ठायचनमः कपर्दिने॥

ॐ सांबसदाशिवाय नमः गन्धं सः।

इति गंधम्॥१७॥

नमः शम्भवायचमयोभवायचनमः शङ्करायचमयस्करायचनमः शिवायचशिवत-रायच॥

ॐ सांबसदशिवाय नमः अक्षतान् सः।

इत्यक्षताः॥१८॥

नमः पार्य्यायचवार्य्यायचनमः प्रतरणाय चोत्तरणाय चनमस्तीर्थ्यायचकूल्याचयनमः शप्यायचफेन्यायचनमः॥

ॐ सांबसदशिवाय नमः पुष्पं समर्पयामि।

इति पुष्पाणि॥१९॥

ॐ नमोबिल्मिनेचकवचिनेचनमो वर्मिणेचवरूथिनेचनमः॥

श्रुतायचश्रुतसेनायचनमोदुन्दुभ्याय चाहनन्यायचनमोधृष्णवे॥

ॐ साम्बसदाशिवाय नमः बिल्वपत्रं सः।

इति बिल्पत्राणि॥२०॥

ॐ काण्डात्कात्प्ररोहन्ती परुषः परुषस्परि॥

एवानोदूर्वेप्रतनुसहस्त्रेणशतेनं च॥

ॐ सांबसदाशिवाय नमः दूर्वौ सः।

इति दूर्वाम्॥२१॥

एवं पुष्पांतपूजां कृत्वा आवरणार्चनं कुर्यात्॥

तद्यथा।

ॐ अघोराय नमः॥१॥

ॐ पशुपतये नमः॥२॥

ॐ शिवाय नमः॥३॥

ॐ विरूपाय नमः॥४॥

ॐ विश्वरूपाय नमः॥५॥

ॐ भैरवाय नमः॥६॥

ॐ त्र्यम्बकाय नमः॥७॥

ॐ शूलपाणये नमः॥८॥

ॐ कपर्दिने नमः॥९॥

ॐ ईशानाय नमः॥१०॥

ॐ महेशाय नमः॥११॥

इत्येकादश रुद्रान् संपूज्य ततः ॐ भगवत्यै नमः॥१॥

ॐ उमादेव्यै नमः॥२॥

ॐ शंकरप्रियायै नमः॥३॥

ॐ पार्वत्यै नमः॥४॥

ॐ गौर्यै नमः॥५॥

ॐ कालिन्द्यै नमः॥६॥

ॐ काटिव्यै नमः॥७॥

ॐ विश्वधारिण्यै नमः॥८॥

ॐ विश्वेश्वर्यै नमः॥९॥

ॐ विश्वमात्रे नमः॥१०॥

ॐ शिवायै नमः॥११॥

इति शक्तीः पूजयेत्।

एवं सगणं रुद्रं संपूज्य वेद्यामष्टमूर्तीः अक्षतादिना पूजयेत्।

तद्यथा।

प्राच्याम् ॐ शर्वाय क्षितिमूर्तये नमः॥१॥

इशान्याम् ऊँ भवाय जलमूर्तये नमः।।२।।

उदीच्याम् ऊँ रुद्रायाग्निमूर्तये नमः।।३।।

वायव्याम् ऊँ उग्राय वायुमूर्तये नमः।।४।।

प्रतीच्याम् ऊँ भीमायाकाशमूर्तये नमः।।५।।

नैर्ऋत्याम् ऊँ पशुपतये यजमानमूर्तये नमः।।६।।

दक्षिणस्याम् ऊँ महादेवाय सोममूर्तये नमः।।७।।

आग्नेय्याम् ऊँ ईशानाय सूर्यमूर्तये नमः।।८।।

इति संपूज्य प्रणालिकायां ह्रीं उमायै नमः इति पूजयेत्।

तद्बहिः पूर्वादिषु इन्द्रादिदशदिक्पालान् संपूजयेत्।।

इत्यावरणपूजा।।

ततः ऊँ नमः कपर्दिने चव्युप्तकेशायचनमः सहस्त्राक्षायचशतधन्वनेचन-मोगिरिशायच शिपिविष्टायचनमोमीढुष्टमायचेषुमतेचनमोह्रस्वाय।।

ऊँ साङ्गाय साम्बसदाशिवाय नमः धूपं स इति धूपम्।।२२।।

ऊँ नमआशवेचाजिरायचनमःशीभ्यायचनम ऊर्म्याय
चावस्वन्यायचन-मोनादेयायचद्वीप्यायच।।

ऊँ साङ्गाय साम्बसदाशिवाय नमः दीपं स इति दीपम्।।२३।।

ऊँ नमोज्येष्ठायचकनिष्ठायचनमःपूर्वजायचापर जायचनमोमध्यमायचापगल्भाय-चनमोजघन्यायचबुध्न्यायचनमः सोभ्याय।।

ऊँ साङ्गाय साम्बसदाशिवाय नमः नैवेद्यंसमर्पयामि।

इति नैवेद्यम्।।२४।।

ऊँ त्र्यंबकं यजामहेसुगंधिम्पुष्टिवर्द्धनम्।।

उर्वारुकमिवबंधनान्मृत्योर्मुक्षीयमामृतात्।।

ऊँ साङ्गाय साम्बसदाशिवाय नमः आचमनीयं समर्पयामि।।

इत्याचमनम्।।२५।।

ॐ इमारुद्रायतवसेकपर्दिनेक्षयद्वींरायप्रभंरामहेमती:।।

यथाशमसद्विपदेचतुष्पदे विश्वम्पुष्टंग्रामे अस्मिन्ननातुरम्।।

ॐ साङ्गाय साम्बसदाशिवाय ताम्बूलम् स।

इति ताम्बूलम्।।२६।।

ॐ श्रीश्चते लक्ष्मीश्च ॐ साङ्गाय साम्बसदशिवाय नमः ऋतुफलं स।
इति ऋतुफलम्।।२७।।

ॐ हिरण्यगर्भःसमवर्तताग्रेभूतस्यजातः पतिरेकआसीत् सदाधारपृथिवींद्यामुतेमांकस्मै देवाय हविषाविधेम।।

ॐ साङ्गाय साम्बसदाशिवाय नमः दक्षिणां समर्पयामि।।

इति दक्षिणाम्।।२८।।

एवं संपूज्य साक्षतजलेन तर्पणं कार्यम्।।

ॐ भवं देवं तर्पयामि।।१।।

ॐ शर्वं देवं तर्पयामि।।२।।

ॐ ईशानं देवं तर्पयामि।।३।।

ॐ पशुपतिं देवं तर्पयामि।।४।।

ॐ उग्रं देवं तर्पयामि।।५।।

ॐ रुद्रं देवं तर्पयामि।।६।।

ॐ भीमं देवं तर्पयामि।।७।।

ॐ महान्तं देवं तर्पयामि।।८।।

ॐ भवस्य देवस्यपत्नी तर्पयामि।।१।।

ॐ शर्वस्य देवस्य पत्नी तर्पयामि।।२।।

ॐ ईशानस्य देवस्य पत्नी तर्पयामि।।३।।

ॐ पशुपतेर्देवस्य पत्नीं तर्पयामि।।४।।

ॐ उग्रस्य देवस्य पत्नीं तर्पयामि।।५।।

ॐ रुद्रस्य देवस्य पत्नीं तर्पयामि॥६॥

ॐ भीमस्य देवस्य पत्नीं तर्पयामि॥७॥

ॐ महतो देवस्य पत्नीं तर्पयामि॥८॥

एवं तर्पणं कृत्वा कर्पूरगर्भिताभिरेकादशवर्तिकाभिः कुर्पू रेण वा आरार्तिक्रं कुर्यात्॥

तत्र नीराजनम् ॐ कर्पूरगौरं करुणावतारं संसारसारं भुजगेन्द्रहारम्॥

सदा वसन्तं हृदयारविन्दे भवं भवानीसहितं नममि॥१॥

वन्दे देवमुमापतिं सुरगुरुं वन्दे जगात्कारणं वन्दे पन्नगभूषणं मृगधरं वन्दे पशूनां पतिम्॥

वन्दे सूर्यशशाङ्कवाह्निनयनं वन्दे मुकुन्दप्रियं वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शङ्करम्॥२॥

शान्तं पद्मासनस्थं शशधरमुकुटं पंचवक्त्रं त्रिनेत्रं शूलं वज्रं च खङ्ग परशुमभयदं दक्षभागे वहन्तम्॥

नागं पाशं च घण्टां डमरुकसहितं साङ्कुशं वामभागे नानालंकारयुक्तं स्फटिकमणिनिभं पार्वतीशं नमामि॥३॥

अथ शिवनीराजनम्॥

जय गङ्गाधर हर जय गिरिजाधीश॥

त्वं मां पालय नित्यं कृपया जगदीशा।

हर हर हर महादेव॥१॥

कैलासे गिरिशिखरे कल्पद्रुमविपिने गुञ्जति मधुकरपुञ्जे कुञ्जवने सुघने॥

कोकिलकूजतखेलतहंसावनललिता॥

रचयति कलाकलापं नृत्यतिमुदसहिता॥

हर हर हर महादेव॥२॥

तस्मिन् ललितसुदेशे शाला मणिरचिता॥

तन्मध्ये हरनिकटे गौरी मुदसहिता॥

क्रीडा रचयति बूषररंजितनिजमीशम्।

इन्द्रादिकसुरसेवित नामयते शीशम्॥

हर हर हर महादेव॥३॥

विबुधवधू बहु नृत्यति हृदये मुदसहिता॥

किन्नरगायन कुरुते सप्तस्वरसहिता॥

धिनकत थैथै धिनकत मृदङ्ग वादयते।

क्वणक्वण ललिता वेणुं मधुरं नादयते॥

हर हर हर महादेव॥४॥

रुणरुण चरणे चरयति नूपुरमुज्वलिता।

चक्रावर्ते भ्रमयति कुरुते तां धिकताम्॥

तांतांलुपचुपतांतांवादयते।

अङ्गुष्ठाङ्गुलिनादं लासक्तां कुरुते॥

हर हर हर महादेव॥५॥

कर्पूरद्युतिगौरं पंचाननसहितम्।

त्रिनयनशशिधरमौलिं विषधरकण्ठयुतम्।

सुन्दरजटाकलापं पावकयुतभालम्।

डमरत्रिशूलपिनाकं करधृतनृकपालम्॥

हर हर हर महादेव॥६॥

मुण्डै रचयति माला पन्नगमुपवीतम्।

वामविभागे गिरिजारूपं अति ललितम्।

सुन्दरसकलशरीरे कृतभस्माभरणम्।

इति वृषभध्वजरूपं तापत्रयहरणम्।

हर हर हर महादेव॥७॥

शंखनिनादं कृत्वा झल्लरि नादयते।

नीराजयते ब्रह्मा वेदऋचां पठते।

अतिमृदुचरणसरोजं हृदिकमले धृत्वा।

अवलोकयति महेशं ईशं अभिनत्वा॥

हर हर हर महादेव॥८॥

ध्यानं आरतिसमये हृदये अति कृत्वा॥

रमस्त्रिजटानाथं ईशं अभिनत्वा॥

सङ्गितमेवं प्रतिदिनपठनं यः कुरुते।

शिवसायुज्यं गच्छति भक्त्या यः श्रृणुते॥

हर हर हर महादेव॥९॥

इति नीराजनम्॥ प्रदक्षिणा॥

ॐ येतीर्थानिप्रचरंतिसृकाहस्तानिषङ्गिणः।

तेषागुंसहस्त्रयोजनेवधन्वानि तन्मसि॥१॥

यानि कानि च पापानि जन्मांतरकृतानि च॥

तानि सर्वाणि नयन्तु प्रदक्षिणपदे पदे॥

ॐ साम्बसदाशिवाय नमः प्रदक्षिण समर्पयामीति प्रदक्षिणत्रयं कुर्यात् (शिवरहस्ये) प्रदक्षिणत्रयं कुर्य्यात्तथा पञ्च दशाथवा॥

प्रदक्षिणत्रयान्यूनं नैव कार्ये महेश्वरे॥१॥

पूजां कृत्वा तु यः शम्भोर्न करोति प्रदक्षिणम्॥

सा पूजा निष्फला ज्ञेया पूजकः स च दाम्भिकः॥२॥

भक्त्या करोति यः सम्यक् केवलं तु प्रदक्षिणम्॥

पूजा सर्वा कृता तेन स सम्यक् शिवपूजकः॥३॥

अथ पुष्पाञ्जलिमन्त्राः॥

ॐ यज्ञेनयज्ञमयजन्तदेवास्तानिधर्माणिप्रथमान्यासन्॥

तेहनाकम्महिमानःसचन्तयत्रपूर्वेसाध्याःसन्तिदेवाः॥१॥

ॐ साङ्गाय साम्बसदाशिवाय नमः मन्त्रपुष्पाञ्जलिं समर्पयामि।

इति पुष्पाञ्जलिं दत्त्वा।

"ॐ प्रपन्नं पाहि मामीश भीतं मृत्युग्रहार्णवात्।

इति साष्टाङ्गं प्रणामं कुर्यात्।

ततो यथाशक्ति पञ्चाक्षरमन्त्रं जपित्वा।

गुह्यातिगुह्य इति मन्त्रेण जपं समर्प्य।

क्षमापराधमहिमप्रभृतिपुराणैः प्राकृतैश्च स्तवैः स्तुत्वा देवं प्रार्थयेत्॥

ॐ अङ्गहीनं क्रियाहीनं विधिहीनं महेश्वर॥

पूजितोसि मया देव तत् क्षमस्व भ्रमात्कृतम्॥१॥

यद्यप्युपहतैः पुष्पैरपास्तैर्भावदूषितैः॥

केशकीटापविद्धैश्च पूजितोसि मया प्रभो॥२॥

अन्यत्रासक्तचित्तेन क्रियाहीनेन वा प्रभो॥

मनोवाक्कायदुष्टेन पूजितोसि त्रिलोचन॥३॥

यच्चोपहतपात्रेण कृतमर्घ्यादिकं मया॥

तामसेन च भावेन तत्क्षमस्व मम प्रभो॥४॥

मन्त्रणाक्षरहीनेन पुष्पेण विफलेन च॥

पूजितोसि महादेव तत्सर्वंक्षम्यतां मम॥५॥

व्रतं संपूर्णतां यातु फलं चाक्षयमश्नुते॥

अज्ञानयोगादुपचारकर्म यत्पूर्वमस्माभिरनुष्ठितं ते॥

तदेव सोद्वासनकं दयालो पितेव पुत्रान्प्रतनो जुषस्व॥६॥

अयं दानकालस्त्वहं दानपात्रं भवानेव दाता त्वदन्यं न याचे॥

भवद्भक्तिमन्तः स्थिरां देहि मह्यं कृपाशील शम्भो कृतार्थोसि यस्मात्॥७॥

ॐ नमओंकाररूपाय नमोक्षरवपुर्धृते॥

नमो नादात्मने तुभ्यं नमो बिन्दुकलात्मने॥८॥

अलिङ्गलिङ्गरूपाय रूपातीताय ते नमः॥

त्वं माता सर्वलोकानां त्वमेव जगतः पिता॥९॥

त्वां भ्राता त्वं सुहृन्मित्रं त्वं प्रियः प्रियरूपधृक्॥

त्वं गुरुस्त्वं गतिः साक्षात्त्वं पिता त्वं पितामहः॥१०॥

नमस्ते भगवन् रुद्र भास्करामिततेजसे॥

नमो भवाय रुद्राय रसायाम्बुमयाय च॥११॥

शर्वाय क्षितिरूपाय सदासुरमिणे नमः॥

पशूनां पतये तुभ्यं पावकामिततेजसे॥१२॥

भीमाय व्योमरूपाय शब्दमात्राय ते नमः॥

महादेवाय सोमाय अमृताय नमोस्तु ते॥१३॥

उग्राय यजमानाय नमस्ते कर्मयोगिने॥

पर्थिवस्य च लिङ्गस्य यन्मया पूजनं कृतम्॥१४॥

तेन मे भगवान् रुद्रो वाञ्छितार्थं प्रयच्छतु॥

इति प्रार्थ्य॥

अर्घ्योदकमादाय ॐ इतः पूर्व प्राणबुद्धिदेहधर्माधिकारतो जाग्रत्स्वन्पसुषुप्त्यवस्थासु मनसा वाचा कर्म्मणा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत्कृतं यदुक्तं तत्सर्वं ब्रह्मार्पणं भवतु इति पठित्वा देवस्य चरणयोः क्षिपेत्॥

ततः ॐ साधु वासाधु वा कर्म्म यद्यदाचरितं मया॥

तत्सर्वं कृपया देव गृहाणाराधनं मम॥१॥

इत्यर्घ्यजलं किंचिद्देवोपरि निक्षिप्य।

पुष्पांजलिमादाय "ॐ रशिमरूपा महादेवा अत्र पूजितदेवताः॥

सदा शिवाङ्गलीनास्ताः सर्वाः सुखावहाः"॥१॥

इति देवोपरि निक्षिप्य।

तेजोरूपं ध्यात्वा।

ॐ गच्छ गच्छ परं स्थानं स्वस्थानं परमेश्वर॥

पत्र ब्रह्मादयो देवा न विदुः परमं पदम्॥१॥

ॐ नमो महादेवाय इति पठित्वा संहारमुद्रया विसृजेत्॥

ततो गणपतिस्कन्दौ विसृज्य ईशान्यां जलेन मण्डलं कृत्वा ॐ व्यापकमण्डलाय नमः।

इति संपूज्य।

ॐ चण्डेश्वराय नमः इति निर्माल्यनैवेद्यादिकं संस्थाप्य ध्यायेत्।

चण्डेश्वरं रक्ततनुं त्रिनेत्रं रक्तांशुढयं हृदि भावयामि॥त्लीं

टङ्कं त्रिशूलं स्फटिकाक्षमालां कमण्डलुं बिभ्रतमिन्दुचूडम्॥

इति ध्यात्वा।

ॐ चण्डेश्वाराय नमः॥

इति निर्माल्येन संपूज्य ॐ ह्रूं फट् चण्डेश्वर इमं बलि गृहणस्वाहा इति तत्त्वमुद्रया चरणोदकधारादानेन समर्प्य ॐ।

बलिदानेन संतुष्टश्चण्डेशः सर्वासिद्धिदः॥

शान्ति करोतु में नित्यं शिवभक्ति ददातु च॥१॥

लेह्यचोष्यान्नपानादि ताम्बूलं स्त्रग्विलेपनम्॥

निर्माल्यभोजनं तुभ्यं ददामि श्रीशिवाज्ञया॥२॥

इति निर्माल्यपुष्पाञ्जलिं समर्प्य नाराचमुद्रां प्रदर्श्य गच्छगच्छेति विसृजेत्।

"ॐ बाणरावणचण्डीशानन्दिभृङ्गिरिट्यादयः॥

शङ्करस्य प्रसादोयं सर्वे गृह्णन्तु शांभवाः॥१॥

निर्माल्यसलिलं पीत्वा देवदेवस्य शूलिनः।।

क्षयापस्मारकुष्ठाद्यैस्सद्यो मुच्येत पातकैः।।२।।

अकालमृत्युहरणं पुण्यं ब्रह्महत्याविनाशनम्।।

व्याधिनं भक्तकायस्य शिवनिर्णेजनोदकम्।।३।।

इति निर्माल्यजलं पीत्वा प्रणामेत्।

पुनर्नीर्माल्यपुष्पादिकं लिङ्गं च नद्यादौ जलमध्ये क्षिपेत्।।

अथ पार्थिवपूजनमहिमा (मन्त्रमहोदधौ) "यो लिङ्गं पूजयेन्नित्यं शिवभक्तिपरायणः।।

मेरुतुल्योपि तस्याशु पापराशिर्लयं व्रजेत्।।१।।

दोग्ध्रीणां तु गवां लक्षं योदद्याद्वेदपाठिने।।

पार्थिवंयोर्चयेल्लिङ्गं तयोलिङ्गर्चको वरः।।२।।

चतुर्दश्यां तथाष्टम्यां पौर्णमास्यं विधुक्षये।।

पयसा स्नापयेल्लिङ्गं धरादानफलं व्रजेत्।।३।।

लिङ्गपूजां विधायाग्रे स्तोत्रं वा शतरुद्रियम्।।

प्रजपेत्तन्मना भूत्वा शिवलोके महीयते।।४।।

यत्संख्याकं यजेल्लिङ्गं तन्मितं होममाचरेत्।।

आज्यान्वितैस्तिलैरग्नौ घृतैर्वा पायसेन वा।।५।।

शिवमन्त्रेण तस्यान्ते ब्राह्मणान्भोजयेच्छतम्।।

एवं कृते समस्तेष्टसिद्धिर्भवति निश्चितम्"।।६।।

अथ कामनाभेदेन संख्याभेद (शान्तिसारे) "दैशिकात्सकलं ज्ञात्वा कुर्याल्लिङ्गं फलप्रदम्।।

विद्यार्थी लिङ्गसाहस्त्रं धनार्थी च तदर्द्धकम्।।१।।

पुत्रार्थी सप्तसाहस्त्रं कन्यार्थी तु शतत्रयम्।।

वन्ध्या लिङ्गयुतं कुर्यात्सर्वपापहरं शुभम्।।2।।

राज्यार्थी शतसाहस्त्रं कान्तार्थी शतपञ्चकम्।।
मोक्षार्थी कोटिगुणितं भूकामश्च सहस्त्रकम्।।३।।
रूपार्थी तु त्रिसाहस्त्रं त्रिर्थार्थी द्विसहस्त्रकम्।।
सुहृत्कामः सहस्त्रं स्याद्वस्त्रार्थी शतमष्टकम्।।४।।
मारणार्थी सप्त शंत मोहनार्थी शताष्टकम्।।
उच्चाटनपरश्चैव सहस्त्रं तु यथोक्तवत्।।५।।
स्तंभनं तु सहस्त्रेण जारणे च तदर्द्धवत्।।
निगडान्मुक्तिकामस्तु सहस्त्रं सार्द्धमीरितम्।।६।।
महाराजभये पञ्चशतं चौरादिसंकटे।।
शातद्वतं च डाकिन्या भये पञ्चशतं परम्।।
दरिद्रः पंचसाहस्त्रमयुतं सर्वकामदम्।।७।।
मन्त्रमहोदधौ।।
लक्षपार्थिवलिङ्गनां पूजनाद्भुवि मुक्तिभाक्।।
लक्षं तु मृडलिङ्गनां पूजनात्पार्थिवो मवेत्।।८।।
या नारी मृडलिङ्गनि सहस्त्रं पूजयेत्सती।।
भर्तुः मुखमखण्डं सा प्राप्यते पार्वती भवेत्।।९।।
नवनीतस्य लिङ्गनि संपूज्येष्टमवाप्नुयात्।।
भस्मना गोमयस्यापि वालुकायास्तथा फलम्।।१०।।
क्रीडन्ति पृथुका भूमौ कृत्वा लिङ्गं रजोमयम्।।
पूजयन्ति विनोदेन तेपि स्युः क्षितिनायकाः।।११।।
प्रातर्गोमयलिङ्गनि नित्यं यस्त्रीणि पूजयेत्।।
बृहतीबिल्वयोः पत्रैर्नैवेद्यं गुडमर्पयेत्।।१२।।
एवं मासत्रय कुर्वन्ननल्पं लभते धनम्।।

एकादशैव लिङ्गानि गोमयोत्थानि यो यजेत्॥१३॥

प्रातर्मध्याह्नयोः सायं निशीथे प्रतिवासरम्॥

स सर्वाः संपदः पायात् षण्मासादेवमाचरन्॥१४॥

एकादश यजेन्नित्यं शालिपिष्टमयानि यः॥

लिङ्गानि मासमात्रेण स कल्मषचयं दहेत्॥१५॥

स्फाटिकं पूजितं लिङ्गमेनोनिकरनाशनम्॥

सर्वकामप्रदं पुंसामुदुम्बरसमुद्भवम्॥१६॥

रेवाश्मजं सर्वसिद्धिप्रदं दुःखविनाशनम्॥

यथाकथंचिल्लिङ्गस्य पूजा नित्यकृतेष्टदा॥१७॥

यो यजेत्पिचुमन्दोत्थैः पत्रैगोमयजं शिवम्॥

क्रुद्धं महेश्वरं ध्यायन्स पराजयते रिपून्॥१८॥

(शान्तिसारे)

नित्यपूजने संख्या॥

"एकं पापहरं प्रोक्तं द्विलिङ्गं चाथ सिद्धिदम्॥

त्रिलिङ्गं सर्वकामानां कारणं परमाद्भुतम्॥१९॥

यत्फलं पाकयज्ञेषु हविर्यज्ञेषु यत्फलम्॥

एकाहात्तदवाप्नोति लिङ्गार्चनरतः सदा॥२०॥

गवां शतसहस्रस्य सम्यग्दत्तम्य यत्फलम्॥

दशाहात्तदवाप्नोति सम्यग्लिङ्गार्चने रतः॥२१॥

वाजपेयशतैरिष्ट्वा यल्लभन्ते द्विजोत्तमाः॥

विप्रो रिशतिरात्रेण रुद्रभक्त्या तदाप्नुयात्॥२२॥

अश्वमेधसहस्रस्य सम्यगिष्टस्य यत्फलम्॥

मासेन तदवाप्नोति रुद्रलिङ्गार्चने रतः॥२३॥

राजसूयसहस्त्रस्य सम्यगिष्टस्य यत्फलम्॥

मासेन तदवाप्नोति शिवलिङ्गार्चने रतः॥२४॥

सर्वतीर्थाभिषेकस्य सर्वदानफलानि च॥

सर्वयज्ञफलं चैव उपवासफलानिच॥२५॥

सम्यगिष्टफलः सर्वक्षेमाचारः समाधिना॥

नवमासात्समासाद्य ब्राह्मणो विजितेन्द्रियः॥

सर्वमेतदवाप्नोति लिङ्गे योर्चयते शिवम्॥२६॥

यस्तु संवत्सरं पूर्णे पूजयेदेकलिङ्गकम्॥

तस्य तुष्टः प्रयच्छामि गाणपत्यं न संशयः॥२७॥

माघे मासि समुद्युक्तस्त्रिसन्ध्यं योर्चयेच्छिवम्॥

लभेत्षाणमासिकं पुण्यं मासेनैव न संशयः॥२८॥

यथा माघे तथाषाढे कार्त्तिके तु विशेषतः॥

त्रिषु पुण्यं समंज्ञेयं मासेष्वेतेषु यत्फलम्॥२९॥

यस्तु पूजयेत नित्यंलिङ्गंत्रिभुवनेश्वरम्॥

स स्वर्गराज्यमोक्षाणां क्षिप्रं भवति भाजनम्॥३०॥

(शिवनारदसंवादे) "तत्रापि पार्थिवं लिङ्गं क्षिप्रं सिद्धिप्रदं भवेत्॥

पार्थिवेन तु लिंगेन बहवः सिद्धिमागताः॥३१॥

कृते रत्नमयं लिंगं त्रेतायां हेमसंभवम्॥

द्वापरे पारदं श्रेष्ठं पर्थिवं तु कलौ युगे॥३२॥

(लिङ्गमानं मन्त्रमहोदधौ) "अङ्गुष्ठमानादधिकं वितस्त्यविध सुन्दरम्॥

पार्थिवं रचयेल्लिंगं न न्यून नाधिकं च तत्॥३३॥"

लिङ्गमाहात्म्यम् (नदिभीवष्ययोः) "आयुष्यान्बलवाञ्छ्रीमान्पुत्रवान्धनवान्सुखी

वरमिष्ट लभेल्लिगं पर्थिवं यः रसमाचरेत्॥३४॥

मृद्भस्मगोशकृत्पिण्डं ताम्रकांस्यमयं तथा॥

क्त्वा लिंगं सकृत्पूज्य वसेत्कल्पायुतं दिवि॥३५॥

इति पार्थिवलिंगपूजनप्रयोगः समाप्तः॥

अथ दक्षिणामूर्तिशिवमन्त्रपुराश्चरणम्॥

(शारदातिलके)॥

मूलमंत्रो यथा "ॐ ह्रीं दक्षिणामूर्त्तये तुभ्यं वटमूलनिवासिने॥

ध्यानैकनिरतांगाय नमो रुद्राय शंभवे ह्रीं ॐ"॥

'षट्त्रिंशदक्षरो मंत्रः सर्वकामफलप्रदः' अस्य श्रीदक्षिणामूर्तिशंभुमत्रस्य शुकऋषिः।

अनुष्ठुप्छंदः।

दक्षिणामर्तिशंभुर्देवता।

सर्वेष्टसिद्ध्यर्थे जपे विनियोगः॥

ॐ शुकऋषये नमः शिरसि॥१॥

ॐ अनुष्टुपूछंदसे नमः मुखे॥२॥

ॐ दक्षिणामूर्तिशंभुदेवतायै नमः रहृदये॥३॥

हति ऋष्यादिन्यासः॥

ॐ ह्रीं दक्षिणमूर्तये ह्रों अंगुष्ठाभ्यां नमः॥१॥

ॐ ह्री तुभ्यं ह्री तर्जनीभ्यां नमः॥२॥

ॐ ह्री वटमूलनिवासिने ह्री मध्यमाभ्यां नमः॥३॥

ॐ ह्री ध्यानैकनिरताङ्गाय ह्री अनामिकाभ्यां नमः॥४॥

ॐ ह्री नमो रुद्राय ह्री कनिष्ठिकाभ्यां नमः॥५॥

ॐ ह्री शंभवे ह्री करतलकरपृष्ठाभ्यां नमः॥६॥

इति करन्यासः।

एवं हृदयादिन्यासं कृत्वा अङ्गन्यासं कुर्यात्।

ॐ ह्री नमः मूर्ध्नि॥१॥

ॐ दं नमः भाले॥२॥

ॐ क्षिं नमः नेत्रयोः॥३॥

ॐ णां नमः श्रोत्रयोः॥४॥

ॐ मूं नमः गण्डयोः॥५॥

ॐ र्तनमः नासिकयोः॥६॥

ॐ यं नमः मुखे॥७॥

ॐ तुं नमः दक्षिणबाहुमूले॥८॥

ॐ भ्यं नमः दक्षिणकूर्परे॥९॥

ॐ वं नमः दक्षिणमणिबंधे॥१०॥

ॐ टं नमः दक्षिणहस्तांगुलीमूले॥११॥

ॐ मूं नमः दक्षहस्तांगुल्यग्रे॥१२॥

ॐ लं नमः वामबाहुमूले॥१३॥

ॐ निं नमः वामकूर्परे॥१४॥

ॐ वां नमः वाममणिबंधे॥१५॥

ॐ स्त्रिं नमः वामहस्तागुलीमूले॥१६॥

ॐ ने नमः वामहस्तागुल्यग्रे॥१७॥

ॐ ध्यां नमः गले॥१८॥

ॐ नैं नमः स्तनयोः॥१९॥

ॐ कं नमः हृदये॥२०॥

ॐ निं नमः नाभिमंडले॥२१॥

ॐ रं नमः कट्योः॥२२॥

ॐ तां नमः गुह्ये॥२३॥

ॐ गां नमः दक्षिणपादमूले॥२४॥

ॐ यं नमः दक्षिणजानुनि॥२५॥

ॐ नं नमः दक्षिणगुल्फे॥२६॥

ॐ मं नमः दक्षपादांगुलीमूले॥२७॥

ॐ रुं नमः दक्षपादाङ्गुल्यग्रे॥२८॥

ॐ द्रां नमः वामपादमूले॥२९॥

ॐ यं नमः वामजानुनि॥३०॥

ॐ शं नमः वाम गुल्फे॥३१॥

ॐ भं नमः वामपादाङ्गुलीमूले॥३२॥

ॐ वें नमः वामपादाङ्गुल्यग्रे॥३३॥

ॐ ह्रीं ममः इति व्यापकेन सर्वाङ्गे न्यसेत्॥३४॥

एवमङ्गन्यासं कृत्वा ध्यायेत्॥

"हेमाचलतटे रम्ये सिद्धकिन्नरसेविते॥
विविधद्रुमशाखाभिः सर्वतो वारितातपे॥१॥
सुपुष्पितैर्लताजालैराश्लिष्टकुसुमद्रुमैः॥
शिलाविवरनिर्गच्छन्निर्झरानिलसेविते॥२॥
गायद्भृङ्गाङ्गनासंघे नृत्यद्बर्हिकदंबके॥
कूजत्कोकिलसंघेन मुखरीतकृदिङ्मुखे॥३॥
परस्परविनिर्मुक्तमात्सर्यमृगसेविते॥
आद्यः शुकाद्यैर्मुनिभिरजस्त्रं समुपस्थितम्॥४॥
पुरंदरमुखैर्देवैः सेवांयातैर्विलोकितम्॥
वटवृक्षं महोच्छ्रायं पद्मरागफलोज्ज्वलम्॥५॥

गारुत्मतमयैः पत्रैर्निबिडैरुशोभितम्॥

नवरत्नमयाकल्पैर्लम्बमानैरलंकृतम्॥६॥

स्थलजैर्जलजैः पुष्पैरामोदितमलंकृतम्॥

श्रृण्वद्भिर्वेदशास्त्राणि शुकवृदैर्निषेवितम्॥७॥

संसारतापविच्छेदकुशलच्छायमद्भुतम्॥

विचिन्त्य तस्य मूलस्थे रत्नसिंहासने शुभे॥८॥

आसीनममिताकल्पं शरच्चन्द्रनिभाननम्॥

स्तूयमानं मुनिगणैर्दिव्यज्ञानाभिलषिभिः॥९॥

संस्मरेज्जगतामाद्यं दक्षिणामूर्तिमव्ययम्" इति विचिंत्य॥

"कैलासाद्रिनिभं शशांकशकलस्फूर्जज्जटामंडितं नासालोकनतत्परं त्रिनयनं वीरासनाध्यासितम्॥

मुद्राटंककुरङ्गजानुविलसत्पाणिं प्रसन्नाननं कक्षाबद्धभुजङ्गमं सुनिवृतं वंदे महेशं परम्॥१॥"

इति ध्यायेत्॥

एवं ध्यात्वा पूर्वोक्ते शिवपंचाक्षरोदिते पीठे पाद्याद्यैः षोडशोपचारैर्यथाविधि दक्षिणामूर्त्यारव्यं शिवं संपूज्यं जपं कुर्यात्॥

अस्य मन्त्रस्य सिद्ध्यर्थे विंशतिसहस्त्राधिकं लक्षत्रयात्मकं जपपुरश्चरणं कार्यम्॥

ततो जपान्ते दशांशेन क्षीरसंयुतैः शुद्धैस्तिलैर्होमं कृत्वा तत्तद्दशांशेन तर्पणमार्जनब्राह्मणभोजनानि कुर्यात्॥

तथा च (शारदातिलके) "अयुतद्वयसंयुक्तं गुणलक्षं जपेन्मनुम्॥

तद्दशांशं तिलैः शुद्धैर्जुहुयात्क्षीरसंयुतैः॥१॥

एवं कृतपुरश्चर्यः सिद्धमन्त्रो भवेत्सुधीः॥

भिक्षाहारो जपेन्मासं मनुमेनं जितेन्द्रियः॥२॥

नित्यं सहस्त्रमष्टाद्धै परं विंदति वाङ्मयम्॥

त्रिवारं जप्तमेतेन मनुना सलिलं पिबेत्॥३॥

नित्यशो दक्षिणामूर्तिं ध्यायन्साधकसत्तमः॥

शास्त्रव्यारव्यानसामर्थ्यं लभते वत्सरांतरे॥४॥

ब्राह्मीसैन्धवसिद्धार्थवचाकुष्ठकणोत्पलैः॥

सुगन्धि संयुतैः कल्कैः श्रृतं ब्राह्मीरसे घृतम्॥५॥

मनुनानेन संजप्तमयुतं साधु साधितम्॥

निपीतं कविताकान्तिरक्षायुःश्रीधृति प्रदम्॥६॥"

इति दक्षिणामूर्तिशिवमन्त्रपुरश्चरणं समाप्तम्॥

अथ द्वितीयो दक्षिणामूर्तिमन्त्रः॥

तत्रैव मूलं यथा॥

ॐ नमो भगवते दक्षिणामूर्तये मह्यं मेधां प्रयच्छ स्वाहा॥

द्वविंश २२ त्यक्षरो मनुः॥

मूतशुद्ध्यादिश्रीकण्ठादिकलान्तन्यासं शिवपञ्चाक्षरवत् कृत्वा।

अस्य श्रीदक्षिणामूर्तिमन्त्रस्य चतुर्मुखऋषिः गायत्रीछन्दः दक्षिणामूर्तिः वेदव्या-ख्यानतत्परो देवता सर्वेष्टसिद्धयै विनयोगः॥ ॐ चतुर्मुखऋषये नमः शिरसि। गायत्रीछन्दसे नमः गुखे। ॐ दक्षिणमूर्ति देवतायै नमः हृदये।

इति ऋष्यादिन्यासः॥

ॐ आँ ॐ नमो भगवते अङ्गुष्ठाभ्यां नमः॥१॥

ॐ ई ॐ दक्षिणामूर्तये तर्जनीभ्यां नमः॥२॥

ॐ ऊँ ॐ मह्यं मध्यमाभ्यां नमः॥३॥

ॐ एं ॐ मेधां अनामिकाभ्यां नमः॥४॥

ॐ औ ॐ प्रयच्छ कनिष्ठिकाभ्यां नमः॥५॥

ॐ अः ॐ स्वाहा करतलकरपृष्ठाभ्यां नमः॥६॥

इति करन्यासः॥२॥

एवमेव हृदयादिन्यासं कृत्वा।

पूर्वोक्तं 'हेमाचलतटे रम्ये' इत्यादि विचिंत्य ध्यायेत्।

"स्फटिकरजतवर्णे मौक्तिकीमक्षमालाममृतकलशविद्याज्ञानमुद्राः कराग्रैः॥

दक्षतमुरगकक्षं चन्द्रचूडं त्रिनेत्रं विधृतविविधभूषं दक्षिणामूर्तिमीडे॥१॥"

इति ध्यात्वा पञ्चाक्षरोदिते पीठे यजेत्॥

अथ यंत्रपूजा॥

शैवोक्तपीठपूजां विधाय मध्ये मूर्ति संस्थाप्य पाद्यादिपुष्पान्तैरुपचारैः संपूज्य आवरणपूजां कुर्यात्॥

तद्यथा॥ षट्कोणकेसरेष्वग्न्यादिकोणेषु मध्ये दिक्षु च॥

ॐ आँ ॐ हृदयाय नम॥१॥

ॐ ई ॐ शिरसे स्वाहा॥२॥

ॐ ऊं ॐ शिखायै वषट्॥३॥

ॐ ऐं ॐ कवचाय हुम्॥४॥

ॐ औं ॐ नेत्रत्रयाय वौषट्॥५॥

ॐ अः ॐ अस्त्राय फट्॥६॥

इत्यङ्गानि संपूज्य॥१॥

ततो बाह्ये पत्रेष्वष्टसु पूर्वादिक्रमेण ॐ सरस्वत्यै नमः॥१॥

ॐ ब्रह्मणे नमः॥२॥

ॐ सनकाय नमः॥३॥

ॐ सनंदनाय नमः॥४॥

ॐ सनातनाय नमः॥५॥

ॐ शुकाय नमः॥६॥

ॐ व्यासाय नमः॥७॥

ॐ गणेश्वराय नमः॥८॥

इति पूजयेत्॥२॥

ततस्तद्बहिः पूर्वादिचतुर्दिक्षु।

ॐ सिद्धेभ्यो नमः॥१॥

ॐ गंधर्वेभ्यो नमः॥२॥

ॐ योगीन्द्रेभ्यो नमः॥३॥

ॐ विद्याधरेभ्यो नमः॥४॥

इति पूजयेत्॥३॥

तद्बहिः भूगृहे पूर्वादिषु इंद्रादिलोकपा लान्पूजयेत्॥४॥

तद्बहिः वज्राद्यायुधानि च संपूजयेत्॥५॥

एवं पंचावरणपूजां कृत्वा प्रधानदेवंधूपदीपनैवे द्यतांबूलदक्षिणानीराजनैः संपूज्य स्तवेन स्तुत्वा लक्षमंत्रं जपेत्॥

तथा च (शारदातिलके)

"लक्षमेकं जपेन्मंत्रं ब्रह्मचारिव्रते स्थितः॥

जुहुयात्सघृतैः पद्मैर्दशांशं संस्कृतेनले॥१॥

इत्थं पूजादिभिः सिद्धे मंत्रेस्मिन्साधकोत्तमः॥

वल्लभो जायते वाचां बृहस्पतिरिवापरः॥२॥

मंत्रेणानेन संजप्तैर्विशुद्धैः सलिलैः सुधीः॥

अभिषिंचेत्स्वशिरसि श्रियमारोग्यमाप्नुयात्॥३॥

कंठमात्रे जले स्थित्वा जपेन्मत्रसहस्रकम्॥

प्रत्यहं मंडलादर्वाक्कवीनामग्रणीर्भवेत्।

गौर्या पार्श्वस्थया सार्द्धे श्रीकामी चिन्तयन्विभुम्॥

अयुतं प्रजपेन्मन्त्रं भूयसीं श्रियमाप्नुयात्॥५॥

भुंजानं प्रयतो मन्त्री गोमूत्रे श्रृतमोदनम्।।
भिक्षान्नमथवा मंत्रमयुतद्वितयं जपेत्।।६।।
अश्रुतान्वेदशास्त्रादीन् व्याचद्ये नात्र संशायः।।
सिद्धगंधर्वमुनिभिर्योगीन्द्रैरपि सेविते।।७।।
ज्ञानवागर्थिना प्रीत्यै कथितौ मंत्रनायकौ"।।८।।
इति दक्षिणामूर्तिशिवमंत्रानुष्ठानम्।।
अथ आपदुद्धारबटुकभैरवमंत्रानुष्ठानविधानं
(रुद्रयामले)
कदाचिद्गिरिजा शंभुं पप्रच्छोपासनाविधिम्।।
येनेदं सर्वलोकानां मनेप्शितफलं भवेत्।।१।।
श्रीपार्वत्युवाच।।
प्राणनाथजगन्नाथ जगदादिजगन्मय।।
शंभो शंकर देवेश बटुकाराधनं वद।।२।।
एकादशसहस्त्रं तु भजनं हि त्वयोदितम्।।
विधिं तस्य विशेषेण ब्रूहि त्वं शंकराधुना।।३।।
शिव उवाच।।
सम्यक् पृष्टं त्वया देवि लोकदुःखविमोचनम्।।
मया वटुकरूपं हि धृतं सर्वसुखावहम्।।४।।
अन्ये देवास्तु कालेन प्रसन्नाः संभवंति हि।।
बुटुकः सेवितः सद्यः प्रसीददति ध्रुवं शिवे।।५।।
दुःखे च सेवितः शीघ्रं दुःखं नाशयते क्षणात्।।
सुखे च सेवितो नित्यं सुखं वर्द्धयते बहु।।६।।
तस्मात्सेब्यो नरै श्चायं सर्वकामफलाय वै।।

सेवोपायं प्रवक्ष्यामि यथा सिर्द्धिभवेध्रुवम्॥७॥

श्रृणु देवि प्रवक्ष्यामि बटुकस्य महात्मनः॥

विधानं परमं गोप्यं ब्रह्मादीनां सुदुर्लभम्॥८॥

मंत्रं वै वसुसंक्षेपात्कथयिष्यामि वल्लभे॥

येन विज्ञानमात्रेण त्रैलोक्यं साधयेत्सुधीः॥९॥

एकदा देवदेवेशि तपसे मंदराचलम्॥

गतोहं परमानंदान्मूलप्रकृतिमीश्वरीम्॥१०॥

चक्रे परमसतुष्टां तपसा भावितात्मना॥

साकाशरूपिणी देवी प्रोवाच वचनं मुदा॥११॥

तुष्टाहं शंकर प्रीता वरं वरय दुर्लभम्॥

शिव उवाच॥

बटुकस्य विधानं मे परमं भक्तितो वरम्॥१२॥

परमासयान्मत्रस्य येन सिध्यति सर्वथा॥

मनोरमाणि मंत्रस्य सर्वकार्याणिसांप्रतम्॥१३॥

इति वाक्यं च मे श्रुत्वा मूलभूता सनातनी॥

उवाच यादृशं देवी विधानं श्रृणु वल्लभे॥१४॥

बटुकाख्यस्य देवस्य भैरवस्य महात्मनः॥

ब्रह्मविष्णुमहेशाद्यैर्वन्दितस्य दयानिधेः॥१५॥

तत्र प्रयोगः (शारदातिलके) सुमुहूर्ते शिवालयादिषु कृतनित्यक्रियो धृतभस्मत्रिपुण्ड्ररुद्राक्षः कूर्मसंशोधिते स्वासने उदङ्मुख उपविश्य मूलेनाचम्य प्राणानायम्य देशकालौ सङ्कीर्त्य मम मन्त्रसिद्धिपूर्वकश्री आपदुद्धारप्रीत्यर्थमेकविंशतिलक्षात्मकं जपादिरुपपुरश्चरणमहं करिष्ये॥

इति सङ्कल्प्य तदङ्गत्वेन भूतशुद्धि प्राणप्रतिष्टामन्तर्मातृकाबहिर्मातृकान्यासं च कृत्वा पूर्वोक्तशिवपञ्चाक्षरोदित श्रीकण्ठादिकलान्तंन्यासं च कृत्त्वा मूलमन्त्रन्यासं च कुर्यात्॥

मूलमन्त्रो यथा "ह्री बटुकाय आपदुद्धरणाय कुरुकुरु बटुकाय ह्रीं॥

इत्येकविंशतिवर्णो मन्त्रः॥

अस्य मन्त्रस्य बृहदारण्यक ऋषिः।

अनुष्टुपूछन्दः। आपदुद्धारणभैरवो देवता।

ह्रीं बीजं वं शक्रिः आंकीलकम्।

श्री बटुक भैरव प्रीतये जपे विनियोशः

ॐ बृहदारण्यऋषये नमः शिरासि॥

ॐ अनुष्टुपू छन्दसे नमः मुखे॥२॥

ॐ वटुक भैरवदेवतायै नमः हृदि॥३॥

ह्रीं बीजाय नमः गुह्ये॥४॥

ॐ वं शक्त नमः पादयोः॥५॥

ॐ आं कीलकायनमः नाभौ॥६॥

चतुर्विधत्पुरुषार्थसिद्ध्यर्थे विनियोगाय नमः सर्वाङ्गे॥७॥

इति ऋष्यादिन्यासः॥

ॐ ह्रों वों ईशानाय नमः अङ्गुष्टयोः॥१॥

ॐ ह्रों वा तत्पुरुषाय नमः तर्जन्यो॥२॥

ॐ ह्र वुं अघोराय नमः मध्यमयोः॥३॥

ॐ हिं विं वामदेवाय नमः अनामिकयोः॥४॥

ॐ ह्वं सद्योजाताय नमः कनिष्ठिकयोः।

इति करन्यासः॥

ॐ ह्रों वो ईशानाय नमः शिरसि॥१॥

ॐ हें वें तत्पुरुषाय नमः कक्रे॥२॥

ॐ ह्रुं वुं अघोरायनमः हृदि॥३॥

ऊँ ह्रिं विं वामदेवाय नमः गुह्ये॥४॥

ऊँ ह्रुं वं सद्योजाताय नमः पादयोः॥५॥

इति देहन्यासः॥

ऊँ ह्रों वों ईशानाय नमः ऊर्ध्ववकत्रे॥१॥

ऊँ ह्रें वें तत्पुरुषाय नमः पूर्ववकत्रे॥२।

ऊँ ह्र वं अघोरायनमः दक्षिणवक्त्रे॥३॥

ऊँ ह्रिं विं वामदेवाय नमः उत्तरवकत्रे॥४॥

ऊँ ह्रुं वं सद्योजाताथ नमः पादयोः॥५॥

इति वकत्रन्थासः।

एवं ह्रस्वशाक्तिबीजमकाराढ्यं न्यासत्रयं कृत्वा एवमेव दीर्घशक्तिबीजवकारपुरःसरं अङ्गुल्यादिन्यासत्रयं पूर्ववत् कुर्यात्।

अथ हृदयादिन्यासः॥

ऊँ ह्रां वां हृदयाय नमः॥१॥

ऊँ ह्री वी शिरसे स्त्राहा॥२॥

ऊँ ह्रू वू शिखायै वषट्॥३॥

ऊँ ह्रैं वै कवचाय हुम्॥४॥

ऊँ ह्रौं वौं नेत्रत्रयाय वौषट्॥५॥

ऊँ ह्रः वःअस्त्राय फट्॥६॥

एवं षडङ्गन्यासं कृत्वा यथाकामनया ध्यायेत्॥

अथ सात्त्विकध्यानम्॥

"वंदे बालस्फटिकसद्दशं कुन्तलोल्लासिवक्रं दिव्याकल्पैर्नवमणिमयैः किङ्किणीनूपुराद्यैः॥

दीप्ताकारं विशदवसनं सुप्रसन्नत्रिनेत्रं हस्ताब्जाभ्यां बटुकमनिशं शूलादण्डौ दधानम्"॥१॥

अथ राजसध्यानम्।।

"उद्यद्भास्करसन्निभं त्रिनयनं रक्ताङ्गरागस्त्रजं स्मेरास्यं वरदं कपालमभयं शूलं दधानं करैः।।

नीलग्रीवमुदारभूषणशतं शीतांशुचूडोज्वलं बन्धूकारूणा वाससं भयहरं वन्दे सदा भावये"।।२।।

अथ तामसध्यानम्।।

"ध्यायेन्नीलाद्रिकान्तं शशिशकलधरं मुण्डमालं महेशं दिग्वस्त्रं पिङ्गकेशं डमरुमथ सृणिं खड्गपाशाभयानि।।

नागं घंटा कपालं करसरसिरुहैर्बिभ्रतं भीमदंष्ट्रं सर्पाकल्पं त्रिनेत्रं मणिमयविलसत्किङ्किणीनूपुराढ्यम्।।३।।"

"सात्त्विकं ध्यानमाख्यातमपमृत्युनिवारणम्।।

आयुरारोग्यजननमपवर्गफलप्रदम्।।१।।

राजसं ध्यानमाख्यातं धर्मकामार्थसिद्धिदम्।।

तामसं शत्रुशमनं कृत्याभूजग्रहापहम्।।२।।"

एवं ध्यात्वा पीठपूजापूर्वकं यंत्रादिपूजां कुर्यात्।

तद्यथा - ॐ धंर्माय नमः।।१।।

ॐ ज्ञां ज्ञानाय नमः।।२।।

ॐ वैं वैराग्याय।।३।।

ॐ ऐं ऐश्वर्याय।।४।।

ॐ अं अधर्माय।।५।।

ॐ अं अज्ञानाय नमः।।६।।

ॐ अं अवैराग्याय नमः।।७।।

ॐ अं अनैश्वर्याय नमः।।८।।

इति पीठदेवता रान्ध्पुष्पैः संपूज्य

ॐ वामायै नमः॥१॥

ॐ ज्येष्टायै नमः॥२॥

ॐ रौद्यै नमः॥३॥

ॐ कालयै नमः॥४॥

ॐ बलविकरण्यै नमः॥५॥

ॐ बलप्रभथिन्यै नमः॥६॥

ॐ सर्वभूतदमन्यै नमः॥७॥

ॐ मनोन्मन्यै नमः॥८॥

इति पीठशक्तीः संपूज्य।

ॐ नमो भगवते सकलगुणात्मशक्तिशुक्ताय अनंताय योगपीठात्मने नमः।

इति पुष्पांजलिना आसनं दद्यात्।

ततस्तत्र यथाविधि ताम्रकलश संस्थाप्य तत्र वरुणमावाह्य संपूज्य तदुपरि पट्टवस्त्रं प्रसार्य तत्र शक्तिगन्धाष्टकेन भैरवयन्त्रं लिखेत॥

शक्तिशन्धकं यथा-"चन्दनारारु कर्पूर चौर कुंकुमरोचनाः॥

जटामांसी कपियुता शक्तेर्रान्धष्टकं विदुः॥

अथ यन्त्रोदूारः (ऋद्रयालले) "यन्त्रोद्धारमिमं देवि त्रैलोक्ये चातिदुर्लभम्॥
तद्यंत्रं च प्रवक्ष्यामि यत्र देवं च पूजयेत्॥१॥

मध्ये चाष्टदलं पद्म कर्णिका केसरोज्वलम्॥

त्रिकोणं च ततः कृत्वा षट्कोणं च ततो न्यसेत्॥२॥

वर्तुलं चाष्टपत्रं स्वस्थो भूत्वा जपेन्नरः॥३॥

एवं यंत्रं संलिख्य। अथवा यथाशक्ति सुवर्णनिर्मितं यंत्रं वा।

तत्र सावयवां स्वर्णनिर्मितां भैरवप्रतिमां सात्विकादिध्यानप्रतिपा दितांसथापयेत्।

ततः प्राणप्रतिष्ठा कृत्वा यथाविधि पूजयेत्।

तध्यथा-"देवेश भकितसुलभ परिवारसमन्वित।

यावत्त्वां पूजयिष्यामि तावदेव इहावह॥१॥

ॐ सद्योजातं प्रपद्यामि सद्योजातायवैनमो नमः

भवेभवेनाति भवे भवस्य मां भवोद्भवाय नमः॥

इति मन्त्रेण आवाहन मुद्रां प्रदर्श्य।

मूलान्ते ॐ भगवन् भैरव इहागच्छ आवाहनी भव इत्यावहयेत्॥१॥ ततः

ॐ वामदेवाय नमो ज्येष्ठायनमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमः॥१॥

मूलं पठित्वा स्थापनीमुद्रांप्रदर्श्य स्थापनी भव इतिसंस्थापयेत्॥२॥

ताते मूलं पठित्वा सन्निधापनमुद्रया इह सन्निधेहि सन्निधानी भवेति सन्निधाय॥३॥

ॐ अघोरेभ्योथघोरेभ्योघोरघोरतरेभ्यः सर्व्वेभ्यः सर्वसर्वेभ्योनमस्तेऽस्तुरुद्ररूपेभ्यः॥१॥

मूलं पठित्वा।

सन्निरोधनमुद्रया इह सन्निरुद्ध सन्निरोधिनीभव इति सन्निरेध्य॥४॥

ततो मूलं पठित्वा "ॐ तत्पुरुषायविद्महें महादेवायधीमहि॥

तन्नोरुद्रः प्रचोदयात्" इति मन्त्रेणयोनिमुद्रां प्रदर्श्य सम्मुखो भव इति संमुखीकृत्य॥५॥

मूलान्ते ॐ ईशानः सर्व्वविद्यानामीश्श्वरः सर्व्वभूतानाम्॥

ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्माशिवोमेअस्तु सदाशिवोम्॥१॥

इति वन्दनं कुर्यात्॥६॥

ततो मूलमंत्रान्ते तत्तनमिंन्त्रैः।

पाद्यादि पुष्पान्तैरुपचारैः "ॐ श्रीमद्बटुकभैरवाय नमः" इति मन्त्रेण संपूज्य आवरणपुजान्ते धूपदीपादि निवेदयेत्॥

अथावरणपूजा॥

पुष्पाञ्जलिमादांय।

"ऊँ संविन्मयः परो देवः परामृतरसप्रियः॥

अनुज्ञां देहि बटुक परिवारार्चनाय मे॥१॥

इति पुष्पाञ्जलिं भैरवोपरि दत्त्वा आज्ञां गृहीत्वा पूज्यपूजकयोर्मध्ये प्राचीं प्रकल्प्य तदनुसारेण अन्या दिशश्च कृत्वा यन्त्रं पूजयेत्॥

मध्ये त्रिकोणे देवस्याग्रे ऊँ ह्रौ वौं ईशानाय नमः॥१॥

ऊँ ह्रैं वैं तत्पुरुषाय नमः॥२॥

ऊँ ह्रं वूं अघोराय नमः॥३॥

ह्रीं वीं वामदेवाय नमः॥४॥

ऊँ ह्रां वां सद्योजाताय नमः॥५॥

इति पूजयेत्॥१॥

"अभीष्टसिद्धिं मे देहि शरणागतवत्सल॥

भकत्या समर्पये तुभ्यं प्रथमावरणार्चनम्॥

"इतिपुष्पाञ्जलिं दद्यात्॥१॥

एवं सर्वत्र।

इति प्रथमावरणम्॥१॥

ततः कर्णिकाद्बहिः अष्टदलेषु पूर्वादिक्रमेण।

ऊँ असिताङ्गभैरवाय नमः॥१॥

ऊँ रुरुभैरवायः॥२॥

ऊँ चण्डभैरवायः॥३॥

ऊँ क्रोधभैरवायः॥४॥

ऊँ उन्मत्तभैरवायः॥५॥

ऊँ कपालभैवायः॥६॥

ऊँ भीषणभैरवायः॥७॥

ॐ संहारभैरवाय नमः॥८॥

इति भैरवाष्टकं संपूज्य मूलेन-'इति पुष्पाञ्जलिं दद्यात्।

इति द्वितीयावारणम्॥२॥

ततस्त्रिकोणाद्बहिः आग्नेयादिषद्कोणेषु ॐ ह्रीं भूतनाथाय नमः॥१॥

ॐ ह्रीं आदिनाथायः॥२॥

ॐ ह्रीं आनन्दनाथायः॥३॥

ॐ ह्रीं सिद्धशावरनाथायः॥४॥

ॐ ह्रीं सहजानन्दनाथायः॥५॥

ॐ ह्रीं निःसीमानन्दनाथाय नमः॥६॥

इति रुद्रयामलोक्तान्संपूज्य तत्रैव ॐ ह्रां वां हृदयाय नमः॥१॥

ॐ ह्री वीं शिरसे स्वाहा नमः॥२॥

ॐ ह्रं वूं शिरवायै वषट् नमः॥३॥

ॐ ह्रैं वै कवचाय हुं नमः॥४॥

ॐ ह्रौ वौं नेत्रत्रयाय वौषट् नमः॥५॥

ॐ ह्रः वः अस्त्राय फट् नमः॥६॥

इत्यङ्गानि च संपूज्य मूलमन्त्रेण पूर्ववत्पुष्पाञ्जलिं दद्यात्॥

इति तृतीयावरणम्॥३॥

ततस्तद्बहिर्वतुले पूर्वादीशानपर्यन्तं क्रमेण।

ॐ ह्री डाकिनीपुत्रेभ्यो नमः॥१॥

ॐ ह्री राकिनीपुत्रेभ्यो नमः॥२॥

ॐ ह्री लाकिनीपुत्रेभ्यो नमः॥३॥

ॐ ह्री काकिनीपुत्रेभ्यो नमः॥४॥

ॐ ह्री शाकिनीपुत्रेभ्यो नमः॥५॥

ऊँ ह्रीं हाकिनीपुत्रेभ्यो नमः।।६।।

ऊँ ह्रीं मालिनीपुत्रेभ्यो नमः।।७।।

ऊँ ह्रीं देवीपुत्रेभ्यो नमः।।८।।

इत्यष्टदिक्षु संपूज्य।

ततो 'देवस्य दशभागे' ऊँ ह्रीं उमापुत्रेभ्यो नमः।।९।।

ऊँ ह्रीं रुद्रपुत्रेभ्यो नमः।।१०।।

ऊँ ह्रीं मातपुत्रेभ्यो नमः।।११।।

'पूर्वेशानयोर्मध्ये ऊर्ध्वम्' ऊँ ह्रीं ऊर्ध्वमुरवीपुत्रेभ्यो नमः।।१२।।

'पश्चिमनैऋतयोर्मध्ये अधः'

ऊँ ह्रीं अधोमुखीपुत्रेभ्यो नमः।।१३।।

इति त्रयोदश पुत्रान्संपूज्य।

मूलेन पुष्पाञ्जलिं दद्यात्।।

इति चतुर्थावरणम्।।

तद्बहिरष्टदलेषु पूर्वादग्न्यन्तं वामक्रमेण 'पूर्वे' ऊँ ह्रीं ब्रह्माणीपुत्रवटुकाय नमः।।१।।

ईशान्याम्' ऊँ ह्रीं माहेश्वरीपुत्रवटुकाय नमः।।५।।

'उत्तरे' ऊँ ह्रीं वैष्णवीपुत्रवटुकाय नमः।।७।।

वायव्याम ऊँ ह्रीं कौमारीपुत्रवटुकाय नमः।।४।।

पश्चिमे ऊँ ह्रीं इन्द्राणीपुत्रवटुकाय नमः।।५।।

'नेऋत्याम्' ऊँ ह्रीं महालक्ष्मीपुत्रवटुकाय नमः।।६।।

'दक्षिणे' ऊँ ह्रीं वारहीपुत्रवटुकाय नमः।।७।।

'आग्नेय्याम्' ऊँ ह्रीं चामुण्डापुत्रवटुकाय नमः।।८।।

इति संपूज्य मूलेन पूर्ववत्पुष्पाञ्जलिं दद्यात्।

इति पञ्चमावरणम्।।५।।

अष्टदलाद्वहिः चतुरस्त्राभ्यन्तरे पूर्वादिप्राग्दक्षिणेन दशदिक्षु ॐ ह्रीं हेतुकाय नमः॥१॥

ॐ ह्रीं त्रिपुरान्तकाय नमः॥२॥

ॐ ह्रीं वेतालय नमः॥३॥

ह्रीं अग्निजिह्वाय नमः॥४॥

ॐ ह्रीं कालान्तकाय नमः॥५॥

ॐ ह्रीं करालाय नमः॥६॥

ॐ ह्रीं एकपादाय नमः॥७॥

ॐ ह्रीं भीमरूपाय नमः॥८॥

'इन्दे शानयोर्मध्ये' ॐ ह्रीं अचलाय नमः॥९॥

'नेर्ऋतवरुणयोर्मध्ये' ॐ ह्रीं हाटकेशाय नमः॥

इति संपूज्य मूलेन पूर्ववत्पुष्पाञ्जलिं दद्यात्।

इति षष्ठावरणम्।

ततःत्रिरेरवात्मकभूपुरस्य प्रथमरेरवायां दिग्विदिगन्तरालेषु षोडशस्थानेषु श्रीकण्ठादिमहासेनान्तान्यजेत्।

'पूर्वे' ॐ ह्रीं श्रीकण्ठेशपूर्णोदरीभ्यां नमः॥१॥

'दक्षिणे' ॐ ह्रीं अनन्तेशविरजाभ्यां नमः॥२॥

'पक्ष्चिमे ॐ ह्रीं सूक्ष्मेश शाल्मलीभ्यां नमः॥३॥

'उत्तरे' ॐ ह्रीं त्रिमूर्तीशलोलक्षीभ्यां नमः॥४॥

'आग्नेये' ॐ ह्रीं अमरेशवर्त्तुलाक्षीभ्यां नमः॥५॥

'नैर्ऋते' ॐ ह्रीं आर्धेशदीर्घघोणाभ्यां नमः॥६॥

'वायव्याम्' ह्रीं भारभूतीशदीर्घमुरवीभ्यां नमः॥७॥

ईशान्याम् ॐ ह्रीं अतिथीशगोमुखिभ्यां नमः॥८॥

पूर्वारग्निमध्ये ॐ ह्रों स्थाणवीशदीर्घजिह्वाभ्यां नमः॥९॥

'दक्षिणनैर्ऋतयोर्मध्ये' ॐ ह्रीं हरेशकुण्डोदरीभ्यां नमः॥१०॥

पक्ष्चिमवायुमध्ये' ॐ ह्रीं झिंटीशोर्ध्वकेशीभ्यां नमः॥११॥

'उत्तरेशानमध्ये' ॐ ह्री भौतिकेशविकृतमुखीभ्यां नमः॥१२॥

'अग्निदक्षिणमध्ये' ॐ ह्रीं सद्योजातेशज्वालामुखीभ्यां नमः॥१३॥

निर्ऋतिवरुणमध्ये' ॐ ह्रीं अनुग्रहेशोल्कामुखीभ्यां नमः॥१४॥

'वायुसोममध्ये' ॐ ह्री अक्रूरेशश्रीमुखीभ्यां नमः॥१५॥

ईशानपूर्वमध्ये' ॐ ह्री महासेनेशविद्यामुखीभ्यां नमः॥१६॥

इति संपूज्य मूलेन पूर्ववत्पुष्पाञ्जलिं दद्यात्॥

इति सप्तमावरणम्॥७॥

भूपुरस्य द्वितीयरेरवायां दिग्दिगन्तरालेषु षोडशस्थानेषु क्रोधीश्वराद्याषाढान्तान् यजेत्।

'पूर्वे' ॐ ह्री क्रोधीशमहाकालीभ्यां नमः॥१॥

'दक्षिणे' ॐ ह्रीं चण्डीशसरस्वतीभ्यां नमः॥२॥

'पश्चिमे' ॐ ह्रीं पञ्चान्तकेशसर्वसिद्धिगौरीभ्यां नमः॥३॥

'उत्तरे' ॐ ह्रीं शिवोत्तमेशत्रैलोक्यविजयाभ्यां नमः॥४॥

'आग्नेय्याम्' ॐ ह्रीं एकरुद्रेशमंत्रशक्तिभ्यां नमः॥५॥

'नैर्ऋत्याम्' ॥ ॐ ह्री कूर्मेशात्मकशक्तिभ्यां नमः॥६॥

'वायव्याम्' ॐ ह्री एकनेत्रेशभूतमातृकाभ्यां नमः॥७॥

'दक्षिणनैर्ऋतमध्ये' ॐ ह्री सर्वेशनागरीभ्यां नमः॥१०॥

'पूर्वाग्नि' ॐ अजेशद्राविणीभ्यां नमः॥९॥

'पक्ष्चिमवायुमध्ये' ॐ ह्रीं सोमेशरवेचरीभ्यां नमः॥११॥

'उत्तरेशानमध्ये' ॐ ह्रीं लाङ्गलीशमञ्जरीभ्यां नमः॥१२॥

'अग्निनयाम्यमध्ये' ॐ ह्रीं दारुकेशरूपिणीभ्यां नमः॥१३॥

'नैर्ऋतपक्ष्चिममध्ये' ॐ ह्रीं अर्धनारीशवीरणीभ्यां नमः।।१४।।

'वायुसोममध्ये' ॐ ह्रीं उमाकान्तेशकाकोदरीभ्यां नमः।।१५।।

'ईशानपूर्वमध्ये' ॐ आषाढेशपूतनाभ्यां नमः।।१६।।

इति पूजयेत्।।

मूलमन्त्रेण पुष्पाञ्जलिं दद्यात्।।

इति अष्टमावरणम्।।८।।

भूपुरस्य तृतीयरेखायां तिग्विदिगन्तरालेषु षोडश स्थानेषु दण्डीश्वरादिभृग्वीशान्तान् पूजयेत्।।

तत्र 'पूर्वो' ॐ ह्री दण्डीशभद्रकालीभ्यां नमः।।१।।

'दक्षिणे' ॐ ह्री अत्रीशयोगिनीभ्यां नमः।।९।।

'पश्चिमे' ॐ ह्री मीनेशशङ्खिनीभ्यां नमः।।६।।

'उत्तरे' ॐ ह्रीं मेषेशसर्जनीभ्यां नमः।।४।।

'आग्नेय्याम्' ॐ ह्रीं लेहितेस्शाकालरात्रीभ्यां नमः।।५।।

'नैर्ऋत्याम्' ॐ ह्रीं शिरवीशकुञ्जिकाभ्यां नमः।।६।।

'वायव्याम्' ॐ ह्रीं छागलेशकपर्दिनीभ्यां नमः।।७।।

'ऐशान्याम्' ॐ ह्री द्विरण्डेशवज्रिणीभ्यां नमः।।९।।

'पूर्वाग्निमध्ये' ॐ ह्रीं महाकालेशजयाभ्यां नमः।।२।।

'दक्षिणनैर्ऋतमध्ये' ॐ ह्रीं त्वगात्माभ्यां वालेशसुमुरवेश्वरीभ्यां नमः।।१०।।

'पश्चिमवायव्यमध्ये' ॐ ह्रीं असृगात्मभ्यां भुजङ्गेशरेवतीभ्यां नमः।।११।।

'उत्तरेशानयोर्मध्ये' ॐ मांसात्मभ्यां पिनाकीशमाधवीभ्यां नमः।।१२।।

'आरनेयदक्षिणमध्ये ॐ ह्रीं मेदात्मभ्यांरवङ्गीवारुणीभ्यां नमः।।१३।।

'नैर्ऋतपर्श्चिममध्ये' ॐ ह्रीं अस्थ्यात्मभ्यां वकेशवायवीभ्यां नमः।।१४।।

'वायुसोममध्ये' ॐ ह्रीं मज्जात्म श्वेतेशरक्षे वधारिणीभ्यां नमः।।१५।।

Śiva Kosha

'इशानपूर्वमध्ये ॐ ह्रीं शुक्रकात्मभ्यां भृग्वीशसहजाभ्यां नमः॥१६॥

ततो भूपुराद्बहिः दक्षिणभागे लकुलेशादित्रयं पूजयेत्।

ॐ ह्री प्राणःत्मभ्यां लकुलीशलक्ष्मीभ्यां नमः॥१॥

ॐ ह्रीं शक्त्यात्मभ्यां शिवेशव्यापिनीभ्यां नमः॥२॥

ॐ ह्री क्रोधात्मभ्यां संवर्तकेशमहामायाभ्यां नमः॥३॥

'ईशानभागे' ॐ ह्रीं योगिनीसहितेभ्यो दिव्ययोगीश्वरेभ्यो नमः॥४॥

'आग्नेयकोणे' ॐ ह्रीं योगिनीसहितेभ्योन्तरिक्षरयोगीश्वरेभ्वो नमः॥५॥

'नैऋतकोणे' ॐ ह्रीं योगिनीसहि तभूमिस्थयोगीश्वरेभ्यो नमः॥१६॥

'पूर्वो' गं गणपतये नमः॥७॥

'दक्षिणे' भैं भैरवाय नमः॥८॥

'पश्र्चिमे' क्षें क्षेत्रपालाय नमः॥९॥

'उत्तरे' दु दुर्गायै नमः॥१०॥

इति संपूज्य मूलमन्त्रेण पुष्पाञ्जलिं दक्षात्॥

इति नवमावरणम्॥९॥

भूपुराद्बहिः पूर्वादिदशादिक्षु इन्द्रादीन् पूजयेत्॥

ॐ ह्रीं लं इन्द्रायनमः॥१॥

ॐ ह्रीं रं अग्नये नमः॥२॥

ॐ ह्रीं मं यमायनमः॥३॥

ॐ ह्रीं क्षं निऋतये नमः॥४॥

ॐ ह्री वं वरुणाय नमः॥५॥

ॐ ह्री यं वायवे नमः॥६॥

ॐ ह्री सं सोमाय नमः॥७॥

ॐ ह्री इं ईशानाय नमः॥८॥

ॐ ह्री आं ब्रह्मणे नमः॥९॥

ॐ अं अनन्ताय नमः॥१०॥

इति संपूज्य मूलमन्त्रेण पुष्पाञ्जलिं दद्यात्।

इति दशमावरणम्॥१०॥

ततः पुर्वादिक्रमेण इन्द्रादिदिक्पालसमीपे स्वस्वायुधान्पूजयेत्।

तद्यथा-ॐ वज्राय नमः॥१॥

ॐ शक्तये नमः॥२॥

ॐ दण्डाय नमः॥३॥

ॐ रवड्गाय नमः॥४॥

ॐ पाशाय नमः॥५॥

ॐ अङ्कुशाय नमः॥६॥

ॐ गदायै नमः॥७॥

ॐ त्रिशूलाय नमः॥८॥

ॐ पद्माय नमः॥९॥

ॐ चक्राय नमः॥१०॥

इति संपूज्य मूलेन पुष्पाञ्जलिं दद्यात्।

इति एकादशमावरणम्॥११॥

एवमावरणपूजां कृत्वा मूलमन्त्रेण धूपदीपनैवेद्यताम्बूलदक्षिणानीराजनादिभिर्भैरवं संपूज्य स्तवराजेन स्तुत्वा साष्टाङ्गं प्रणम्य यथाविधि जपं कुर्यात्।

अस्य पुरश्चरणमेकविंशतिलक्षात्मकम्।

ततो जपान्ते मधुरसंयुतैस्तिलर्धशांशं होमं कृत्वा तत्तहदांशेन तर्पणमार्जनब्राह्मणभोजनानि कुर्य्यात्।

होमान्ते वा चतुर्दश्यां वाष्टम्यां मध्यरात्रे महाबलिदानं कार्य्यम्॥

एवं सिद्धे मन्त्रे स्वकार्यार्थे प्रयोगान्साधयेत्।

तथा च (शारदातिलके) "वर्णलक्षं जपेन्मन्त्रं हविष्याशी जितेन्द्रियः॥

तद्दशांशं प्रजुहुयात्तिलैर्मधुरसंयुतैः॥१॥

इति संपूजयेद्देवं वटुकं प्रोक्तवर्त्मणा॥

धर्मार्थकाममोक्षणां पतिर्भवति मा नवः॥२॥

विघ्नदुर्गां समाराध्य बलिंदत्त्वा विधानतः॥

काम्यानि साधयेन्मन्त्री यथोक्तां सिद्धिमाप्नुयात्॥३॥

शाल्यन्नी पललं सर्पिर्लाजाचूर्णानि शकरा॥

गुडमिक्षुरसापूपैर्मध्वक्तैः परिमिश्रतैः॥४॥

कृत्वा कवलमाराध्य देवं प्रागुक्तवर्त्मना॥

रक्तचन्दनपुष्पाद्यैर्निशि तस्मै बलिं हरेत्॥५॥

ततः सिध्यन्ति कार्याण बलिनानेन मन्त्रिणः॥

जुहुयात्सर्पिषा मन्त्री यथोक्तां सिद्धिमाप्नुयात्॥६॥

वश्याय जुहुयाद्दिक्षु शकलैर्वशयेज्जनान्॥

जुहुयात्पुत्रलाभाय प्रफुल्लैः कैरवैः सुधीः॥७॥

धनधान्यादिसंपत्त्यै जुहुयात्तिलतण्डुलैः॥

बिल्वप्रसूनैर्जुहुयान्महतीं विन्दति श्रियम्॥८॥

लोणैर्मधुरसंमिश्रैर्वशयेद्वनिताजनाम्॥

वृष्टिकामेन होतव्यं वेतसानां समिद्वरैः॥९॥

अन्नेन जुहुयान्नित्यं धनधान्यादिसंपदे॥

वश्याय जुहुयान्मन्त्री मधुना दिवसत्रयम्॥१०॥

रोगोक्तौषधहोमेन रोगा नश्यन्ति तत्क्षणात्॥

कृत्याध्द्रोहे ग्रहद्रोहे भृतापस्मारसंभवे॥११॥

व्याघ्राजिने समासीनो जुहुयादयुतं तिलैः॥

भूतादयः पलायन्ते नेक्षन्ते तां दिशं भयात्॥१२॥

कृष्णाष्टमीं समारभ्य यावत्सयात्तच्चतुर्दशी॥
तिलैस्तण्डुलसंमिश्रैर्मधुरत्रयलोलितैः॥१३॥
त्रिसहस्त्रं प्रतिदिनं जुहुयात्संस्कृतेनले॥
वटुकेश्वरमभ्यर्च्य भक्ष्यभोज्यफलान्वितम्॥१४॥
नित्यं निवेद्यं नैवेद्यं मध्यरात्रे बलिं हरेत्॥
एवं जपित्वा प्रयतः सहस्त्राण्येकाविंशतिम्॥१५॥
समाप्तिदिवसे रात्रावजं हुत्वा बलिं हरेत्॥
ततः कारयिता राजा तोषयेत्साधकं धनैः॥१६॥
विधिनानेन संतुष्टो वटुकेशः प्रयच्छति॥
तेजो बलं यशः पुत्रान्कान्ति लक्ष्मीमरोगताम्॥१७॥
नशयन्ति शत्रवः सर्वे वर्द्धन्ते बन्धुबान्धवाः।
अवग्रहो न जायेत विषये तस्य भूपतेः॥।१८॥
जुहुयात्केवलैलोणैरयुतं स्तम्भनेच्छया॥
निविडादिविमोक्षाय प्रयोगोयमुदाहृतः॥१९॥
वचाचूर्णपलं जप्तं गव्येनाज्येन लेलितम्॥
विभज्य भक्षयेद्वन्ध्या मण्डलात्पुत्रकांक्षिणी॥२०॥
विनीतं पुत्रमाप्नोति मेधारोग्यबलान्वितम्॥
आदावन्ते प्रयोगस्य वटुकाय बलिं हरेत्॥२१॥
द्विविधो बलिराख्यातो राजसः सात्त्विको बुधः॥
राजसो मांसरक्ताढ्यः पलत्रयसन्वितः॥२२॥
मुद्गापायससंयुक्तो मधुरत्रयलोलितः॥
सात्त्विको मांसरहितः शेषमन्यत्पुरोक्तवत्॥२३॥
ब्राह्मणो विनयः शुद्धः सात्त्विकः बलिमाहरेत्॥

साधयेन्मनुनानेन भस्म सर्वार्थसिद्धिदम्॥२४॥
उशीरं चन्दनं कोष्ठं धनसारं सकुंकुमम्॥
श्वेतार्कमूलं वाराही लक्ष्मी क्षीरमहीरुहम्॥२५॥
त्वचो बिल्वतरोर्मूलं शोषयित्वा सुचूर्णागे॥
चूर्णं व्योम्नि गृहे तेन गोमयेन विमिश्रितम्॥२६॥
कृत्वा पिण्डानि संशोष्य संस्कृते हव्यवाहने॥
मूलेन दरध्वा तद् भस्म शुद्धपात्रे विनिक्षिपेत्॥२७॥
केतकी मालतीपुष्पैः वासयेत् भस्म शोधितम्॥
अयुतं प्रजपेन्मन्त्रं स्पृष्टा भस्म सुपूजितम्॥२८॥
एतदादाय दिनशः प्रातः पुण्ड्रं करोति यः॥
तस्य रोगाः प्रणश्यन्ति कृत्याद्रोहमहाग्रहाः॥२९॥
रिपुचौरमृगादिभ्यो भयस्तस्य न जायते॥
वर्द्धन्ते संपदः सर्वाः पूज्यते सकलैर्जनैः॥३०॥
राजा वश्यो भवेत्तस्य सामात्यः सपरिच्छदः॥
अभिषेकं प्रकुर्वीत राज्ञो विजयकांक्षिणः॥३१॥
पूर्वोक्तमण्डले क्लृप्ते वितानध्वजशोभिते॥
सर्वतोभद्रमालिरव्य कर्णिकां तस्य पूरयेत्॥३२॥
अष्टद्रोणप्रमाणेन शलिभिः शोधितैः शुभैः॥
तदर्धां तण्डुलांस्तस्मिन्न्यस्य दूर्वांकुरान्वितान्॥३॥
हेमादिविहितं कुम्भं नवरत्नसमन्वितम्॥
संस्थाप्य विमलैस्तोयैरापूयास्मिन्विनिःक्षिपेत्॥३४॥
क्षीरद्रुमप्रवालानि लक्ष्मीदूर्वां सहां पुनः॥
कर्पूरं चन्दनं बिल्वमुर्शारं कुङ्कुमं पुनः॥३५॥

कंकोल मगुरुं जातिं मल्लिकां चम्पकोत्पलैः॥
गोमेदं दाडिमं पश्चात्पट्टयुग्मेन वेष्टयेत्॥३६॥
तस्मिन्नवाह्य बटुकं राजसं संप्रपूजयेत्॥
बहिरष्टसु कुंभेषु भैरवानष्टं पूजयेत्॥३७॥
त्रयोदशसु कुंभेषु त्रयोदश गणान्यजेत्॥
बाह्ये दशसु कुम्भेषु लोकेशानर्चयेत्सुधीः॥३८॥
तद्वहिर्द्वयष्टकुम्भेषु श्रीकण्ठादीन्सुरेश्वरान्॥
पञ्चत्रिंशद्धटेष्वर्चेत्कादिवर्णेश्वरान्क्रमात्॥३९॥
इति गन्धादिभिः सम्यक् पञ्चावरणमर्चयेत्॥
अयुतं प्रजपेत्स्पृष्टवा तान्घटाम्देशिकोत्तमः॥४०॥
पायसैः सर्पिषा शुद्धैः तिलैर्देशशतं पृथक्॥
लुहुयात्तान्घटान्सपृष्टवा प्रत्यहं बलिमाहरेत्॥४१॥
राजसोक्तप्रकारेण रात्रौ देशिकसत्तमः॥
सुदिनेशोभने लंग्ने वाचयित्वा द्विजन्मभिः॥४२॥
स्वस्तिमङ्गलवाक्यानि विशुद्धैर्वेदपारगैः॥
नदत्सु पञ्चवाद्येषु प्रणम्य वटुकेश्वरम्॥४३॥
जितेन्द्रियं शुद्धकायं राजानं ब्राह्मणप्रियम्॥
आस्तिकं सत्यवचनमभिषिञ्चेत्प्रसन्नधीः॥४४॥
अभिषिक्तो नरपतिः प्रणिपत्य गुरुं परम्॥
भूयसीं दक्षिणां दद्यात्प्रसीदति यथा गुरुः॥४५॥
राजभिषितो भवतिसाक्षाद्भूमिपुरन्दरः॥
परान् विजयते भूपानस्तूयते सकलैर्नरैः॥४६॥यसा
कृताभिषेकः षण्मासं प्रतिमासं महीपतिः॥

चतुरम्भोधिवेलायां शास्ति सर्वां वसुन्धराम्॥४७॥
गजाश्वशान्तिधये तेषां शालासु साधकः॥
कुण्डं कृत्वा विधानेन होमं कुर्याद्यथाविधि॥४८॥
पायसाज्यै स्तिलैर्विद्वानयुतत्रितयावधि॥
ब्राह्मणान्भोजयेऐन्नित्यं भक्ष्यभोज्यफलादिभिः॥४९॥
प्राक्प्रोक्तविधिना कुम्भान्स्थापयित्वात्र देशिकः॥
अभ्यर्च्य गन्धपुष्पाद्यैस्तज्जलैः प्रोक्षयेद्गजान्॥५०॥
अश्वशालामनेनैव वर्द्धन्ते ते दिनेदिने॥
युद्धेषु महती शक्तिर्जायते पूर्वतोधिका॥५१॥
सर्वेरोगाः प्रणश्यन्ति कृत्याद्रोहाः परैः कृताः॥
अस्मात्परतरा रक्षा नास्ति तेषां महीतले॥५२॥
अभिषिच्य मंहीपालं परेषां विजयोद्यतम्॥
उक्तेन विधिना मन्त्री यमिन्यां बलिमाहरेत्॥५३॥
अन्यूनाङ्गमजं हत्वा राजयं प्रागुदाहृतम्॥
बलिप्रदानसमये रिपूणां सर्वसैन्यकम्॥५४॥
निवेदयेद्बलित्वेन बटुकाय विशिष्टधीः॥
विदर्भयेच्छत्रुनाम्ना बलिमन्त्रं तथा सुधीः॥५५॥
शत्रुपक्षस्य रुधिरं पिशितं च दिन दिने॥
भक्षयस्व गणैः सार्द्धं सारमेयमसन्वित॥५६॥
बलिमन्त्रोयमारव्यातः सर्वेषां विजयप्रदः॥
अनेन बलिना हृष्टो बटुकः परसैन्यकम्॥५७॥
सर्वे गणेभ्यो विभजेदामिषं क्रुद्धमानसः॥
एवं कृते परबलं क्षीयते नात्र संशयः॥

विजयश्रियमेतेन राजा प्राप्नोत्ययत्नतः॥५८॥

श्रीमायास्मरकूटमत्रा विलिखेन्मध्ये दलेष्वष्टसु द्विः प्रोक्तं बटुकाय शब्दमपरान्मपरान्मन्त्रस्य वर्णान् बहिः॥

अष्टद्वन्द्वदलेषु तद्बहिरधरस्तत्स रव्यपत्रेष्वेथ द्वात्रिंशद्दलकादिसान्तसहितं यन्त्रं लिकेद्भूपुरे॥५९॥

आपदुद्धारणं यन्त्रमपमृत्युभयापहम्॥

सर्वसम्पत्प्रदं नित्यं सर्व सौभाग्यदायक्॥६०॥

रक्षाकरं ग्रहार्तानां राज्ञां विजयवर्द्धनम्॥

आपदुद्धारणादस्मादापदुद्धारणक्षमः॥६१॥

तन्त्रेषु नास्ति मन्त्रोन्य इत्याहुर्मन्त्रवेदिनः॥

इति रुद्रयामलशारदातिलकोक्तमापदुद्धारणबटुक भैरवविधानम्॥

अथ बटुकभैरवब्रह्मकवचं (रुद्रयामले) श्रीदेव्युवाच॥

"भगवन् सर्ववेत्ता त्वं देवानां प्रीतिदायकम्॥

भौरवं कवचं ब्रूहि यदि चास्ति कृपा मयि॥१॥

प्राणत्यागं करिष्यामि यदि नो कथयिष्यति॥

सत्यं सत्यं पुनः सत्यं सत्यमेव न संशयः॥२॥

इत्थं देव्या वचः श्रुत्वा प्रहस्याति स्वयं प्रभः॥

उवाच वचनं तत्र देवदेवो महेश्वरः॥३॥

ईश्वर उवाच॥

बटुकस्य कवचं दिव्यं श्रृणु यत्प्राणवल्लभे॥

चण्डिकातन्त्रसर्वस्वं बटुकस्य विशेषतः॥४॥

तत्र मन्त्राद्यक्षरं तु वासुदेवस्वरूपकम्॥

शंरववर्णद्वयो व्रह्मा बटुकं चन्द्रशेरवरः॥५॥

आपदुद्धारणो देवो भैरवः परिकीर्तितः॥६॥

प्रणतं कामद विद्याल्लज्जबीजं च सिद्धिदम्।।
बटुकायेति विज्ञेयं महापातकनाशनम्।।७।।
आपदुद्धारणायेति त्वापदुद्धारणं नृणाम्।।
कुरु द्वयं महेशानि मोहने परिकीर्तितम्।।८।।
बटुकाय महेशानि स्तम्भने परिकीर्तितम्।।
लज्जाबीजं तथा विद्यान्मुक्तिदं परिकीर्तितम्।।९।।
द्वाविंशत्यक्षरो मंत्रः क्रमेण जगदीश्वरि।।
"ॐ अस्य श्रीबटुकभैरवब्रह्मकवचस्य भैरव ऋषिः।
अनुष्टुप् छंदः।
श्रीबटुकभैरवो देवता।
मम बटुकभैरव प्रसादसिद्ध्यर्थे जपे विनियोगः।
ॐ पातु शिरसि नित्यं पातु ह्रीं कठदेशके।।१०।।
बटुकाय पातु नाभौ चापदुद्धारणायच।।
कुरु द्वयं लिंगमूले त्वाधारे वटुकाय च।।११।।
सर्वदा पातु ह्रीं बीजं बाह्वोर्युगलमेव च।।
षडंगसहितो देवो नित्यं रक्षतु भैरवः।।१२।।
ॐ ह्री बटुकाय सततं सर्वांगं मम सर्वदा।।
ॐ ह्रीं पादौ महाकालः पातु वीरसनो हृदि।।१३।।
ॐ ह्री कालः शिरः पातु कण्ठदेशे तु भैरवः।।
गणराट् पातु जिह्वायामष्टभिः शक्तिभिः सह।।१४।।
ॐ ह्रीं दण्डपाणिर्गुह्यमूले भैरवीसहितस्तथा।।
ॐ ह्रीं विश्वनाथः सदा पातु सर्वांगं मम सर्वदा।।१५।।
ॐ ह्रीं अन्नपूर्णा सदा पातु चांसौ रक्षतु चण्डिका।।

असिताङ्गः सशिरः पातु ललाटं रुरुभैरवः॥१६॥
चण्डभैरवः पातु वक्त्रंकण्टं श्रीक्रोधभैरवः॥
उन्मत्त भैरवः पातु हृदयं मम सर्वदा॥१७॥
नाभिदेरो कपाली चलिंगे भीषण भैरवः॥
संहारभैरवः पातु मृलाधारं च सर्वदा॥१८॥
बाहुयुग्मं सदा पातु भैरवो मम केवलम्॥
हंसबीजं पातु हृदि सोहं पाणी च रक्षतु॥१९॥
प्राणपानौ समानं च उदानं व्यानमेव च॥
रक्षन्तु हारमूले च दशदिक्षु समन्ततः॥२०॥
प्रणवः पातु सर्वाङ्गं लज्जाबीजं महाभये॥
इति श्रीब्रह्मकवचं भैरवस्य प्रकीर्तितम्॥२१॥
चतुर्वर्गप्रदं नित्यं स्वयं देवप्रकाशितम्॥
यः पठेच्छृणुयान्नित्यं धार्य्यतेकवचोत्तमम्॥२२॥
सदानन्दमयो भूत्वा लभते परमं पदम्॥
य इदं कवचं देवि चिन्तयेन्मन्मुरवोदितम्॥२३॥
कोटिजन्मार्जित पापं विनश्यति च तत्क्षाणत्॥
जलमध्येग्निमध्ये वा दुर्ग्रहे शत्रुसंकटे॥२४॥
कवचस्मरणाद्देवि सर्वत्र विजयी भवेत्॥
भक्तियुक्तेन मनसा कवचं पूजयेद्यदि॥२५॥
कामतुल्यस्तु नारीणां रिपुणं च यमोपमः॥
तस्य पादाम्बुजद्वंद्वं राज्ञां मुकुटभुषणम्॥२६॥
तस्य भूतिं विलोक्यैव सुबेरोपि तिरस्कृतः॥
अस्य विज्ञानमात्रेण मन्त्रसिद्धिर्न संशयः॥२७॥

इदं कवचमज्ञात्वा यो जपेद्वटुकं नरः॥

न चाप्नोति फलं तस्य परंनरकमाप्नुयात्॥२८॥

मन्वन्तरत्रयं स्थित्वा तिर्यग्योनिषु जायते॥

इह लोके महारोगी दारिद्रयेणातिपीडीतः॥२९॥

शत्रूणां वशगोभूत्वा करपात्री भवेञ्जडः॥

देयं पुत्रायशिष्याय शान्ताय प्रियवादिने॥३०॥

कार्पण्यरहितायालं बटुभक्तिःरताय च॥

औपराग्ये प्रदाता वै तस्य तस्याति सत्वरम्॥३१॥

आयुर्विद्या यशो धर्मे बलं चैव न संशयः॥

इति ते कथितं देवि गोपनीयंस्वयोनिवत्॥३२॥

इति श्रीरुद्रयामले श्रीबटुकभैरव ब्रह्मकवचं सम्पूर्णम् शुभमस्तुः॥"

"अथ बटुकभैरवस्तवराजो लिख्यते॥

(रुद्रयामले)-मेरुपृष्टे सुखासीनं सुखासीनें देवदेवं त्रिलोचनम्॥

शंकरं परिपप्रच्छ पार्वती परमेश्वरम्॥१॥

श्रीपार्वत्युवाच॥३॥

य एष भैरवो नाम आपदुद्धारको मतः॥

त्वया च कथितो देव भैरवः कल्प उत्तमः॥२॥

तस्य नासस्त्राणि प्रयुतान्यर्बुदानि च॥

सारमुद्धृत्य तेषां वै नामाष्टशतकं वद॥३॥

यानि संकीर्तयन्मर्त्यः सर्वदुः रवविवर्जितः॥

सर्वान्कामानवाप्नोति साधक सिद्धिमेव च॥४॥

ईश्वर उवाच॥

श्रृणु देवि प्रवक्ष्यमि भैरवस्य महात्मनः॥

आपदुद्धारणस्येह नामाष्टशतमुत्तम्॥५॥

सर्वपापहरं पुण्यं सर्वापद्विनिवारणम्॥

सर्वकामार्थदं देवि साधकानां सुखावहम्॥६॥

सर्वमङ्गल माङ्गल्यं सर्वोपद्रवनाशनम्॥

आयुःकरं पुष्टिकरं श्रीकरं च यशस्करम्॥७॥

तत्र प्रयोगः॥ ॐ अस्य श्रीवटुकभैरवनामाष्टशतस्तोत्रमन्त्रस्य बृहदारण्यक ऋषिः।

श्रीवटुकभैरवो देवता।

अष्टबाहुमिति बीजम्।

त्रिनयनमिति शक्तिः।

प्रणवः कीलकम्।

ममाभीष्टसिदद्ध्यर्थे जपे विनियोगः॥

ॐ बृहदारण्यकऋषये नमः।

शिगसि॥१॥

ॐ अनुष्टुप्छन्दसे नमः।

मुरवे॥२॥

ॐ श्रीवटुकभैरवदेवतायै नमः।

हृदये॥३॥

ॐ अष्टबाहुमिति बीजाय नमः।

गुह्ये॥४॥

ॐ त्रिनयनेति शक्तये नमः।

पादयोः॥५॥

ॐ कीलकाय नमः।

नाभौ॥६॥

ॐ विनियोगाय नमः।

सर्वांगे॥७॥

इति ऋष्यादिन्यासः॥

ॐ ह्रां वां ईशानः सर्व विद्यानामीश्वरः मर्वभूतानां ब्रह्माधिपतिब्रह्मणोधि पतिब्रह्मा शिवोमे अस्तु सदाशिवोम।

अङ्गुष्ठाभ्यां नमः॥१॥

ॐ ह्रीं वीं तत्पुरुषाय विद्महे महादेवाय धीमहि॥

तन्नो रुद्रः प्रचोदयात् तर्जनीभ्यां नमः॥२॥

ॐ हूं वूं अघोरेभ्योथघोरेभ्यो घोरघोरतरेभ्यः सर्वेभ्यः सर्वशर्वेभ्यो नमस्तेअस्तु रुद्ररूपेभ्यः॥

मध्यमाभ्यां नमः॥३॥

ॐ ह्रैं वैं वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो

रुद्राय नमः कालाय नमः।

कलविकरणायनमो बलविकरणायनमः बलाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः।

अनामिकाभ्यां नमः॥४॥

ॐ ह्रौं वौं सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः॥

भवेभवेनातिभवे भवस्व मां भवोद्भवाय नमः।

कनिष्ठिकाभ्यां नमः॥५॥

ॐ ह्रः वः पञ्चवक्त्राय महादेवाय नमः।

करतलकरपृष्टाभ्यां नमः॥६॥

इति करन्यासः।

एवं हृदयादिन्यासं कृत्वा देहन्यासं कुर्यात्॥

ॐ ह्रीं भैरवाय नमः।

मूर्ध्नि॥१॥

ॐ ह्रीं भीमदर्शनाय नमः। ललाटे॥२॥

ॐ ह्रीं भूताश्रयाय नमः।

नेत्रयोः॥३॥

ॐ ह्रीं भूतनायकाय नमः।

कर्णयोः॥४॥

ॐ ह्रीं त्रिशूलाय नमः।

नासिकायाम्॥५॥

ॐ ह्री रक्तपाय नमः जिह्वायाम्॥६॥

ॐ ह्रीं नागहारनागयज्ञोपवीतिकाय नमः।

कण्ठमध्ये॥७॥

ॐ ह्रीं क्षेत्रज्ञाय नमः।

कर्णयोः॥८॥

ॐ ह्री क्षेत्रपालाय नमः।

हृदये॥९॥

ॐ ह्रीं क्षेत्रदाय नमः नाभौ॥१०॥

ॐ ह्रीं सर्वौघनाशनाय नमः।

कट्याम्॥११॥

ॐ ह्रीं त्रिनेत्राय नमः।

ऊर्वोः॥१२॥

ॐ ह्रीं रक्तपायिने नमः।

जंघयोः॥१३॥

ॐ ह्रीं देवदेवेशाय नमः पादयोः॥१४॥

ॐ ह्रीं बटुकाय नमः।

सर्वाङ्गे॥१५॥

इति देहन्यासः।

ॐ ह्रीं भैरवाय नमः।

अङ्गुष्ठाभ्यां नमः॥१॥

ॐ ह्री भीमदर्शनाय तर्ज्जनीभ्यां नमः॥२॥

ॐ ह्रीं भूतश्रेष्ठाय मध्यमा॥३॥

ॐ ह्रीं भूतनायकाय अनामिका॥४॥

ॐ ह्रीं क्षत्रियाय कनि॥५॥

ॐ ह्रीं क्षेत्रपालाय करत॥६॥

ॐ ह्रीं क्षेत्रज्ञाय दिग्दिशायाम्॥७॥

ॐ भैरवाय नमः।

सर्वाङ्गे॥८॥

इति करन्यासः।

ॐ ह्रीं भैरवाय नमः शिरसि॥१॥

ॐ ह्रीं भीमदार्शनायः ललाटे॥२॥

ॐ ह्रीं भूतहननाय नमः।

नेत्रयोः॥३॥

ॐ ह्रीं सारमेयानुगायः भ्रुवो॥४॥

ॐ ह्रीं भूतनाथायः कर्णयोः॥५॥

ॐ ह्रीं प्रेतवाहकाय नमः।

कपोलयोः॥६॥

ॐ ह्रीं भस्माङ्गाय नमः।

नासापुटे।

ॐ ह्रीं सर्पभूषणाय: ओष्ठयो:॥८॥

ॐ ह्रीं आदिनाथाय: मुखे॥९॥

ह्रीं शक्तिहस्ताय:।

गले॥१०॥

ॐ ह्रीं दैत्यशमनाय: स्कन्धयो:॥११॥

ॐ ह्रीं अतुलतेजसे नम:।

बाह्वो:॥१२॥

ॐ ह्रीं कपालिने नम:।

करयो:॥१३॥

ॐ ह्रीं मुण्डमालिने नम:।

हृदये॥१४॥

ॐ ह्रीं शान्ताय: वक्ष:स्थले॥१५॥

ॐ ह्रीं कामचारिणे नम: स्तन्यो॥१६॥

ॐ ह्रीं सदातुष्टाय उदरे॥१७॥

ॐ ह्रीं क्षेत्रेशाय पार्श्वयो:॥१८॥

ॐ ह्रीं क्षेत्रपालाय पृष्ठे॥१९॥

ॐ ह्रीं क्षेत्रज्ञाय नाभौ॥२०॥

ॐ ह्रीं पापौघनाशनाय कट्याम्॥२१॥

ॐ ह्रीं बटुकाय लिङ्गे॥२२॥

ॐ ह्रीं रक्षाकराय गुदे॥२३॥

ॐ ह्रीं रक्तलोचनाय ऊर्वो:॥२४॥

ॐ ह्रीं घुर्घुराय नम:॥

जानुनोः॥२५॥

ॐ ह्रीं रक्तपायिने नमः।

जंघयोः॥२६॥

ॐ ह्रीं सिद्धपादुकाय गुल्फयोः॥२७॥

ॐ ह्रीं सुरेश्वराय पादपृष्ठे॥२८॥

ॐ ह्रीं आपदुद्धारकायः आपादतलस्तकपर्यंतम्॥२९॥

ॐ ह्रीं सिद्धपादुकायः गुल्फयोः॥२७॥

ॐ ह्रीं सुरेश्वरायः पादपृष्ठे॥२८॥

ॐ ह्रीं क्ष्म्रौं ब्लौं ह्रीं ॐ स्वाहा आपदुद्धारणभैरवाय नमः सर्वाङ्गे॥

इति व्यापकं कुर्यात्॥

इत्यङ्गन्यासः॥

अथ दिङ्न्यासः।

ॐ ह्रीं डमरुहस्ताय नमः।

पूर्वे॥१॥

ॐ ह्रीं दंडधारिणे नमः दक्षिणे॥२॥

ॐ ह्रीं खड्गहस्ताय नमः।

पश्चिमे॥३॥

ॐ ह्रीं घण्टावादिने नमः।

उत्तरे॥४॥

ॐ ह्रीं अग्निवर्णायः आग्नेय्याम्॥५॥

ॐ ह्रीं दिगम्बराय नमः।

नैर्ऋत्याम्॥६॥

ॐ ह्रीं सर्वबूतस्थाय वायव्याम्॥७॥

ॐ ह्रीं अष्टयसिद्धिदाय ऐशान्याम्॥८॥

ॐ ह्रीं खेचरिणे नमः।

ऊर्ध्वम्॥९॥

ॐ ह्रीं रौद्ररूपिणे पाताले॥१०॥

इति दिङ्न्यासः॥

ॐ ह्रीं रुद्रायनमः।

ॐ अङ्गुष्ठाभ्यां नम॥१॥

ॐ ह्रीं शिखीसखाय तर्ज्ज॥२॥

ॐ ह्रीं शिवाय मध्या भाभ्यां॥३॥

ॐ ह्रीं त्रिशूलिने अना मिकाभ्यां॥४॥

ॐ ह्रीं ब्रह्मणे कनि ठिकाभ्या॥५॥

ॐ ह्रीं त्रिपुरांतकाय नमः।

करतलयोः॥६॥

ॐ ह्रीं मांसाशिने कराग्रेषु॥७॥

ॐ ह्रीं दिगम्बराय नमः।

करपृष्ठयोः॥८॥

इति करन्यासः॥

ॐ ह्रीं भूतनाथाय नमः।

हृदये॥१॥

ॐ ह्रीं आदिनाथाय नमः।

मूर्ध्नि॥२॥

ॐ ह्रीं आनन्दनाथाय शिखायाम्॥३॥

ॐ ह्रीं सिद्धशावरनाथाय कवचाय हुं॥४॥

ॐ ह्रीं सहजानन्दनाथाय नेत्रयोः॥५॥

ॐ ह्रीं श्रीआनन्दनाथाय अस्त्राय॥

इति षडङ्गन्यासः॥

ॐ अस्य श्रीबटुकभैरवमन्त्रस्य बृहदारण्यक ऋषिः।

अनुष्टुप् छन्दः।

श्रीबटुकभैरवो देवता।

वं बीजम्।

ह्रीं शक्तिः।

ॐ कीलकम्।

श्रीबटुकभैरवप्रसादसिद्ध्यर्थे स्तोत्रादौ अष्टोत्तरशतमूलमन्त्रजपे विनियोगः॥

अथ मन्त्रन्यासः।

ॐ ह्रीं अङ्गु॥१॥

ॐ बटुकाय तर्ज॥२॥

ॐ आपदुद्धारणाय मध्य॥३॥

ॐ कुरुकुरु अना॥४॥

ॐ ह्रीं कनिष्ठिकाभ्यां नमः॥५॥

एवं न्यासविधिं कृत्वा ध्यांयेत्।

अथ ध्यानम् -शुद्धस्फटिकसंकाशं सहस्त्रादित्यवर्चसम्॥

नीलजीमूतसंकाशं नीलांजनसमप्रभम्॥

अष्टबाहुं त्रिनयनं चतुर्बाहुं द्विबाहुकम्॥१॥

दंष्ट्राकरालवदनं नूपुरारावसंकुलम्॥

भुजङ्गमखिलं देवमग्निवर्णशिरोरुहम्॥२॥

दिगम्बरं कुमारेश बटुकाख्यं महाबलम्॥

खट्वाङ्गमसिपाशं च शूलं दक्षिणभागतः॥३॥

डमरुं च कपालं च वरदं भुजगं तथा॥

आत्मवर्णसमोपेतं सारमेयसमन्वितम्॥४॥

एवं ध्यात्वा "ॐ ह्रीं भैरवभैरवभयकरहरमांरक्षरक्षहुंफट्स्वाहा" इति मन्त्रेण प्रार्थयित्वा पुर्वोक्तयन्त्रपीठे आवाहनादिमुद्रां प्रदर्शयेत्।

षोडशोपचारैरभ्यर्च्य बलिदानं कुर्यात्।

तद्यथ-श्रीबटुकप्रीतये बलिदानमहं करिष्ये।

इति संकल्प्य गणापतिं दुर्गां रक्तैश्चन्दनाक्षत पुष्पैरभ्यर्च्य देवस्याग्रे त्रिकोणं चतुरस्त्र मण्डलं कृत्वा तत्र गन्धद्यैरभ्यर्च्य बलिपात्रे माषभक्तं पायसान्नं मोदकं चणकादीनि च कवलकारं संपादितं निधाय गन्दपुष्पभ्यां मूलान्ते बालरूपाय नमः

इति बलिं संपूज्य देवं तत्रसंचिन्त्य हस्ते जलमादाय मूलमन्त्रमुच्चार्य भूमौ निक्षिप्यस्वहस्ते बलिमादाय देवाय समर्पयेत्॥

इति बलिदानम्॥

अथ पाठप्रकारः॥

ततः आचम्य प्राणानायम्य देशकालौ संकीर्त्य मम सकलकामनासिद्ध्यर्थे श्रीबटुकभैरवस्तोत्रस्यैकादशसहस्त्रपुरश्चरणाङ्गत्वेन प्रतिस्तोत्रं मूलमन्त्रस्याष्टोत्तर-शत-संख्यजपसंपुटित पञ्चाशत्संख्यपाठमहं करिष्ये।

वा यथाशक्त्येकप्रभृतिपाठमहं करिष्ये।

इति संकल्प्य ततः मूलमंत्रमष्टोत्तरशतं जपेत्।

मूलमंत्रः।

"ॐ ह्रीं बटुकाय आपदुद्धारणाय कुरुकुरु बटुकाय ह्रीं ॐ" एवमष्टोत्तर १०८ शतमूलमंत्रजपं कृत्वा जपान्ते अनेन कृतजपेन श्रीबटुकभैरवः प्रीयतामिति जपं निवेद्य बटुकाय नमस्कृत्य पंचोपचारैः संपूज्य स्तोत्रं पठेत्।

तद्यथा-ॐ ह्रीं भैरवो भूतनाथश्च भूतात्मा भूताभावनः॥

क्षेत्रदः क्षेत्रपालश्च क्षेत्रज्ञः क्षत्रियो विराट्॥१॥

श्मशानवासी मांसाशी खर्पराशी स्मरान्तकृत्॥

रक्तपः पानपः सिद्धः सिद्धिदः सिद्धसेवितः॥२॥

कंकालः कालशमनः कला काष्ठातनुः कविः॥

त्रिनेत्रो बहुनेत्रश्च तथा पिङ्गललोचनः॥३॥

शूलपाणिः खड्गपाणः कङ्कालली धूम्रलोचनः॥

अभीरुभैरवीनाथो भूतपो योगिनीपतिः॥४॥

धनदो धनहारी च धनवान्प्रीतिभावनः॥

नागहारो नागहाशो व्योमकेशः कपालभृत्॥५॥

कालः कपालमाली च कमनीयः कलानिधिः॥

त्रिलोचनोज्ज्वलन्नेत्रास्त्रिशिखी च त्रिलोकपः॥६॥

त्रिनेत्रतनयो डिंभः शान्तः शान्तजनप्रियः॥

बटुको बटुवेशश्च खट्वाङ्गवरधारकः॥७॥

भूताध्यक्षः पशुपतिः भिक्षुकः परिचारिकः॥

धूर्तो दिगम्बरः शूरो हरिणः पाण्डुलोचनः॥८॥

प्रशान्तः शान्तिदः सिद्धः शंकरः प्रियबान्धवः॥

अष्टमूर्तिर्निधीशश्च ज्ञानचक्षुस्तपोमयः॥९॥

अष्टाधारः षडाधारः सर्पयुक्तः शिखीसखः॥

भूधरो भूधराधीशो भूपतिर्भूधरात्मज;॥१०॥

कङ्कालधारी मुण्डी च नागयज्ञोपवीतवान्॥

जृम्भणो मोहनस्तभी मारणः क्षोभणस्तथा॥११॥

शुद्धनीलाञ्जनप्रख्यो दैत्यहा मुण्डभूषितः॥

बलिभुग्बलिभुङ्नाथो बालो बालपराक्रमः॥१२॥

सर्वापत्तारणो दुर्गो दुष्टभूतनिषेवितः॥
कामी कलानिधिः कान्त कामिनीधिः कान्तः कामिनीवशकृद्वशी॥१३॥
सर्वसिद्धिप्रदो वैद्यः प्रभुर्विष्णुरितीव हि॥
अष्टोत्तरशतं नाम्नां भैरवस्य महात्मनः॥१४॥
मया ते कथितं देवि रहस्यं सर्वकामदम्॥
य इदं पठति स्तोत्रं नामाष्टशतमुत्तमम्॥१५॥
न तस्य दुरितं किंचिन्न च भूतभयं तथा॥
न च मारीभयं तस्य ग्रहराजभयं तथा॥१६॥
न शत्रुभ्यो भयं क्वापि प्राप्नुयान्मानवः क्वचित्॥
पातकानां भयं चैव पठेत्स्तोत्रमनुत्तमम्॥१७॥
मारीभये राजभये तथा चौरग्रिजे भये॥
औत्पातिके महाघोरे तथा दुःस्वन्पदर्शने॥१८॥
बंधने च तथा घोरे पठेत्स्तोत्रमनन्यधीः॥
सर्वं प्रशमनं याति भयं भैरवकीर्तनात्॥१९॥
एकादशसहस्त्रं तु पुरश्चरणमुच्यते॥
यस्त्रिसंध्य पठेद्देवि संवत्सरमतन्द्रितः॥२०॥
सं सिद्धिं पाप्नुयादिष्टां दुर्लभामपि मानवः॥
षणमासं भूमिकामस्तु जपित्वा प्राप्नुयान्महीम्॥२१॥
राजशत्रुविनाशर्थे जपेन्मासाष्टकं पुनः॥
गत्रो वारत्रयं चैव नाशयत्येव शात्रवान्॥२२॥
जपेन्मासत्रंय मर्त्यो राजानं वशमानयेत्॥
धनार्थी च सुतार्थे च दारार्थे यस्तु मानवः॥२३॥
जपेन्मासत्रयं देवि वारमेकं तथा निशि॥

धनं पुत्रं तथा दारान्प्राप्नुयान्नात्र संशयः॥२४॥

रोगी रोगात्प्रमुच्येत बद्धो मुच्येत बन्धनात्॥

भीतो भयात्प्रमुच्येत देवि सत्यं न संशयः॥२५॥

निगडैश्चापि बद्धो यः कारागृहे निपातितः॥

श्रृङ्खलाबन्धनं प्राप्तः पठेच्चैव दिवा निशि॥२६॥

यंयं चिन्तयते कामं तं तं प्राप्नोति निश्चितम्॥

अप्रकाशं परं गुह्यं न देयं यस्य कस्यचित्॥२७॥

सुकुलीनाय शान्ताय ऋजवे दम्भवर्जिते॥

दद्यात्स्तोत्रमिमं पुण्यं सर्वकामफलप्रदम्॥२८॥

इति श्रुत्वा ततो देवी नामाष्टशतमुत्तमम्॥

जजाप परया भक्त्या सदा सर्वेश्वरेश्वरी॥२९॥

भैरवोपि प्रहृष्टोभूत्सर्वलोकमहेश्वरः॥

वरं ददाति भक्तेभ्यः पठेत्स्तोत्रमनन्यधीः॥३०॥

सँतोषं परमं प्राप्य भैरवस्य महात्मनः॥३१॥

वारंवारं भुवनजननी प्रोच्यते साधु वादः।

सत्यंसत्यजगति सकले भैरवो देव एकः॥

यांयां सिद्धिं भुवनजठरे कामयेन्मानवो यस्तांतां सिद्धिं वितरति सदा भैरवः सुप्रसन्नः॥३२॥

पाणिभ्यां परितः प्रपीड्य सुदृढं निश्चोत्यनिश्चोत्य च ब्रह्माण्ड सकलं प्रचालितर-सालोच्चैः फलाभं मुहुः १ पायंपायमपाययत्रिजगतीमुन्मत्तवत्तैरसैर्नृत्यंस्तांडव-मंबरेण शिरसा पायान्महाभैरवः॥३३॥

बिभ्राणः शुभ्रवर्णं द्विगुणनवभुज पंचवक्त्रं त्रिनेत्रं शङ्खं भैषज्यचापं सविषममृतकं ज्ञानमुद्रेन्द्रशस्त्रम्॥

शूलं खट्वाङ्गबाणान् डमरुमसिगदावह्निमारोग्यमालामिष्टाभीर्तिं च दोर्भिर्जयति खलु महाभैरवः सर्वसिद्ध्यै॥३४॥

क्वाकाशं क्व समीरणः क्व दहनः क्वापश्च विश्वभरः क्व ब्रह्मा क्व जनार्दनः क्व तरिणः क्वंदुश्च देवासुराः॥

कल्पान्तारभटीनटप्रमुदितः श्रीसिद्धयोगीश्वरो क्रीडानाटकनायको विजयते देवो महाभैरवः॥३५॥

लिखित्वा परया भक्त्या भैरवस्तोत्रमुत्तमम्॥

अष्टानां ब्राह्मणानां च देयं पुस्तकमादरात्॥३६॥

यान्यान् समीहते कामांस्तांस्तान्प्राप्नोत्यसंशयम्॥३७॥

इह लोके सुखं प्राप्य पुस्तकस्य प्रसादतः॥

शिवलोकमनुप्राप्य शिवेन सह मोदते ॥३८॥

लिखित्वा भूर्जपत्रे तु त्रिलोहपरिवेष्टितम्॥

सौम्ये च वस्तुवसने कर्पटे च सुशोभने॥३९॥

करे बाहौ गले कट्यां मूर्ध्नि त्रिलोहगोपितम्॥

यस्तु धारयेत स्तोत्रं सर्वत्र जयमाप्नुयात्॥४०॥

इति श्रीरुद्रयामले तंत्रे पार्वतीश्वरसंवादे आपदुद्धारकश्रीबटुकभैरवाष्टोत्तरशतनामस्तवराजः समाप्तः॥

अथ कुबेरमंत्रप्रयोगः॥

"ॐ यक्षाय कुबेराय वैश्रवणाय धनधान्याधिपतये धनधान्यसमृद्धिं मे देहि दापय स्वाहा" इति पंच त्रिंशद्वर्णात्मको मंत्रः॥

अस्य मंत्रस्य विश्रवा ऋषिः।

बृहती छंदः।

कुबेरो देवता सर्वेष्टसिद्धये जपे विनियोगः॥

ॐ विश्रव ऋषये नमः।

शिरसि॥१॥

ॐ बृहतीछंदसे नमः।

भ्रुरवे॥२॥

ॐ कुबेरदेवतायै नमः।

हृदि॥३॥

इति ऋष्यादिन्यासः।

ॐ यक्षाय अंगुष्ठाभ्यां नमः॥१॥

ॐ कुबेराय तर्जनीभ्यां नमः॥२॥

ॐ वैश्रवणाय मध्यमाभ्यां नमः॥३॥

ॐ धनधान्यधिपतये अनामिकाभ्यां नमः॥४॥

ॐ धनधान्यसमृद्धिं मे कनिष्ठिकाभ्यां नमः॥५॥

ॐ देहि दापय स्वाहा करतलकरपृष्ठाभ्यां नमः।

इति करन्यासः॥

एवं हृदयादि षडंगन्यासं कुर्यात्॥

एवं न्यासविधिं कृत्वा ध्यायेत्-"मनुजवाह्यविमानवर स्थितं गरुडरत्ननिभं निधिनायकम्॥

शिवसरवं मुकुटदिविभूषितं वरगदे दधतं भज तुंदिलम्॥"

इति ध्यात्वा पीठधर्मादिपरत्त्वांत पीठदेवताः संपूज्य तद्देशे मूलेन मूर्ति प्रकल्प्यस पाद्यादिपुष्पांतैरुपचारैः संपूज्य आवरणपूजां कुर्यात्।

तद्यथा-षट्कोणे आग्नेया दिकोणकेसरेषु मध्ये दिक्षु च ॐ यक्षाय हृदयाय नमः॥१॥

ॐ कुबेराय शिरसे स्वाहा॥२॥

ॐ वैश्रवणाय शिखायैवट्॥३॥

ॐ धनधान्यधिपतये कवचाय हुं॥४॥

ॐ धनधान्यसमृद्धिं मे नेत्रत्रयाय वौषट्॥५॥

ॐ देहि दापय स्वाहा अस्त्राय फट्॥६॥

इति षडंगानि पूजयेत्॥

ततो भूपुरे इन्द्रादिदशदिक्पालान्। तद्बाह्ये वज्राद्यायुधानिच पूजयेत्॥

इत्यावरणपूजां कृत्वा धूपादिनीराजनांतं संपूज्य जपं कुर्यात्॥

अस्य पुरश्चरणं लक्षजपः।

तथा चोक्तम्-"लक्षमेकं जपेन्मंत्रं दशांशं जुहुयात्तिलैः॥

शिवालये जपेन्मंत्रमयुतं धनवृद्धये॥१॥

बिल्वमूलोपविष्टेन जपतो लक्षं धनर्द्धिदम्।

इति पंचत्रिंशद्वर्णात्मककुबेरमंत्रप्रयोगः॥

अथ षोडशाक्षरकुबेरमंत्रप्रयोगः।

मंत्रो यथा-"ॐ श्रीं ॐ ह्री श्रीं क्लीं श्रीं क्लीं वित्तेश्वराय नमः" अस्य मंत्रस्य विश्रवा ऋषिः।

बृहती छंदः।

कुबेरो देवता।

ममाभीष्टसिद्ध्यर्थे जपे विनियोगः॥

ॐ विश्रवऋषये नमः।

शिरसि॥१॥

ॐ बृहतीछंदसे नमः मुरवे॥२॥

ॐ कुबेरदेवतायै नमः हृदि॥३॥

इति ऋष्यादिन्यासः॥

ॐ श्रीं अंगुष्टाभ्यां नमः॥१॥

ह्रीं श्रीं तर्जनीभ्यां नमः॥२॥

ह्री क्लीं मध्यमाभ्यां नमः॥३॥

श्रीं क्लीं अनामिकाभ्यां नमः॥४॥

वित्तेश्वराय कनिष्टिकाभ्यां नमः॥५॥

नमोनमः करतलकरपृष्टाभ्यां नमः॥

इति करन्यासः॥

एवं हृदयदिषडंगन्यांसं कुर्यात्।

ध्यानार्चनादिकं सर्वमस्य पूर्ववदाचरेत्॥

इति षोडशाक्षरकुबेरमंत्रंप्रयोगः॥

अथ शिवाथर्वशीर्षम्॥

शिवउपनिषदि "ॐ देवाहवैस्वर्गलोकमयंस्तेरुद्रमपृच्छन्॥

कोभविनिति।

सोब्रवीदहमेकः प्रथममासोद्वर्तामि च भविष्यामि च नान्यःकश्चिन्मात्तो व्यतिरिक्त इति।

सोन्तरादन्तरं प्राविशद्दिश्चान्तरं प्राविशत्सोहं नित्यानित्यो व्यक्ताव्यक्तो ब्रह्माब्रह्माहं प्राञ्चः प्रत्यञ्चोहंदक्षिणाञ्चउदञ्चोहमधश्चोर्ध्वश्चाहं

दिशश्चप्रतिदिशश्चाहंपुमानपुमानपुमानस्त्रियश्चाहं सावित्र्यहं गायत्र्यहं त्रिष्टुब्जगत्यनुष्टुप्चाहं छंदोहं सत्योहं

गार्हपत्योदक्षिणाग्निराहवनीयोहं गौरहंमगौर्यहमृगहं यजुरहंसामाहमथर्वाङ्गिरसोहं ज्येष्ठोहंश्रेष्ठोहंवरिष्ठोहमापोहं तेजो हं गुह्योहमरण्योहमक्षरमहंक्षरमहं पुष्करमहं

पवित्रमहमुग्रश्चवलिश्चपुरस्ताज्योतिरित्यहमेवसर्वेभ्योमामेव स सर्वः समायोमां वेदस देवान् वेद सर्वोश्चवेदान् साङ्गानपि

ब्रह्मब्रह्माणैश्चगोभिर्ब्राह्मणेनहविर्हविषा आयुरायुषासत्यं सत्येन धर्मेणधर्मैतर्पयामिस्वेनतेजसा।

ततोहवैतेदेवारुद्रमपृच्छन्।

तेदेवाऊर्ध्वबाहवोरुद्रंस्तुवन्ति।

ॐ योवै रुद्रः सभगवान् यश्च ब्रह्मा तस्मैवै नमोनमः॥१॥

योवैरुद्रः सभगवान् यश्चविष्णुस्तस्मैवैनमो नमः॥२॥

योवैरुद्रः सभगावन्यश्चैस्कंदस्तस्मैः॥३॥

योवैरुद्रः सभगवान् यश्चेन्द्रस्तस्मैः॥४॥

योवैरुद्र सभगवान्यश्चाग्निस्तस्मैः॥५॥

योवैरुद्रः सभगवान् यश्चवायुस्तस्भै॥६॥

ॐ योवैरुद्रः सभगवान् यश्चसूर्यस्तस्मैः॥७॥

योऐवैरुद्रः सभगवान् यश्चसोमस्तस्मैः॥८॥

योवैरुद्रः सभगवान् येष्टौग्रहास्तस्मैः॥९॥

योवैरुद्रः सभगवान् येचाष्टौप्रतिग्रहास्तस्मैः॥१०॥

योवैरुद्रः सभगवान् यच्चभूस्तस्मैः॥११॥

योवैरुद्रः सभगवान् यच्चभुवस्तस्मैः॥१२॥

योवैरुद्रः सभगवान् यच्चस्वस्तस्मैः॥१३॥

योवैरुद्रः सभगवान् यच्चमहस्तस्मैः॥१४॥

योवैरुद्रः सभगवान्याचपृथिवीतस्मैः॥१५॥

योवैरुद्रः सभगवान् यच्चान्तरिक्षंतस्मैः॥१६॥

योवैरुद्रः सभगवान् याचद्यौस्तस्मै॥१७॥

योवैरुद्रः सभगवान् याश्चापस्तस्मै॥१८॥

योवैरुद्रः सभगवान् यच्चतेजस्तस्मै॥१९॥

योवैरुद्रः सभगवान्यश्चकालस्तस्मै॥२०॥

योवैरुद्रः सभगवान् यमस्तस्मै॥२१॥

योवैरुद्रः सभगवान् यश्चमृत्युस्तस्मै॥२२॥

योवैरुद्रः सभगवान् यच्चामृतंतरस्मै॥२३॥

योवैरुद्रः सभगवान् यच्चाकाशं तस्मै॥२४॥

योवैरुद्रः सभगवान् यच्चविश्वंतस्मै॥२५॥

योवैरुद्रः सभगवान् यच्चस्थूलंतस्मै॥२६॥

योवैरुद्रः सभगवान् यच्चसूक्ष्मंतस्मै॥२७॥

योवैरुद्रः सभगवान् यच्च शुक्लं तस्मै॥२८॥

योवैरुद्रः सभगवान् यश्चकृष्णस्तस्मै॥२९॥

योवैरुद्रः सभगवान् यच्चकृत्स्नंतस्मै॥३०॥

योवैरुद्रः सभगवान् यच्चसत्यंतस्मै॥३१॥

योवैरुद्रः सभगवान् यच्चसर्वैतस्मै॥३२॥

भुस्तेआदिर्मध्यभुवस्तेस्वतेशीर्षे विश्वरूपोसिब्रह्मै कस्त्वंद्विधावृद्धिस्त्वंशांतिस्त्वं पुष्टिस्त्वंहुतमहु तंदत्तमदत्तंसर्वमसर्वे विश्वमविश्वं कृतमकृतंपरमपरं परायणश्चत्वं अपामसोममृता अभूमागन्मे ज्योतिरविदामदेवान्।

किंनूनमस्मान् कृणवदरातिः।

किमुधूर्त्तिरमृतं मर्त्यस्तसोमसूर्यपुरस्तात्सूक्ष्मः पुरुषः।

सर्वञ्जगद्धितं वा एतदक्षरं प्राजापत्यं सौम्यं सूक्ष्मंपुरुषं ग्राह्यमग्राह्येण

भावंभावेनसौम्येऽसौम्येनसूक्ष्मंसूक्ष्मेण वायव्यंवायव्येन ग्रसतितस्मै महाग्रासायवैनमोनमः।

हृदिस्था देवताः सर्वा हृदि प्राणाः प्रतिष्ठिताः।

हृदि त्वमसि यो नित्यं तिस्रो मात्राः परस्तुसः।

तस्योत्तरत शिरोदक्षिणतः पादौयउत्तरतःसओङ्कारः य ओङ्कारः

सप्रणवः यः प्रणवः ससर्वव्यापीयः सर्वव्यापी सोनन्तः योनंतस्तत्तारंत्तापच्छुक्लंयच्छुक्लं तत्सूक्ष्मं यत्सूक्ष्मं तद्वैद्युतं तत्परं ब्रह्म।

यत्परंब्रह्मसएकः यएकः सरुद्रः सईशानः यईशानः सभगवान् महेश्वरः॥३॥

अथकस्मादुच्यते ओंकारः यस्मादुच्चार्यमाण एव प्राणानूर्ध्वमुत्क्रामयतितस्मादुच्यतेओङ्कारः।

अथकस्मादुच्यतेप्रणवः यस्मादुच्चार्यमाणएवऋग्वजुः सामाथर्वाङ्गिरसं ब्रह्मब्राह्मणेभ्यः प्रणामयति नामयतिचतस्मादुच्यतेप्रणवः।

अथकस्मादुच्येत सर्वव्यापी यस्मादुच्चार्यमाण एवयथास्नेहेनपलालपिण्डमिव शान्तरूपमोतप्रोतमनु प्राप्तोव्यतिषक्तश्चतस्मादुच्यतेसर्वव्यापी।

अथकस्मादुच्यतेनन्तः यस्मादुच्चार्यमाणएव तिर्यगर्ध्वम धस्ताच्चास्यान्तोनोपलभ्यते तस्मादुच्यतेनन्तः अथकस्मादुच्यतेतारं यस्मादुच्चार्यमाणएव गर्भजन्मव्याधिजरा मरणसंसारमहाभयात्तारयतित्रायतेच तस्मादुच्यतेतारम्।

अथकस्मादुच्यतेशुक्लं यसमादुच्चार्यमाण एवंक्रदतेक्ला मयतिचतस्मादुच्यतेशुक्लम्।

अथकस्मादुच्यतेसूक्ष्मं यस्मादुच्चार्यमाणएवसूक्ष्मोभूत्वा शरीराण्यधितिष्ठति सर्वाणि चाङ्गान्यभिमृश्यतितस्मा दुच्यतेसूक्ष्मम्।

अथकस्मादुच्यतेवैद्युतं यस्मादुच्चार्यमाणएवव्यक्तेमहति तपसिद्योतयति तस्मादुच्यतेवैद्युतम्।

अथकस्मादुच्यते परंब्रह्म यस्मात्परमपरं परायणञ्च बृहद्बृहत्याबृंहयति तस्मादुच्यतेपरंब्रह्म।

अथकस्मादुच्यतेएकः यः सर्वान्प्राणान्संभक्ष्य संभ क्षणेनाजः संसृजति-विसृजतितीर्थमेकेव्रजन्ति तीर्थमेके दक्षिणः प्रत्यञ्च उदञ्चप्राच्योभिवजन्त्येके तेषांसवेंषामिहसङ्गतिः साकं सएको भूदन्तरश्श्वरतिप्रजानां तस्मादुच्यतेएकः।

अथकस्मादुच्यतेरुद्रः यस्मादृच्यतेरुद्रः यस्मादृषिभिर्नान्यैर्भवतैर्द्रुतमस्यरूपमुपलभ्यते तस्मादुच्यतेरुद्रः।

अथकस्मादुच्यतेईशानः यः सर्वान्देवानीशते ईशानीभिर्जनीभिश्च शक्तिभिः।

अभित्वाशूरणोनुमोदुग्धाइवधेनवः।

ईशानमस्यजगतः स्वदर्शमीशानमिन्द्रतस्थुष इति तस्मादुच्यते ईशानः

अथकस्मादुच्यते भगवान् महेश्वरः यस्माद्भक्तान् ज्ञानेन भजत्यनुगृह्णाति च वाचं संसृजतिच सर्वान् भावान् परित्यज्यात्मज्ञानेनयोगैश्वर्येण महति तस्मादुच्यते सभगवान् महेश्वरः

तदेतद्रुद्रचरितम्॥४॥

एषोहदेवः प्रदिशोनुसर्वाः पूर्वोहजातः सउगर्भेअन्तः।

सएवजातः सजनिष्यमाणः प्रत्यङ्ङ्जनास्तिष्ठति सर्वतोमुखः।

एकोरुद्रोनद्वितीयायतस्मैय इमाँल्लोकानीशत ईशानीभिः।

प्रत्यङ् जनास्तिष्ठति चान्तकाले संसृज्यविश्वाभुवनानि गोप्ता।।

योयोनिं योनिमधितिष्टत्येकोयेनेदंसर्वं विचरति सर्वम्।

तमीशानं वरदं देवमीड्यं निचाय्येमांशान्तिमत्यन्तमेति।

क्षमांहित्वाहेतुजालस्यमूलं बुद्ध्यासंचितं स्थापयित्वातुरुद्रे।

रुद्रमेकत्वमाहुः शाश्वतं वैपुराणमिषमूर्जेण पशवोनानुमायन्तम्मृत्युपाशान्।

तदेतेनात्मन्नेतेनर्धचतुर्थेना मात्रेणशान्तिं संसृजति।

पशुपाशाविमोक्षणं यासाप्रथमामात्राब्रह्मदेवत्या रक्ता वर्णेनयस्तांध्यायते नित्यं सगच्छेत् ब्रह्मपदम्दम्।

यासाद्वितीयामात्राविष्णुदेवत्या कृष्णवर्णेन यस्तांध्यायते नित्यं सगच्छेद्वैष्णवंपदम्।

यासातृतीयामात्राईशानदेवत्या कृष्णावर्णेन यस्तांधयायते नित्यं सगच्छेद्वैष्णवंपदम्।

यासातृतीयामात्राईशानदेवत्या कपिलावर्णेन यस्तांध्यायतेनित्यं सगच्छेदीशानं पदम्।

या सार्धचतुर्थी मात्रा सर्वदेवत्याव्यक्ती भूताखंविचरति शुद्धास्फटिकसन्निभावर्णेन यस्तांध्यायते नित्यं सगच्छेत्पदमनामयम्।

तदेतदुपासीतमुनयो वाग्वदन्तिनतस्यग्रहणमयं पंथाविहित उत्तरेणयेनदेवायान्तियेन-पितरो येनऋषयः परमपरंपरायणंचेति वालाग्रमात्रं हृदयस्य मध्ये विश्वेदेवं जातरूपं वरेण्यम्।

तमात्मास्थं येतुपश्यन्तिधीरास्तेषांशान्तिर्भवतिनोतरेषाम्।

यस्मिन्क्रोधयाश्चतृष्णां क्षमाश्चाक्षमां हित्वाहेतुजालस्य मूलंबुद्ध्यासञ्चितं स्थापयित्यवतुरुद्रे रुद्रमेकत्वमाहुः रुद्रोहिशाश्वतेनवैपुराणेनेषमूर्जेण तपसा-नियन्ताग्निरिति भस्म वायुरितिभस्मजलमिति भस्मस्वँ हवा इदंभस्ममनएतानि चक्षूंषि यस्मादव्रतामिदं पाशुपतंयद्भस्मानाङ्गनि संस्पृशेत् तस्माद्ब्रह्म तदेतत्पाशुपतं पशुपाशविमोक्षणाय।।५।।

योग्रौरुद्रोयोश्वन्तर्य ओषधीर्वीरुधत्र्याविवेशा

यइमाविश्वाभुवनानिचक्लृपेतस्मैरुद्रायनमोस्त्वग्रये।

योरुद्रोप्सुयोरुद्रोग्रौयोरुद्रोऽश्वन्तर्यो रुद्रओषधीर्वि रुधआविवेश।

योरुद्रइमाविश्वाभुवनाननिचक्लृपे तस्मै रुद्रा यवैनमोनमः।

ये रुद्रोप्सु योरुद्रो ओषधीषु योरुद्रो वनस्पतिषु येनरुद्रेणजगदूर्ध्वं पृथिवी दि्धात्रिधा धर्ता धारिता नारायेन्तरिक्षे तस्मै रुद्राय वै नमः।

मुर्धानमस्यसंसेव्याप्यथर्वा हृदयश्चयत्॥

मस्तिष्काध्वैप्रेरयत्यवमानोदधिशीर्षतः॥

पद्वाअथवर्णः शिरोदेवकोशः समुज्झितः तत् प्राणो भिरक्षतिशिरोन्तमथोमनः।

नचदिवोदेवजनेनगुप्तानचान्तरक्षिाणि नच भूम इमाः।

यस्मिन्निदं सर्वमोतप्रोतं तस्मादन्यन्नपरं किञ्चनास्ति।

नतस्मात्पूर्वेनपरं तदस्तिनभूतंनोभव्यं यदासीत्।

सहस्त्रपादेकमूर्ध्नाव्याप्तं स एवेदमावरीवर्तिभूतम्।

अक्षरात् सञ्जायते कालःकालादव्यापकउच्यते।

व्यापकोहि भगवान् रुदो भोगायमानो यदाशेते रुद्रस्तदा संहार्यते प्रजाः उच्छ्वसिते तमो तमस आपोऽश्वङ्गुल्यामथिते

मथितंशिशिरेशिशिरं मथ्यमानं फेनं भवति फेनादण्डं भवत्यण्डाद्ब्रह्माभवति ब्रह्मणोवायुः वायोरोङ्कारात् सावित्री सावित्र्या

गायत्री गायत्र्या लोकाभवन्ति अर्चयति तपः सत्यं मधुरक्षन्तियद्ध्रुवम्।

एतद्धिपरमंतमः।

आपोज्योतीरसोमृतं ब्रह्मभूर्भुवः स्वरोन्नम इति॥६॥

यइदमथर्वशिरो ब्राह्मणोधीते।

अश्रोत्रियः श्रोत्रियो भवति।

अनुपनीत उपनीतो भवति।

सोग्निपूतो भवति। स वायुपूतो भवति।

स सूर्यपूतो भवति। स सोमपूतो भवति।

स सत्यपूतो भबति।

स सर्वैर्देवैर्ज्ञातो भवति।

स सर्वैर्वेदैनुध्यातो भवति।

स सर्वेषुतीर्थेषुस्नातो भवति।

तेनसर्वैः क्रतुभिरिष्टं भवति।

गायत्र्याःषष्टिसहस्राणि जप्तानि भवन्ति।

प्रणवानामयुतं जप्तं भवति।

सचक्षुषः पंक्तिं पुनाति।

आसप्तमात् पुरुषयुगान्पुनातीत्याह भगवानथर्वशिरः सकृज्जप्त्वैशुचिः स पूतः कर्मण्यो भवतिाद्धितीयं जप्त्वा गणाधिपत्यमान्यपोति।

तृतीयं जप्त्वैवमेवानुप्रविशन्त्यो सत्यमों सत्यमों सत्यम्।

इत्यथर्ववेद शिवाथर्वशीर्षम्।

इति शिरउपनिषत्।।

इति श्रीबीकानेरराज्यान्तर्गतश्रीरत्नगढनगरनिवासिना पण्डितश्रीरामकृष्णपौत्रेण श्रीकस्तूरीचन्द्रसूनुना पंडितवैद्यश्रीचतुर्थीलालशर्मणा विरचिते अनुष्ठानप्रकाशे महानिबन्धे पुरश्श्वरणकाण्डे शिवमन्त्रानुष्ठानप्रकरणं समाप्तम्।।२।।

Gājāsurasamhāra-mūrti

Vīrabhadra

Vṛshabhārūḍha

Kalyāṇa Sundara

Kāma-dahana-mūrti

Kālasamhāra-mūrti

Kirātārjuna

Kamkāḷa-mūrti

Chaṇḍeśānugraha-mūrti

Vishahara-mūrti

Chakra-pradāna-mūrti

Vigneśvara-prasanna

Eka-pāda-mūrti

Sukhāsīna-mūrti

Dakshiṇā-mūrti

Lingodbhava-mu[illegible]

Chandraśekara



Umā Maheśvara

Tripurahara-mūrti

Jālandhara-mūrti